कक्षा
10

संस्कृतम्–तृतीय भाषा

# स्पन्दना

कक्षा 10
स्पन्दना

# स्पन्दना

( संस्कृतम्-तृतीयभाषा )

## कक्षा - दशमी

माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः

प्रकाशकः
राजस्थान राज्य पाठ्यपुस्तक मण्डलम्, जयपुरम्

# पाठ्यपुस्तक-लेखन-समितिः

## पुस्तकम् - स्पन्दना ( कक्षा - १० )

{माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः इत्यस्य अधिकृतं पाठ्यपुस्तकम्}


**डॉ. विक्रम जीतः**
**संयोजकः**
संस्कृत-विभागाध्यक्षः
राजकीयः डूँगर (स्नातकोत्तर) महाविद्यालयः, बीकानेरम्

**डॉ. योगेन्द्र कुमारः भानुः**
संस्कृत-व्याख्याता
महारानी श्री जया महाविद्यालयः, भरतपुरम्

**डॉ. योगेन्द्र कुमारः धामा**
संस्कृत-व्याख्याता
बाबू शोभाराम राज. कला महाविद्यालयः, अलवरम्

**श्री नवीन कुमारः शर्मा**
संस्कृत-व्याख्याता
राज.आ.उ.मा.वि., अजयराजपुरा, सांगानेरम्, जयपुरम्

**श्री केशवरामः डूडी**
वरिष्ठसंस्कृताध्यापकः
राज.उ.मा.विद्यालयः, आँगणवा, जोधपुरम्

# पुरोवाक्

माध्यमिक-शिक्षा-मण्डल-राजस्थानस्य अधिनिर्देशं दशम-कक्षायै प्रणीतं पुस्तकमिदं जिज्ञासु-बालकानां तेषां शिक्षकाणाञ्च पुरतः समर्पयद्भिरस्माभिः हर्षप्रकर्षोऽनुभूयते।

ज्ञानवर्द्धनं-भाषाबोधनं-संस्काराधानं चेति लक्ष्यत्रयमुद्दिश्य पुस्तक-सर्जनायां प्रवृत्तमस्माभिः। ग्रन्थभीरुबालानां प्रियार्थम् आकारेण लघीयसी खल्वियं पुस्तिका। व्याकरणादियुतं परिशिष्ट-भागं विहाय आहत्य केवलं पञ्चदश पाठाः सन्ति, यत्र गद्यं पद्यं नाट्यं चेति त्रितयं समाहितम्। तत्रापि (पाठ्यवस्तुनि) प्राचीनार्वाचीनयोः सामञ्जस्यम्। करुणा, त्यागः, प्रेम, विनयः, सत्यं, श्रमः, जिजीविषा, विजिगीषा, वीरता, एकता, राष्ट्रियता, राष्ट्र-गौरवं, देशभक्तिः, कर्त्तव्य-निष्ठा, जीवनास्था च – इत्यादिजीवनमूल्यानां शिक्षणाय सामग्री गुम्फिताऽस्ति। राजस्थानस्य गौरवेण छात्राः परिचिताः स्युरिति केचन पाठाः रचिताः। स्वातन्त्र्य-संग्राम-प्रवर्तकः महाराणा-प्रतापस्तु पुस्तकेऽस्ति एव। स्वामिकेशवानन्दस्य, महाराजसूरजमल्लस्य चापि प्रेरकं जीवनचरितम् इदम्प्रथमतयाऽत्र पठिष्यन्ति छात्राः।

लेखनं स्तरानुकूलं, ग्राह्यं, सोद्देश्यं च विधातुं यत्नः कृतः। ऐतिहासिक वृत्तान्तादि-निरूपणे **'नामूलं लिख्यते किञ्चिद्'** इति निकषं पुरतो निधाय तथ्यानां प्रामाणिकता सविशेषं रक्षिता। सरलतायाः, रोचकतायाः, नवीनतायाः, विषय-वैविध्यस्य, विस्मयस्य, मनोरञ्जनस्य च तत्त्वं न तिरोहितमभूदिति प्रयतितम् येन पुस्तकमिदम् आनन्दोपलब्धि-साधनं स्यान्तु नीरसता-साधनम्।

सहजेन पाठ-बोधाय, पाठं प्रति छात्राणाम् उन्मुखीकरणाय च प्रत्येकं पाठस्यादौ तत्तत्पाठ-परिचायकं सारगर्भितं विवरणमपि प्रदत्तमस्ति। छात्राणामभ्यासार्थं बालमनोविज्ञानम् उच्चावचं छात्रस्तरं च दृष्टौ निधाय अभ्यास-प्रश्नाः तथा वैविध्येन कल्पिताः येन ज्ञान-शक्तेः विभिन्न-पक्षाणां तद्यथा अवबोधः (Understanding), प्रत्यास्मरणं (Recall), प्रत्यभिज्ञानं (Recognition), कौशलं (Skill), प्रयोगः (Application) – इत्यादीनां विकासः मूल्याङ्कनं च सुकरं भवेत्।

शिक्षकेषु निवेदनम् : पुस्तकमिदं प्रायशः सरल-संस्कृत-माध्यमेन लिखितमस्ति। शिक्षकाः विनिवेद्यन्ते यत्ते व्याकरणानुवादविधिं (Grammar Translation Method) परित्यज्य पुस्तकं संस्कृत-माध्यमेनैव पाठयन्तु। कक्षायां संस्कृतमयं वातावरणं निर्मातुं पुस्तकगत-श्लोकानां गीतानां च सस्वर-वाचनस्य गायनस्य च अभ्यासं कारयन्तु। संस्कृतच्छन्दसां सस्वर-पाठस्य अभ्यासः भवतां नास्ति चेद् स्वयं कुतश्चिदभ्यस्य ततः कारयन्तु। संस्कृतमधिगन्तुं भाषितुं च शुद्ध-वर्णोच्चारणस्य अभ्यासोऽपि परमावश्यकः। एकैकस्य पाठस्य प्रश्नानाम् अभ्यासं कक्षायां कारयन्तु। परिशिष्टगतस्य व्याकरणादेरपि सदुपयोगं कुर्वन्तु इति।

अस्य पाठ्यपुस्तकस्य प्रणयने प्रत्यक्षं परोक्षं वा यस्य यस्य यत्किमपि साहाय्यं प्राप्तं तस्य तस्य कृते हार्दं कार्तज्ञं ज्ञापयामः। पुस्तकमधीयानाः छात्राः संस्कृत-सम्भाषणे लेखने च सफलाः भवन्ति चेदेव अस्माकं श्रमस्य आयासस्य च साफल्यमस्तीति मन्यामहे-

**'क्लेशः फलेन हि पुनर्नवतां विधत्ते।'**

**लेखकगणः**

# कक्षा : 10 ( दशमी )

## विषय : संस्कृतम्

### पाठ्यक्रमः

**समयः - 3:15 होराः ( घण्टे )** **पूर्णाङ्काः - 80**

| क्र.सं. | अधिगम-क्षेत्रम् | अङ्कभारः |
|---|---|---|
| 1. | पठितावबोधनम् | 27 |
| 2. | अपठितावबोधनम् | 10 |
| 3. | व्याकरणम् | 25 |
| 4. | रचनात्मककार्यम् | 18 |
| | | 80 |

| क्र.सं. | पाठ्यवस्तु | अङ्कभारः |
|---|---|---|
| **1.** | **पठितावबोधनम्** | **27** |
| (i) | पाठ्यपुस्तकात् गद्यांशस्य हिन्दीभाषया अनुवादः (द्वयोः एकस्य) | 5 |
| (ii) | पाठ्यपुस्तकात् पद्यांशस्य हिन्दीभाषया अनुवादः (द्वयोः एकस्य) | 5 |
| (iii) | पाठ्यपुस्तकात् पद्यांशस्य संस्कृतव्याख्या (द्वयोः एकस्य) | 4 |
| (iv) | पाठ्यपुस्तकात् नाट्यांशात् संस्कृत-व्याख्या (द्वयोः एकस्य) | 3 |
| (v) | प्रश्नोत्तराणि-संस्कृतमाध्यमेन अष्टसु पञ्चप्रश्नानाम् | 3 |
| (vi) | प्रश्ननिर्माणम् | 4 |
| (vii) | पाठ्यपुस्तकात् श्लोकद्वयलेखनम् | 3 |
| **2.** | **अपठितावबोधनम्** | **10** |
| | 80-100 शब्दपरिमितः (एकः सरलः गद्यांशः) | |

| | | |
|---|---|---|
| (i) | शीर्षकप्रदानम् | 1 |
| (ii) | संस्कृत–माध्यमेन प्रश्नोत्तराणि | 5 |
| (iii) | अनुच्छेदाधारितं भाषिककार्यम् | 4 |
| | 'भाषिककार्यम्' इत्यनेन अभिप्रेतम् अस्ति– | |
| (i) | वाक्येषु कर्तृक्रियापदचयनम् | |
| (ii) | कर्तृ–क्रियान्वितिः | |
| (iii) | विशेषण–विशेष्यान्वितिः | |
| (iv) | संज्ञास्थाने सर्वनामप्रयोगः अथवा सर्वनामस्थाने संज्ञाप्रयोगः | |
| (v) | पर्यायपदं विलोमपदं वा अनुसृत्य अनुच्छेदे तत्समानपदस्य अन्वेषणम् | |

| | | |
|---|---|---|
| **3.** | **व्याकरणम्** | **25** |
| **(i)** | **संधिः -** | **4** |
| (अ) | स्वरसंधिः - वृद्धिः, यण्, अयादिः, पूर्वरूपम्, पररूपम् | |
| (आ) | व्यजनसंधिः - परसवर्णः, मोऽनुस्वारः, जश्त्वम् | |
| | (वर्गाणाम् प्रथमाक्षराणाम् स्थाने तृतीयवर्ण–परिवर्तनम्) | |
| (इ) | विसर्गसंधिः - विसर्गस्य उत्वं, रुत्वं, लोपः, विसर्गस्थाने श्, ष्, स्। | |
| **(ii)** | **समासः -** | **3** |
| | अव्ययीभावः, कर्मधारयः, द्वन्द्वः | |
| | (वाक्येषु समस्तपदानां विग्रहः, विग्रहपदानां च समासः।) | |
| **(iii)** | **कारकाणि -** | **3** |
| | उपपद–विभक्तीनां प्रयोगाः, तेषां सामान्यनियमानां परिचयश्च। | |
| **(iv)** | **प्रत्ययाः** | **4** |
| (अ) | कृदन्ताः - तव्यत्, अनीयर्, शतृ, शानच् | |
| (ब) | तद्धिताः - मतुप्, इन्, ठक्, त्व, तल् | |
| (स) | स्त्रीप्रत्ययौ - टाप्, ङीप् | |
| **(v)** | **अव्ययपदानि** | **3** |
| | (पाठ्यपुस्तके कथायाम्, अनुच्छेदे, संवादे, पद्ये वा अव्ययानाम् प्रयोगाः) | |

अपि, इति, इव, उच्चैः, कदा, कुतः, नूनम्, पुरा, मा, इतस्ततः, यत्, अत्र, तत्र, कुत्र, इदानीम्, सम्प्रति, यदा, कदा, यथा, तथा, विना, सहसा, श्वः, ह्यः, अधुना, बहिः, वृथा, कदापि, शनैः, किम्, यावत्, तावत्।

| | | |
|---|---|---|
| **(vi)** | **वाच्य-परिवर्तनम्** (लट्लकारे) | **3** |
| **(vii)** | **समयलेखनम्** (घटिका-चित्र-साहाय्येन अङ्कानां स्थाने शब्दैः) | **2** |
| **(viii)** | **अशुद्धिसंशोधनम्** -<br>वाक्येषु लिङ्ग-विभक्ति-वचन-पुरुष-लकाराधारितम् अशुद्धिसंशोधनम्। | **3** |

| | | |
|---|---|---|
| **4.** | **रचनात्मक-कार्यम्** | **18** |
| (i) | कमपि विषयं स्वीकृत्य प्रार्थनापत्रं/आत्मीयजनान् प्रति अनौपचारिकं पत्रम् | 4 |
| (ii) | संकेताधारित संवादलेखनम् | 4 |
| (iii) | अनुवादकार्यम् - हिन्दीभाषायाः षड्वाक्येषु चतुर्णां वाक्यानां संस्कृतभाषया अनुवादः | 4 |
| (iv) | चित्राधारितं वर्णनम् | 3 |
| (v) | कथाक्रमस्य संयोजनम् (सुपरिचित-कथानाम् क्रमरहितानां षड्वाक्यानाम् क्रमपूर्वकं संयोजनम्) | 3 |

# विषयानुक्रमणी

**१. पठितावबोधनम्**

| पाठः | पाठ-नाम | ग्रन्थः / लेखकः | पृष्ठाङ्काः |
|---|---|---|---|
| प्रथमः पाठः | जय सुरभारति! | मधुच्छन्दा : डॉ. हरिरामाचार्यः | १ |
| द्वितीयः पाठः | संघे शक्तिः | हितोपदेशः : नारायणपण्डितः | ४ |
| तृतीयः पाठः | स्वराष्ट्र-गौरवम् | नानाग्रन्थेभ्यः | ९ |
| चतुर्थः पाठः | जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये | अभिज्ञानशाकुन्तलम् : कालिदासः | १७ |
| पञ्चमः पाठः | वाक्केलिः | प्रकीर्ण-पद्यानि | २३ |
| षष्ठः पाठः | महाराणा प्रतापः | संकलितम् | २९ |
| सप्तमः पाठः | लोकहितं मम करणीयम् | संस्कृत-गीतम् : डॉ. श्रीधरभास्कर वर्णेकरः | ३५ |
| अष्टमः पाठः | कर्मयोगी स्वामी केशवानन्दः | डॉ. विक्रमजीतः | ३९ |
| नवमः पाठः | भारत-वैभवम् | भारत-भारती-वैभवम् : श्रीजी महाराजः | ४७ |
| दशमः पाठः | सुभाषित-रत्नानि | नानाग्रन्थेभ्यः | ५० |
| एकादशः पाठः | स्वदेशं कथं रक्षेयम् | एकाङ्क-नाट्यम् : डॉ. नारायणशास्त्री कांकरः | ५८ |
| द्वादशः पाठः | मरुसौन्दर्यम् | हरनामामृतम् : पं. विद्याधरः शास्त्री | ६४ |
| त्रयोदशः पाठः | महाराजः सूरजमल्लः विजयते | डॉ. विक्रमजीतः | ७१ |
| चतुर्दशः पाठः | यो यद्वपति बीजं हि लभते तादृशं फलम् | पञ्चतन्त्रम् : पं. विष्णु शर्मा | ७५ |
| पञ्चदशः पाठः | आचार्योपदेशः | उपनिषदः | ८० |

**२. अपठितावबोधनम्** ८३

**३. व्याकरणम्** ९३-१४८

| | | | |
|---|---|---|---|
| (क) सन्धिः | ९३ | (ख) समासः | १०७ |
| (ग) कारकम् | ११४ | (घ) प्रत्ययः | १२६ |
| (ङ) अव्ययम् | १३५ | (च) वाच्य-परिवर्तनम् | १३८ |
| (छ) समय-लेखनम् | १४२ | (ज) अशुद्धि-शोधनम् | १४६ |

**४. रचनात्मकं कार्यम्** १४९-१५८

| | | | |
|---|---|---|---|
| (क) पत्र-लेखनम् | १४९ | (ख) संकेताधारितं संवाद-लेखनम् | १५२ |
| (ग) अनुवाद-कार्यम् | १५४ | (घ) चित्राधारितं वर्णनम् | १५५ |
| (ङ) कथाक्रम-संयोजनम् | १५६ | | |

# प्रथमः पाठः

वाणी-वन्दना-गीतिः इयम्। सरला सरसा च सरस्वती-वन्दना-गीतिरियम् कविपुंगवेन डॉ. हरिरामाचार्येण विरचिता वर्तते। १९६६ तमे ईस्वीये वर्षे रचिता, वसन्तबहार-रागेण उपनिबद्धा, 'मधुच्छन्दा' इत्याख्य-ग्रन्थे संकलिता लोके बहुश्रुता च इयं गीतिः वस्तुतः कवेः आद्या गीतिरचना आसीत् या हि बहुत्र प्रकाशिता, आकाशवाणी-दूरदर्शनाभ्यां च चिरं प्रसारिता प्रचारिता च।

## जय सुरभारति!

**जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः।**
**नाद-ब्रह्ममयि जय वागीश्वरि! शरणं ते गच्छामः ।।१।।**

**त्वमसि शरण्या त्रिभुवनधन्या,**
**सुर-मुनि-वन्दित-चरणा।**
**नवरस-मधुरा कविता-मुखरा,**
**स्मित-रुचि-रुचिराभरणा ।।२।।**

**आसीना भव मानस-हंसे**
**कुन्द-तुहिन-शशि-धवले!**
**हर जडतां कुरु बोधि-विकासं**
**सित-पङ्कज-तनु-विमले! ।।३।।**

**ललित-कलामयि ज्ञान-विभामयि**
**वीणा-पुस्तक-धारिणि!**
**मतिरास्तान्नो तव पद-कमले**
**अयि कुण्ठा-विष-हारिणि! ।।४।।**

**जय जय हे!**

## शब्दार्थाः

**भगवति**- हे देवि! 'भगवती' शब्दस्य सम्बोधने रूपम्। **सुरभारति**- हे शब्दस्य अधिष्ठात्रि देवि! 'सुरभारती' शब्दस्य सम्बोधने रूपम्। **नादब्रह्ममयि**- हे शब्दब्रह्मयुक्ते! 'नादब्रह्ममयी' इति शब्दस्य सम्बोधने रूपमिदम्। **वागीश्वरि**- हे वाग्देवि, हे वाचाम् ईश्वरि! (हे वाणी की स्वामिनी!) 'वागीश्वरी' इति शब्दस्य सम्बोधने रूपम् इदम्। **शरण्या**- शरणदात्री, आश्रयभूता, प्ररक्षिका। **त्रिभुवनधन्या**- त्रिलोके धन्या (श्रेष्ठा)। **सुरमुनिवन्दितचरणा**- सुरैः (देवैः) मुनिभिश्च वन्दितौ चरणौ यस्याः सा (बहुव्रीहिः समासः)। देवों और मुनियों द्वारा पूजित चरणों वाली। **नवरसमधुरा**- नवरसैः मधुरा (माधुर्यदायिनी, सुखदा)। शृङ्गारः, हास्यं करुणः, रौद्रः, वीरः, भयानकः, वीभत्सः, अद्भुतं, शान्तः च - एते नव (नौ) काव्यरसाः। **कविता-मुखरा**- कविता-द्वारा मुखरा (शब्दायमाना)। कविता से मुखरित। **स्मितरुचिरुचिराभरणा**- स्मितरुचिः मन्दहासयुक्ता छविः, तदेव रुचिरं सुन्दरम् आभरणम् आभूषणं यस्याः सा तादृशी। मन्द हँसीयुक्त छविरूपी आभूषण वाली। **आसीना भव**- उपविष्टा भव, बैठो, विराजो। **मानस-हंसे**- 'मानस' सरोवरस्थे हंसे, मम मनोरूपिणे हंसे वा। मानसरोवर के हंस पर अथवा मेरे मानस-रूपी हंस पर। **कुन्द-तुहिन-शशि-धवले**- हे कुन्द-हिम-चन्द्रवत् शुभ्रे! हे चमेली, बर्फ व चन्द्रमा के समान धौले वर्ण वाली! **जडताम्**- मन्दताम्, अज्ञानम्। **बोधि-विकासम्**- ज्ञानस्य विकासम्। **हर**- दूरीकुरु। **सितपंकजतनुविमले**- सितपंकजं श्वेतकमलम्, तद्वत्, तनु-विमला रम्या पवित्रा च या, तत्सम्बोधने। श्वेतकमल (पुण्डरीक) के समान सुन्दर व पवित्र हे सरस्वति! **ललितकलामयि**- हे ललित कलाभिः समन्विते। हे ललितकलाओं से युक्त! **ज्ञानविभामयि**- हे ज्ञान-कान्ति-युक्ते! **पद-कमले**- चरण-कमले। **मतिरास्तान्नो**- नः (अस्माकं) मतिः (बुद्धिः) आस्ताम् (उपविष्टा स्यात्)। हमारी बुद्धि रहे।

**टिप्पणी**- 'मतिरास्तान्नो तव पद-कमले' (मतिः+आस्ताम्+नः)- अत्र वस्तुतः व्याकरणदृशा '**मतिरास्तान्नस्तव**' इति सन्धिः स्यात्।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. निम्नलिखितेषु पदेषु सम्बोधनपदं नास्ति —

(अ) भगवति (आ) सुरभारति

(इ) वागीश्वरि (ई) मानसहंसे ( )

२. अस्यां वन्दनायाम् आहत्य कति सम्बोधन-पदानि सन्ति —

(अ) सप्त (आ) अष्टौ

(इ) दश (ई) त्रीणि ( )

३. अस्यां गीत्यां कस्याः वन्दना विधीयते —

(अ) वाग्देव्याः (आ) दुर्गायाः

(इ) भारतमातुः (ई) ललितकलायाः ( )

४. 'वागीश्वरी' इत्यत्र सन्धिविच्छेदः अस्ति —

(अ) वाक्+ईश्वरी (आ) वाग+ईश्वरी

(इ) वागी+श्वरी (ई) वागी+इश्वरी ( )

**लघूत्तरात्मक-प्रश्नाः**

१. 'जय जय हे भगवति सुरभारति' इत्यस्याः गीतेः रचयिता कोऽस्ति?

२. कति काव्यरसाः सन्ति? केषाञ्चन त्रयाणां रसानां नामानि लिखन्तु।

३. 'मानस-हंसः' इत्यस्य किं अर्थद्वयं कर्तुं शक्यते?

४. 'सितपङ्कजम्' इत्यस्य पर्यायशब्दत्रयं लिखन्तु।

**निबन्धात्मक-प्रश्नाः**

१. ''आसीना भव.....विमले।'' इति पद्यं हिन्दीभाषया अनूद्यताम्।

२. ''त्वमसि शरण्या.....रुचिराभरणा।'' इति पद्यं संस्कृतेन व्याख्यायताम्।

**प्रयोगात्मक-कार्यम्**

इयं वन्दना गीतिः You tube इत्यादि-स्थलेषु उपलभ्यते। ततः श्रुत्वा, अभ्यासं च कृत्वा विद्यालये यथावसरं प्रयोगः करणीयः।

## उत्तर-माला

**वस्तुनिष्ठ-प्रश्नाः**

१. (ई) २. (इ) ३. (अ) ४. (अ)

# द्वितीयः पाठः

*नीतिकथासाहित्ये हितोपदेशः अन्यतमः ग्रन्थः। एवं हि श्रूयते — नारायण शर्मा नामा पण्डितः पाटलिपुत्राधिपतेः सुतान् नीतिशास्त्रं बोधयितुमिमं ग्रन्थं रचयामास। स्व-मनोज्ञ-प्रवाहमय-शैल्याः अयं ग्रन्थः लोकेषु अतिप्रसिद्धिम् अवाप। सरस-सरल-भाषया अस्मिन् ग्रन्थे पञ्चतन्त्रादिग्रन्थानाधारीकृत्य पशुकथानां संग्रहोऽस्ति। हितोपदेशस्य चत्वारः परिच्छेदाः उपलभ्यन्ते- १. मित्रलाभः २. सुहृद्भेदः ३. विग्रहः ४. सन्धिश्च।*

*प्रस्तुतोऽयं पाठः 'मित्रलाभ' परिच्छेदस्य प्रथम-कथायाः सम्पादितोंऽशो विद्यते। अस्मिन् पाठे गुरूणाम् अवज्ञायाः एकीभूयकृतप्रयासस्य च फलं वर्णितम् अस्ति। चित्रग्रीवस्य अवज्ञां कृत्वा कपोताः जालबद्धाः सञ्जाताः। पुनश्च चित्रग्रीवस्य उपदेशेन एकचित्तीभूय संहतिमाश्रित्य जालमादाय एव उड्डिताः। एषः एव पाठस्य उपदेशः — 'संघे शक्तिः' इति वा 'संहतिः कार्यसाधिका' इति वा।*

## संघे शक्तिः

अस्ति गोदावरी तीरे विशालः शाल्मलीतरुः। नानादिग्देशादागत्य रात्रौ पक्षिणो तत्र निवसन्ति। अथ कदाचिद् अवसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनक नामा वायसः प्रबुद्धः, कृतान्तमिव द्वितीयम् आयान्तं व्याधम् अपश्यत्। तम् अवलोक्य अचिन्तयत्–''अद्य प्रातरेव अनिष्टदर्शनं जातम्, न जाने किम् अनभिमतं दर्शयिष्यति।'' अतः तदनुसरणक्रमेण व्याकुलश्चलितः।

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम्। स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पन् तान् तण्डुलकणान् अवलोकयामास (अपश्यत्)। ततः कपोतराजः तण्डुलकणलुब्धान् कपोतान् प्रति आह (अकथयत्) ''कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि। सर्वथा अविचारितं कर्म न कर्त्तव्यम्''। एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् आह (अकथयत्) —

**ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशंकितः।**
**परभाग्योपजीवी च षडेते दुःख-भागिनः।।**

तत् श्रुत्वा कपोतराजस्य शङ्कां च अनादृत्य सर्वे कपोतास्तत्रोपविष्टाः। अनन्तरं सर्वे जालेन बद्धाः बभूवुः। ततो यस्य वचनात् तत्र अवलम्बितास्तं सर्वे तिरस्कुर्वन्ति। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच– ''नायमस्य दोषः। विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्।

इदानीमप्येवं क्रियताम्। सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्।'' इति विचिन्त्य सर्वे पक्षिणः जालमादायोत्पतिताः। अनन्तरं स व्याधः सुदूराज्जालापहारकान् तान् अवलोक्य पश्चाद् धावनम् अकरोत्। ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः। अत एव उच्यते–

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैः गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः।।**

## शब्दार्थाः

**नानादिग्देशाद्** — विविध-क्षेत्रेभ्यः (विविध दिशाओं और देशों से)। **पक्षिणः** — खगाः (पक्षियों का समूह)। **अवसन्नायाम्** — समाप्तौ (समाप्त होने पर)। **अस्ताचलचूडावलम्बिनि** — अस्ताचल-शिखरं गच्छति (अस्ताचल के शिखर पर अवलम्बित)। **प्रबुद्धः** — जागरितः (जग गया)। **कृतान्तम् इव** — यमम् इव (यमराज के समान)। **द्वितीयम्** — अपरम् (दूसरा)। **आयान्तम्** — आगच्छन्तम् (आते हुए को)। **व्याधम्** — लुब्धकम् (शिकारी को)। **अवलोक्य** — दृष्ट्वा (देखकर)। **अनिष्टदर्शनम्** — पापदर्शनम् (पापदर्शन, अपशकुन)। **अनभिमतम्** — अनिष्टम् (अनिष्ट)। **व्याकुलः** — व्यग्रः (व्याकुल)। **विकीर्य** — प्रक्षिप्य (बिखेर कर)। **विस्तीर्णम्** — प्रसारितम् (फैला दी)। **प्रच्छन्नःभूत्वा** — (छिपकर)। **वियति** — आकाशे (आसमान में)। **विसर्पन्** — उड्डयन् (उड़ते हुए)। **सपरिवारः** — परिवारेण सहितः (परिवार सहित)। **तण्डुलकणलुब्धान्** — तण्डुलकणान् प्रति लोभयुक्तान् (चावल के टुकड़ों के प्रति लोभयुक्त मन वाले)। **निर्जने** — जनहीने (जन रहित)। **निरूप्यताम्** — निश्चयं कुर्वन्तु (निश्चय कीजिये)। **भद्रम्** — कल्याणम् (कल्याण)। **सदर्पम्** — गर्वपूर्वकम् (अहंकार युक्त)। **ईर्ष्यी** — ईर्ष्यावान् (ईर्ष्या रखने वाला)। **घृणी** — घृणावान् (घृणा करने वाला)। **असंतुष्टः** — असंतोषी (संतोषहीन)। **नित्यशंकितः** — नित्यसंदेहयुक्तः (सदा शंकालु)। **परभाग्योपजीविनः** — पराश्रिताः (दूसरों के भाग्य पर जीवित रहने वाले)। **अवलम्बिताः** - जालबद्धाः (जाल में बंध गये)। **तिरस्कुर्वन्ति** — अपमानं कुर्वन्ति (अपमान करने लगे)। **विपत्काले** — विपत्तौ (विपत्ति में)। **अवलम्ब्य** — अवधार्य/धृत्वा (अवलम्बन लेकर/धारण करके)। **प्रतीकारः** — निवारणोपायः, समाधानम् (समाधान)। **एकचित्तीभूय** — सम्मिल्य (एक मन वाले होकर/मिलकर)। **आदाय** — नीत्वा/गृहीत्वा (लेकर)। **संहतिः** — उद्देश्यपूर्णसमूहः (उद्देश्य से युक्त समूह/संगठन)। **आपन्नैः** — प्राप्तैः (प्राप्त हुए)। **मत्तदन्तिनः** — मत्तहस्तिनः (मदमस्त हाथी)।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. वायसः कीदृशं व्याधम् आयान्तम् अपश्यत् —

(अ) कृतान्तमिव द्वितीयम्    (आ) मितभाषिणम्
(इ) अनिष्टदर्शनम्    (ई) अनभिमतम्    ( )

२. कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः इति कः उक्तवान् —

(अ) लघुपतनकः (आ) चित्रग्रीवः

(इ) व्याधः (ई) हिरण्यकः ( )

३. विपत्काले कापुरुषस्य लक्षणमस्ति —

(अ) विस्मयः (आ) धैर्यम्

(इ) उत्साहः (ई) प्रतीकारः ( )

४. अल्पानामपि वस्तूनां कार्यसाधिका अस्ति —

(अ) संहतिः (आ) उपयोगः

(इ) अभावः (ई) समभावः ( )

**अतिलघूत्तरात्मक-प्रश्नाः**

१. वायसस्य नाम किम्?

२. वायसः कम् आयान्तम् अपश्यत्?

३. कः कपोतराजः?

४. कीदृशैः तृणैः मत्तदन्तिनः बध्यन्ते?

**निबन्धात्मक-प्रश्नाः**

१. कथायां वर्णितं व्याधकृत्यं स्वशब्देषु लिखत।

२. चित्रग्रीवः कपोतान् किम् अवबोधयत्?

३. कपोताः कथं सिद्धिं प्राप्तवन्तः?

४. चित्रग्रीवं अवहेलयन् कपोतः सदर्पं किम् उक्तवान्?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (अ) २. (आ) ३. (अ) ४. (अ)

**लघूत्तरात्मक-प्रश्नाः**

१. लघुपतनकः २. व्याधम् ३. चित्रग्रीवः ४. गुणत्वमापन्नैः।

**व्याकरणप्रश्नाः**

१. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| निवसन्ति | वस् | लट् | प्रथमः | बहुवचनम् |
| अपश्यत् | .......... | .......... | .......... | ........... |
| दर्शयिष्यति | .......... | .......... | .......... | ........... |
| पश्यामि | .......... | .......... | .......... | ........... |

| | | | | |
|---|---|---|---|---|
| बभूवुः | .......... | .......... | .......... | ........... |
| उवाच | .......... | .......... | .......... | ........... |
| अकरोत् | .......... | .......... | .......... | ........... |

२. अधो-लिखितेषु पदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत —

| **पदम्** | **शब्दः** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|
| तीरे | तीर | सप्तमी | एकवचनम् |
| पक्षिणः | .......... | .......... | .............. |
| चन्द्रमसि | .......... | .......... | .............. |
| तस्मिन् | .......... | .......... | .............. |
| व्याधेन | .......... | .......... | .............. |
| वने | .......... | .......... | .............. |
| सर्वे | .......... | .......... | .............. |

३. निम्नलिखितेषु शब्देषु सन्धि-नामनिर्देशसहितं सन्धि-विच्छेदं प्रदर्शयत —

| **पदम्** | **सन्धि-विच्छेदः** | **सन्धिनाम** |
|---|---|---|
| कुतोऽत्र | .................... | .................. |
| व्याकुलश्चलितः | .................... | .................. |
| अप्येवम् | .................... | .................. |
| प्रतीकारश्चिन्त्यताम् | .................... | .................. |
| सर्वैरेकचित्तीभूय | .................... | .................. |
| सुदूराज्जालापहारकान् | .................... | .................. |

४. अधस्तनेषु पदेषु नामनिर्देशसहितम् समासविग्रहो विधेयः —

| | **पदम्** | **समासविग्रहः** | **समासनाम** |
|---|---|---|---|
| उदा. | गोदावरीतीरे | गोदावर्य्याः तीरे | षष्ठीतत्पुरुषः |
| | अनिष्टदर्शनम् | .................... | .................. |
| | अनभिमतम् | .................... | .................. |
| | सपरिवारः | .................... | .................. |
| | निर्जनम् | .................... | .................. |
| | मत्तदन्तिनः | .................... | .................. |
| | अविचारितम् | .................... | .................. |

५. निम्नलिखितेषु शब्देषु प्रकृतिः प्रत्ययश्च विवेच्यताम् —

| | **पदम्** | **प्रकृतिः** + | **प्रत्ययः** |
|---|---|---|---|
| उदा. | प्रबुद्धः | प्र बुध् + | क्त |

| | |
|---|---|
| जातम् | ............................ |
| विकीर्य | ............................ |
| प्रच्छन्नः | ............................ |
| ईर्ष्यी | ............................ |
| घृणी | ........................... |

६. निम्नलिखितपदानां प्रयोगं स्ववाक्येषु कुरुत–

| | **पदम्** | **वाक्यम्** |
|---|---|---|
| उदा. | रात्रौ | बालकाः रात्रौ पठन्ति। |
| | वायसः | ......................... |
| | चित्रग्रीवः | ......................... |
| | व्याधः | ......................... |
| | असन्तुष्टः | ......................... |
| | प्रतीकारः | ......................... |
| | पक्षिणः | ......................... |

७. सम्यक् विभक्तिं संयोज्य कोष्ठकगतेन पदेन रिक्तस्थानं पूरयत —

उदा. शाल्मलीतरौ **पक्षिणः** निवसन्ति स्म। (पक्षी)

(अ) अवसन्नायां ........... वायसः प्रबुद्धः। (रात्रिः)

(आ) तेन .......... जालं विस्तीर्णम्। (व्याधः)

(इ) कपोतराजः तण्डुलकणलुब्धान् .......... अकथयत्। (कपोतः)

(ई) ........... कपोताः तत्रोपविष्टाः। (सर्व)

(उ) अल्पानामपि .......... संहतिः कार्यसाधिका। (वस्तु)

(ऊ) सः व्याधः जालापहारकान् ........ अवलोक्य पश्चाद्–धावनम् अकरोत्। (तद् )

# तृतीयः पाठः

अस्माकं चिन्तने राष्ट्रस्य अवधारणा अतिप्राचीना विद्यते। वेदेष्वपि **'आ राष्ट्रे राजन्यः'** (यजुर्वेदः), **'वयं राष्ट्रे जागृयाम'** (यजुर्वेदः), **'अहं राष्ट्री संगमनी वसूनाम्'** (ऋग्वेदः) इत्यादिषु बहुषु मन्त्रेषु राष्ट्र-शब्दस्य प्रयोगेन एतत्स्पष्टमस्ति। अस्मदीया राष्ट्रसम्बन्धिनी अवधारणा अर्वाचीना, पश्चिमाच्चागता इति ये मन्यन्ते ते तु वस्तुतः भ्रान्तास्सन्ति।

अस्माकमिदं भारतवर्षमेकं चिरपुरातनं सनातनं च राष्ट्रं वर्तते। किन्त्वत्र ऋषिभिः मुनिभिः कविभिः तत्त्वचिन्तकैश्च केवलं भौतिकं भौगोलिकं राजनैतिकं च घटकमेव राष्ट्रमिति नैव मतम्। राष्ट्रमिति यदुच्यते तदत्रैकं चेतनं सांस्कृतिकं घटकं मतम्। वयमिदं राष्ट्रदेवं मन्यामहे। एतद् वै भारतमस्माकं दृष्टौ न कश्चिद् मृत्पिण्डो वा भूखण्डो वा विद्यते अपितु मातृभूमिरस्ति; यथा किलोक्तमथर्ववेदे- **'माता भूमिः पुत्रोऽहं पृथिव्याः।'** ऋग्वेदेऽपि कथितमस्ति- **'पृथिवी माता द्यौर्मेपिता।'**

मातृभूमिः, पितृभूमिः, पुण्यभूमिः, धर्मभूमिः, कर्मभूमिः, देवभूमिश्च — इत्येवं विविधैः रूपैरुपेतास्ति भुवनमनमोहिनी इयमस्माकं भारतमाता। राष्ट्रसम्बन्धिनः राष्ट्रियतासम्बन्धिनः, राष्ट्रगौरवसम्बन्धिनः, राष्ट्रभक्तिसम्बन्धिनश्च केचन श्लोकाः अस्मिन् पाठे संकलिताः सन्ति।

## स्वराष्ट्र-गौरवम्

**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥ १ ॥**

-विष्णुपुराणम्

**हिमालयात् समारभ्य यावदिन्दुसरोवरम्।**
**तं देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते ॥ २ ॥**

-बृहस्पत्यागमः

**गायन्ति देवाः किल गीतकानि**
**धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते**
**भवन्ति भूयः पुरुषाः सुरत्वात् ॥ ३ ॥**

-विष्णुपुराणम्

**सम्प्राप्य भारते जन्म सत्कर्मसु पराङ्मुखः।**
**पीयूष-कलशं हित्वा विषभाण्डमुपाश्रितः ।। ४ ।।**

–वृहन्नारदीयपुराणम्

**एतद्देश - प्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।। ५ ।।**

–मनुस्मृतिः

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।। ६ ।।**

–अज्ञातम्

**राष्ट्रदृष्टिं नमस्यामो राष्ट्रमङ्गलकारिणीम्।**
**यया विना न पश्यन्ति राष्ट्रं स्वनिकटस्थितम् ।। ७ ।।**

–अमृतवाग्भवाचार्यः

**समानसंस्कृतिमतां यावती पितृ - पुण्यभूः।**
**तावतीं भुवमावृत्य राष्ट्रमेकं निगद्यते ।। ८ ।।**

–तदेव

**पितृभूत्वं पुण्यभूत्वं द्वयं यस्य न विद्यते।**
**तस्य स्वत्वं तत्र राष्ट्रे भवितुं न किलार्हति ।। ९ ।।**

–तदेव

**राष्ट्रस्योत्थानपतने राष्ट्रियानवलम्ब्य हि।**
**भवतस्सर्वदा तस्माच्छिक्षणीयास्तु राष्ट्रियाः ।। १० ।।**

–तदेव

**विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रतिपत्तये।**
**शस्त्रेण रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते ।। ११ ।।**

–चाणक्यः

## अन्वयः

१. यत् समुद्रस्य उत्तरं हिमाद्रेः च एव दक्षिणं, यत्र भारती (नाम) सन्ततिः, तत् भारतं वर्षं नाम।
२. हिमालयात् समारभ्य इन्दुसरोवरं यावत् (यः देशः स्थितः), देवनिर्मितं तं देशं हिन्दुस्थानं प्रचक्षते।
३. देवाः किल गीतकानि गायन्ति (यत्), धन्याः तु ते पुरुषाः सन्ति (ये) स्वर्गापवर्गास्पदमार्गभूते भारतभूमिभागे सुरत्वात् भूयः भवन्ति।
४. भारते जन्म सम्प्राप्य (अपि यो जनः) सत्कर्मसु पराङ्मुखः (भवति, सः) पीयूष-कलशं हित्वा विषभाण्डम् उपाश्रितः।

५. एतद्देशप्रसूतस्य अग्रजन्मनः सकाशात् पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं शिक्षेरन्।
६. (हे) लक्ष्मण! स्वर्णमयी अपि लङ्का मे न रोचते। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी (भवति)।
७. राष्ट्रमङ्गलकारिणीं राष्ट्रदृष्टिं नमस्यामः यया विना स्वनिकटस्थितम् (अपि) राष्ट्रं न पश्यन्ति।
८. समानसंस्कृतिमतां (जनानां) यावती पितृपुण्यभूः, तावतीं भुवम् आवृत्य एकं राष्ट्रं निगद्यते।
९. पितृभूत्वं पुण्यभूत्वं (इति) द्वयं यस्य न विद्यते, तस्य तत्र राष्ट्रे स्वत्वं भवितुं न अर्हति किल।
१०. राष्ट्रियान् अवलम्ब्य हि राष्ट्रस्य उत्थान-पतने भवतः, तस्मात् राष्ट्रियाः तु सर्वदा शिक्षणीयाः।
११. शस्त्रं च शास्त्रं च इति द्वे विद्ये प्रतिपत्तये (स्तः)। शस्त्रेण राष्ट्रे रक्षिते (सति) शास्त्रचर्चा प्रवर्तते।

## शब्दार्थाः

**उत्तरम्**- उत्तरस्यां दिशि। **दक्षिणम्**- दक्षिणस्यां दिशि। **भारती**- भारतीयः। **इन्दुसरोवरम्**- हिन्द महासागर इति। **देवनिर्मितम्**- देवैः निर्मितम्=रचितम्। **प्रचक्षते**- कथ्यते। **गीतकानि**- गीतानि। **स्वर्गापवर्गास्पदमार्गभूते**- स्वर्गस्य अपवर्गस्य= मोक्षस्य च यत् आस्पदं= स्थानं तस्य मार्गभूते=मार्गस्वरूपे। **भारतभूमिभागे**- भारतस्य भू-भागे। **सम्प्राप्य**- लब्ध्वा। **सत्कर्मसु**- सत्कर्मणां विषये। **पराङ्मुखः**- विमुखः, प्रतिकूलः, उपेक्षायुक्तः। **पीयूष-कलशम्**- अमृत-कुम्भम्। **हित्वा**- त्यक्त्वा। **विषभाण्डम्**- विषपात्रम्, विषकुम्भम्। **उपाश्रितः**- आश्रयं प्राप्तः, स्वीकृतवान्। **एतद्देशप्रसूतस्य**- अस्मिन् देशे जातस्य। **अग्रजन्मनः**- श्रेष्ठजनानाम्। **सकाशात्**- सामीप्यात्, पार्श्वात्। **स्वं स्वं चरित्रम्**- स्वस्य निमित्तं योग्यं चरित्रं (गुणव्यवहारादीन्)। **शिक्षेरन्**- शिक्षां प्राप्नुयुः। **न मे रोचते**- मह्यं रामाय नहि रोचते। **गरीयसी**- गुरुतरा, तदपेक्षया महत्त्वपूर्णा। **नमस्यामः**- नमस्कुर्मः। **यावती**- यावत्पर्यन्ता, जितनी। **तावतीम्**- तावत्पर्यन्ताम्, उतनी। **भुवम्**- धरित्रीम्। **आवृत्य**- आवरणं कृत्वा। **निगद्यते**- कथ्यते। **पितृभूत्वम्**- पितृभूमेः भावः, इयं मे पितृभूमिरस्तीति भावः। **मातृभूत्वम्**- मातृभूमेः भावः। **स्वत्वम्**- स्वामित्वम्, स्वामित्वाधिकारः, स्वता। **उत्थानपतने**- उत्थानं च पतनं च। **राष्ट्रियान्**- राष्ट्रनिवासिनः, राष्ट्रस्य अङ्गभूतान् घटकान्। **अवलम्ब्य**- आश्रित्य। **शिक्षणीयाः**- शिक्षयितुं योग्याः। **प्रतिपत्तये**- प्राप्तये, ज्ञानाय। **रक्षिते राष्ट्रे**- राष्ट्रे सुरक्षिते सति।

## सन्धिविच्छेदः

**हिमाद्रेश्चैव**- हिम+अद्रेः+च+एव। **धन्यास्तु**- धन्याः+तु। **जन्मभूमिश्च**- जन्मभूमिः+च। **किलार्हति**- किल+अर्हति। **राष्ट्रस्योत्थानपतने**- राष्ट्रस्य+उत्थानपतने। **भवतस्सर्वदा**- भवतः+सर्वदा। **तस्माच्छिक्षणीयास्तु**- तस्मात्+शिक्षणीयाः+तु।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. भारतवर्षस्य उत्तरस्यां दिशि वर्तते —

(अ) हिमाद्रिः/हिमालयः (आ) विन्ध्याचलः
(इ) समुद्रः/इन्दुसरोवरः (ई) गंगासागरः ( )

२. गायन्ति देवाः किल गीतकानि - इत्ययं श्लोकः कस्माद् ग्रन्थाद् उद्धृतः —

(अ) विष्णुपुराणात् (आ) ऋग्वेदात्
(इ) रामायणात् (ई) वृहन्नारदीयपुराणात् ( )

३. ''अपि स्वर्णमयी लंका'' इत्यादौ कः कं प्रति ब्रूते —

(अ) लक्ष्मणः रामं प्रति (आ) रामः लक्ष्मणं प्रति
(इ) रामः हनुमन्तं प्रति (ई) राम-लक्ष्मणौ सीतां प्रति ( )

४. समानसंस्कृतिमतां जनानां पितृपुण्यभूः किं निगद्यते —

(अ) एकं राष्ट्रम् (आ) एकं राज्यम्
(इ) एको भूखण्डः (ई) पितृभूः पुण्यभूः च ( )

५. राष्ट्रस्य उत्थान-पतनयोः अवलम्बः कः वर्तते —

(अ) राष्ट्रस्य शत्रवः (आ) राष्ट्रियाः
(इ) अराष्ट्रियाः (ई) राष्ट्रस्य मित्राणि ( )

**लघूत्तरात्मक-प्रश्नाः**

१. अधोलिखित-प्रश्नानाम् उत्तराणि दीयन्ताम् —

(क) भारते जन्म लब्ध्वा अपि यो जनः सत्कर्म-पराङ्मुखः भवति, स किं त्यक्त्वा किं प्राप्तुमिच्छति ?
(ख) विद्यायाः प्रकारद्वयं किमस्ति ?
(ग) पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं कस्य सकाशात् शिक्षेरन् ?
(घ) स्वर्गादपि का गरीयसी ?
(ङ) कया विना स्वनिकटस्थमपि राष्ट्रं जनाः न पश्यन्ति ?
(च) राष्ट्रे कस्य स्वत्वं न भवितुं शक्नोति ?
(छ) शास्त्रचर्चा कदा प्रवर्तते ?

२. 'क'-खण्डं 'ख'-खण्डेन सह योजयन्तु —

| क | ख |
|---|---|
| १. भारतम् | राष्ट्रियः |
| २. राष्ट्रम् | हिमाद्रिः |

| | |
|---|---|
| ३. विद्या | भारती |
| ४. हिमालयः | शस्त्रं शास्त्रं च |
| ५. यावती | तस्य |
| ६. यस्य | तावती |

३. अधस्तनपदानां विलोमपदानि पाठात् चित्वा लिखन्तु —

| | |
|---|---|
| १. उत्तरम् | .................. |
| २. लघीयसी | .................. |
| ३. अप्राप्य | .................. |
| ४. उत्थानम् | ................. |
| ५. मरणम् | ................. |
| ६. अनवलम्ब्य | .................. |
| ७. अनावृत्य | .................. |

४. अधस्तन-वाक्येषु स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु —

१. **हिमालयाद्** समारभ्य इन्दुसरोवरं यावत्।

२. धन्यास्तु **ते** सन्ति।

३. **मे** न रोचते।

४. **शस्त्रेण** रक्षिते राष्ट्रे **शास्त्रचर्चा** प्रवर्तते।

५. **जन्मभूमिः** स्वर्गादपि गरीयसी।

**निबन्धात्मक-प्रश्नाः**

१. भारतवर्षस्य भौगोलिक-स्थितिं पठित-श्लोकाधारेण वर्णयन्तु।

२. पठितश्लोकमाधृत्य राष्ट्रस्य परिभाषां लिखन्तु।

३. ''एतद्देशप्रसूतस्य..... सर्वमानवाः'' इति पद्यं हिन्दीभाषया अनूद्यताम्।

४. भारतवर्षस्य प्रशंसायाम् एकं पद्यं लिख्यताम्।

## उत्तरमाला

**वस्तुनिष्ठप्रश्नाः**

१. (अ) २. (अ) ३. (आ) ४. (अ) ५. (आ)

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धेः नामोल्लेखः करणीयः —

| **पदम्** | **विच्छेदः** | **सन्धि** |
|---|---|---|
| १. चैव | ............ | ............ |
| २. धन्यास्तु | ............ | ............ |

| | | |
|---|---|---|
| ३. भवतस्सर्वदा | ............ | ............ |
| ४. जन्मभूमिश्च | ............ | ............ |
| ५. भारतं नाम | ............ | ............ |

२. निम्नलिखितेषु पदेषु प्रत्यय-निर्देशः करणीयः —

| पदम् | प्रत्ययः |
|---|---|
| १. पितृभूत्वम् | पितृभू+............ |
| २. पुण्यभूत्वम् | पुण्यभू+............ |
| ३. स्वत्वम् | स्व+............ |
| ४. शिक्षणीयाः | शिक्ष्+............ |
| ५. आवृत्य | आ+वृत्+............ |
| ६. भवितुम् | भू+............ |
| ७. अवलम्ब्य | अव+लम्ब्+............ |
| ८. हित्वा | हा+............ |
| ९. गरीयसी | गुरु+ईयसुन्=गरीयस्+............ |
| १०. संस्कृतिमताम् | संस्कृति+............ |

३. अधोलिखितानां समस्त-पदानां समास-विग्रहः करणीयः —

| समस्तपदम् | विग्रहः |
|---|---|
| १. हिमाद्रिः | ................ |
| २. देवनिर्मितम् | ................ |
| ३. विषभाण्डम् | ................ |
| ४. उत्थान-पतने | ................ |
| ५ शास्त्रचर्चा | ................ |

४. अधोलिखितेषु पदेषु मूलशब्द-विभक्ति-वचनानां निर्देशः करणीयः —

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| १. समुद्रस्य | .......... | ............ | ............ |
| २. हिमाद्रेः | .......... | ............ | ............ |
| ३. हिमालयात् | .......... | ............ | ............ |
| ४. देशम् | .......... | ............ | ............ |
| ५. पुरुषाः | .......... | ............ | ............ |
| ६. प्रसूतस्य | .......... | ............ | ............ |
| ७. सकाशात् | .......... | ............ | ............ |
| ८. दृष्टिम् | ........... | ............ | ............ |

| | | | |
|---|---|---|---|
| ९. यया | .......... | ............ | ............ |
| १०. यस्य | .......... | ............ | ............ |
| ११. तस्य | .......... | ............ | ............ |
| १२. राष्ट्रे | .......... | ............ | ............ |
| १३. राष्ट्रियान् | .......... | ............ | ............ |
| १४. विद्ये | .......... | ............ | ............ |
| १५. शस्त्रेण | .......... | ............ | ............ |

५. निम्नलिखितेषु पदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुर्वन्तु —

| **पदम्** | **धातुः** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|
| १. गायन्ति | .......... | .......... | .......... | .......... |
| २. भवन्ति | .......... | .......... | .......... | .......... |
| ३. रोचते | .......... | .......... | .......... | .......... |
| ४. पश्यन्ति | .......... | .......... | .......... | .......... |
| ५. विद्यते | .......... | .......... | .......... | .......... |
| ६. अर्हति | .......... | .......... | .......... | .......... |
| ७. भवतः | .......... | .......... | .......... | .......... |
| ८. प्रवर्तते | .......... | .......... | .......... | .......... |

६. अधोलिखित-पदेषु यथानिर्देशं रूपपरिवर्तनं कृत्वा लिखन्तु —

१. समुद्रस्य (सप्तमीविभक्तिः, बहुवचनम्) ...............

२. गायन्ति (लोट्, प्रथमपुरुषः, बहुवचनम्) ...............

३. राष्ट्रम् (षष्ठी विभक्तिः, बहुवचनम्) ...............

४. भारते (षष्ठी विभक्तिः, एकवचनम्) ...............

५. रोचते (लट्, प्रथमपुरुषः, बहुवचनम्) ...............

६. भवन्ति (लृट्, उत्तमपुरुषः, एकवचनम्) ...............

७. निम्नोक्तेषु एकैकं पदमाश्रित्य वाक्यनिर्माणं कुर्वन्तु —

१. यत्र ........................................

२. गायन्ति ........................................

३. चरित्रम् ........................................

४. विना ........................................

५. रोचते ........................................

६. सम्प्राप्य ........................................

७. यावती ........................................

८. उदाहरण-वाक्यमनुसृत्य वाच्यपरिवर्तनं कुर्वन्तु —

| **कर्मवाच्यम्** | **कर्तृवाच्यम्** |
|---|---|
| सज्जनेन धेनुः रक्ष्यते। | सज्जनः धेनुं रक्षति। |
| १. देवैः भारतस्य गीतानि गीयन्ते। | ........................ |
| २. अस्माभिः देशः प्रणम्यते। | ........................ |
| ३. पुण्यात्मना भारते जन्म लभ्यते। | ........................ |
| ४. राष्ट्रभक्तेन राष्ट्रं पूज्यते स्वकर्मणा। | ........................ |
| ५. मया माता वन्द्यते। | ........................ |

**प्रयोगात्मक-कार्यम्**

'गायन्ति देवाः' इति पद्यस्य सस्वर-वाचनं कुतश्चिद् अभ्यस्य कुर्वन्तु।

# चतुर्थः पाठः

*'अभिज्ञानशाकुन्तलम्' न केवलं महाकविकालिदासस्य एव अपितु संस्कृतसाहित्यस्यापि सर्वश्रेष्ठा रचना अस्ति। यथा च केनापि कविना कथितम्–*

***'काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला।'***

*प्रस्तुतनाट्यांशः शाकुन्तलस्य सप्तमाङ्कात् उद्धृतः सम्पादितांश अस्ति। दानवैः सह कृते युद्धे इन्द्रस्य विजयानन्तरं इन्द्रपुरी–अमरावतीतः प्रत्यागच्छन् राजा दुष्यन्तः मार्गे महर्षिमारीचस्य आश्रमे विश्रामं करोति। तत्र बालकस्य सर्वदमनस्य सिंहशिशुक्रीडां व्यवहारचञ्चलतां च दृष्ट्वा तस्य मनसि बालकं प्रति स्वाभाविकम् आकर्षणम् उत्पन्नं भवति। शनैः शनैः, वार्तालाप प्रसंगेन तस्य विश्वासः भवति यत् सर्वदमनः तस्य पुत्र एव। इत्थं कविना अस्मिन् दृश्ये बालकस्य चापल्यं दुष्यन्तस्य च वात्सल्यम् अतीव मनमोहकतया वर्णितम् अस्ति।*

## जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये

(नेपथ्ये)

मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम्?

**राजा** – (कर्णं दत्वा) अभूमिः इयम् अविनयस्य। को नु खल्वेषः निषिध्यते? (शब्दानुसारेण अवलोक्य) (सविस्मयम्) अये, को नु खलु अयम् अनुबध्यमानः तपस्विनीभ्याम् अबालसत्त्वो बालः?

**अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।**
**प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति।।**

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां सह बालः)

**बालः** – जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

**प्रथमा** – अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? हन्त, वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

**द्वितीया** – एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि।

**बालः** – (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि! (इत्यधरं दर्शयति)

**प्रथमा** – वत्स एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

**बालः** – कुत्र? देह्येतत्। (इति हस्तं प्रसारयति)

**द्वितीया** – सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम् मदीये उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति, तमस्योपहर।

**प्रथमा** – तथा। (इति निष्क्रान्ता)

**बालः** – अनेनैव तावत् क्रीडयिष्यामि। (इति तापसीं विलोक्य हसति)

**तापसी** – भवतु, न मामयं गणयति। (पार्श्वमवलोक्य) कोऽत्र ऋषिकुमाराणाम्? (राजानमवलोक्य) भद्रमुख, एहि तावत्! मोचयानेन डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्!

**राजा** – उपगम्य। (सस्मितम्) अयि भो महर्षिपुत्र!

**तापसी** – भद्रमुख! न खल्वयमृषिकुमारः।

**राजा** – आकारसदृशं चेष्टितमेवास्य कथयति। स्थान-प्रत्ययात्तु वयमेवंतर्किणः।
(इति यथाभ्यर्थितमनुतिष्ठति)

**राजा** – (बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः?

**तापसी** – पुरुवंशः।

**राजा** – (आत्मगतम्) कथमेकान्वयो मम? (प्रकाशम्) न पुनरात्मगत्या मानुषाणामेष विषयः।

**तापसी** – यथा भद्रमुखो भणति। अप्सरःसंबन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता।

**राजा** – (अपवार्य) हन्त, द्वितीयमिदमाशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी?

**तापसी** – कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति?

**राजा** – (स्वगतम्) इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि? अथवा अनार्यः परदारव्यवहारः।
(प्रविश्य मृण्मयूरहस्ता)

**तापसी** – सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व!

**बालः** – (सदृष्टिक्षेपम्) कुत्र वा मम माता?

**उभे** – नाम सादृश्येन वञ्चितो मातृवत्सलः।

**द्वितीया** – वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।

**राजा** – (आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि।

**बालः** – मातः! रोचते मे एष भद्रमयूरः। (इति क्रीडनकमादत्ते)

**प्रथमा** – (विलोक्य, सोद्वेगम्) अहो, रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।

**राजा** – अलमावेगेन। नन्विदमस्य सिंहशावकविमर्दात् परिभ्रष्टम्। (इत्यादातुमिच्छति)

**उभे** – मा खल्वेतदवलम्ब्य! कथं? गृहीतमनेन? (इति विस्मयाद् परस्परमवलोकयतः।)

**राजा** – किमर्थं प्रतिषिद्धाः स्मः?

**प्रथमा** – श्रृणोतु महाराजः! एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति।

**राजा** – अथ गृह्णाति?

**प्रथमा** – ततस्तं सर्पो भूत्वा दशति।

**राजा** – भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?

**उभे** – अनेकशः।

**राजा** – (सहर्षम् आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि? (इति बालं परिष्वजते।)

**बालः** – मुञ्च माम्। यावन्मातुः सकाशं गमिष्यामि।

**राजा** – पुत्रक, मया सहैव मातरमभिनन्दिष्यसि।

**बालः** – मम खलु तातो दुष्यन्तः। न त्वम्।

**राजा** – (सस्मितम्) एष विवाद एव प्रत्याययति।

## पदच्छेदः

**अभूमिरियमविनयस्य**–अभूमिः+इयम्+अविनयस्य, **मातुरामर्दक्लिष्टकेसरम्**– मातुः+आमर्द+क्लिष्ट+ केसरम्, **नोऽपत्यनिर्विशेषाणि**– नः+अपत्य+निर्विशेषाणि, **मृत्तिकामयूरस्तिष्ठति**– मृत्तिका+मयूरः+तिष्ठति, **तमस्योपहर**– तम्+अस्य+उपहर, **मामयं**– माम्+अयम्, **पार्श्वमवलोक्य**– पार्श्वम्+अवलोक्य, **खल्वयमृषिकुमारः**– खलु+अयम्+ऋषिकुमारः, **चेष्टितमेवास्य**– चेष्टितम्+एव+अस्य, **प्रत्ययात्तु**– प्रत्ययात्+तु, **यथाभ्यर्थितमनुतिष्ठति**– यथा+अभ्यर्थितम्+अनुतिष्ठति, **चेन्मुनिकुमारोऽयम्**– चेत्+मुनिकुमारः+अयम्, **कथमेकान्वयो**– कथम्+एक+अन्वयः, **अप्सरःसम्बन्धेनास्य**– अप्सरः+सम्बन्धेन+अस्य, **द्वितीयमिदमाशाजननम्**– द्वितीयम्+इदम्+आशाजननम्, **किमाख्यस्य**– किम्+आख्यस्य, **शकुन्तलेत्यस्य**– शकुन्तला+इति+अस्य, **क्रीडनकमादत्ते**– क्रीडनकम्+आदत्ते, **अलमावेगेन**– अलम्+आवेगेन, **नन्विदमस्य**– ननु+इदम्+अस्य, **इत्यादातुमिच्छति**– इति+आदातुम्+इच्छति, **खल्वेतदवलम्ब्य**– खलु+एतद्+अवलम्ब्य, **ततस्तं**– ततः+तम्, **कदाचिदस्याः** – कदाचिद्+अस्याः।

## सन्धि-विच्छेदः

**खल्वेषः**– खलु+एषः, **दन्तांस्ते**– दन्तान्+ते, **भीतोऽस्मि**– भीतः+अस्मि, **इत्यधरं**– इति+अधरम्, **देह्येतत्**– देहि+एतत्, **मार्कण्डेयस्यर्षिकुमारस्य**– मार्कण्डेयस्य+ऋषिकुमारस्य, **अनेनैव**– अनेन+एव, **मोचयानेन**– मोचय+अनेन, **कोऽस्य**– कः+अस्य, **जनन्यत्र**– जननी+अत्र, **देवगुरोस्तपोवने**– देवगुरोः+तपोवने, **कस्तस्य**– कः+तस्य, **पश्येति**– पश्य+इति, **मातुराख्या**– मातुः+आख्या, **नामौषधिरस्य**– नाम+औषधिः+अस्य, **मातापितरावात्मानम्**– मातापितरौ+आत्मानम्, **सहैव**– सह+एव।

## समासः

**अर्धपीतस्तनम्**– अर्धम् असम्पूर्णं पीतः स्तनः येन स, तम्, **आमर्दक्लिष्टकेसरम्**– आमर्देन बलाद् आकर्षणजनितावेगेन क्लिष्टा इतस्ततः विक्षिप्ताः केसराः स्कन्धबालाः यस्य तम्, **सिंहशिशुं**– सिंहस्य

शिशुः तम्।

## कठिन-शब्दार्थाः

**मा** — न। **चापलम्** — चञ्चलताम्। **प्रकृतिम्** — स्वभावम्। **अभूमिः**- अनुचितं स्थानम्। **अविनयस्य** — चञ्चलतायाः। **निषिध्यते** — निवार्यते। **अवलोक्य** — दृष्ट्वा, **सविस्मयम्** — आश्चर्येण सह। **अनुबध्यमानः** — अनुसरणं कृत्वा अवरुध्यमानः। **अबालसत्वः** — असाधारण-शक्तिसम्पन्नः। **अर्धपीतस्तनम्** — येन स्वमातुः दुग्धम् अर्धम् एव पीतम्। **आमर्दक्लिष्टकेसरम्** — आकर्षणेन अस्तव्यस्त-केशम्। **बलात्कारेण** — बलपूर्वकम्। **कर्षति** — आकर्षति/खींचता है। **यथानिर्दिष्टकर्मा** — पूर्वोक्त-कार्य-संलग्नः। **अविनीत** — विनयरहित। **नः** — अस्माकम्। **अपत्यनिर्विशेषाणि** — सन्तानतुल्यानि। **सत्वानि** — प्राणिनः, **विप्रकरोषि**— तुदसि (परेशान कर रहे हो)। **हन्त** — ओह (अव्यय)। **संरम्भः** — क्रोधः। **स्थाने** — उचितमेव। **कृतनामधेयः** — नामयुक्तः। **केसरिणी** — सिंही। **लङ्घयिष्यति** — आक्रमणं करिष्यति। **मुञ्चसि**- त्यजसि। **बलीयः** — अत्यधिकम्। **अधरम्** — ओष्ठम्। **बालमृगेन्द्रम्** — सिंहशिशुम्। **शक्यः** — समर्थः। **वाचामात्रेण** — वाणीमात्रेण। **मदीये** — मम। **उटजे** — कुटीरे। **उपहर** — आनय। **पार्श्वम्** — निकटम्। **एहि** — आगच्छ। **डिम्भलीलया** — बालक्रीडया। **बाध्यमानम्** — पीड्यमानम्। **चेष्टितम्** — क्रियाकलापम्। **स्थानप्रत्ययात्** — स्थानस्य विश्वासात्। **तर्किणः** - चिन्तयन्तः। **यथाभ्यर्थितम्** — यथा-इच्छितम्। **अनुतिष्ठति** — करोति। **चेत्** — यदि। **व्यपदेशः** — वंशः। **अन्वयः** — वंशः, **आत्मगत्या** — स्वेच्छया। **विषयः** — देशः, स्थानम्। **अपवार्य** — मुखम् अपसार्य। **आशाजननम्** — आशाप्रदम्। **किमाख्यस्य** — किं नाम्नः। **धर्मदारपरित्यागिनः** — धर्मपत्न्याः परित्यागिनः। **संकीर्तयितुम्** — उच्चारयितुम्। **अनार्यः** - अशिष्टाचारः, **परदारव्यवहारः** — परस्त्रीचर्चा। **शकुन्तलावण्यम्** — पक्षिणः सौन्दर्यम्। **रम्यत्वम्** — सौन्दर्यम्। **मातुराख्या** — मातुः नाम। **नामधेयसादृश्यानि** — नाम्नःसमानताः। **आदत्ते** — गृह्णाति। **रक्षाकरण्डकम्** — रक्षार्थम् अभिमन्त्रितम् औषधि-सूत्रम्। **परिभ्रष्टम्** — पतितम्। **आदातुम्** — उत्थापयितुम्। **जातकर्मसमये** — संस्कारविशेषसमये। **वर्जयित्वा** — त्यक्त्वा। **विक्रिया** — प्रतिक्रिया। **अनेकशः** — अनेकवारम्। **परिष्वजते** — आलिङ्गनं करोति। **सकाशम्** — निकटम्। **प्रत्याययति** — विश्वासमुत्पादयति।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. बालकः सिंहशिशोः किं गणयितुम् इच्छति —

(क) केशान् (ख) नखान्

(ग) दन्तान् (घ) पादान् ( )

२. बालकस्य किं नाम आसीत्?

(क) रिपुदमनः (ख) दुष्टदमनः

(ग) अरिदमनः (घ) सर्वदमनः ( )

३. तापसी कस्य क्रीडनकम् आनेतुं गच्छति —

(क) मारीचस्य (ख) सर्वदमनस्य

(ग) मार्कण्डेयस्य (घ) दुष्यन्तस्य

४. जातकर्मसमये क: बालकाय अपराजिता-नामौषधिं ददाति?

(क) दुष्यन्त: (ख) मारीच:

(ग) शकुन्तला (घ) मार्कण्डेय: ( )

५. तापसी केन पदार्थेन निर्मितं मयूरम् आनयति?

(क) स्वर्णनिर्मितम् (ख) ताम्रनिर्मितम्

(ग) काष्ठनिर्मितम् (घ) मृत्तिकानिर्मितम् ( )

**लघूत्तरात्मक-प्रश्ना:**

१. बालक: कस्य वंशस्य आसीत्?

२. सर्वदमनस्य मणिबन्धे किम् आबद्धम् आसीत्?

३. बालकस्य पितु: किं नाम आसीत्?

४. बालक: सर्वदमन: कस्य सकाशं गन्तुम् इच्छति?

**निबन्धात्मक-प्रश्ना:**

१. 'अनार्य: परदारव्यवहार:' इति सूक्तिं स्पष्टीकुरुत।

२. बालकस्य सर्वदमनस्य रक्षाकरण्डकस्य कीदृशी विशेषता आसीत्?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्ना:**

१. (ग) २. (घ) ३. (ग) ४. (ख) ५. (घ)

**लघूत्तरात्मक-प्रश्ना:**

१. पुरुवंशस्य २. रक्षाकरण्डकम् ३. दुष्यन्त: ४. मातु: सकाशम्।

**व्याकरणात्मक-प्रश्ना:**

१. निम्नलिखितानां पदानां सन्धिं कुरुत —

(क) खलु+अयम् ..........................

(ख) क:+अस्य ..........................

(ग) एक+अन्वय: ..........................

(घ) मृग+इन्द्रम् ..........................

(ङ) सह+एव ..........................

२. निम्नलिखितानां पदानां प्रकृति-प्रत्ययं निर्दिशत —

| पदम् | प्रकृतिः | + | प्रत्ययः |
|---|---|---|---|
| (क) रम्यत्वम् | .................. | + | .................. |
| (ख) केसरिणी | .................. | + | .................. |
| (ग) जनता | .................. | + | .................. |
| (घ) अपराजिता | .................. | + | .................. |

३. निम्नलिखितानां पदानां वाक्ये प्रयोगं कुरुत —

(क) बालः ..........................................

(ख) अपत्यः ..........................................

(ग) विषयः (देशः) ..........................................

(घ) सर्पः ..........................................

४. निम्नलिखितानां पदानां समासः विधेयः —

| विग्रहः | समस्त पदम् |
|---|---|
| (क) माता च पिता च | .................... |
| (ख) रामश्च कृष्णश्च | .................... |
| (ग) राजा चासौ ऋषिः च | .................... |
| (घ) उद्वेगेन सहितम् | .................... |

# पञ्चमः पाठः

प्रहेलिकां को न जानाति! कं वा जनं नाकर्षयति मनोविनोदकारिणी प्रहेलिका! एषा खलु मनोरञ्जनस्य प्राचीना विधा वर्तते। प्रहेलिका, प्रह्वलिका, उक्ति-वैचित्र्यं, वाक्केलिः इत्यादयः पर्यायशब्दाः सन्ति। प्रायशः विश्वस्य सर्वासु भाषासु प्रहेलिका प्रचलति। आंग्ल-भाषायां प्रहेलिकायाः कृते Puzzle, Riddle इत्यादि-शब्दप्रयोगः प्रसिद्धः।

प्रहेलिकायां प्रश्नः भवति, यस्य उत्तरं श्रोत्रा अन्वेषणीयं भवति। प्रहेलिका द्विविधा भवति - स्वपदोत्तर-प्रहेलिका, अस्वपदोत्तर-प्रहेलिका चेति। स्वपदोत्तर-प्रहेलिकायां पृष्टस्य प्रश्नस्य उत्तरं प्रहेलिकायाः पदेषु एव क्वचित् निहितं भवति। अस्वपदोत्तर-प्रहेलिकायां तु उत्तरं बहिरेव, न तु पदेषु निविष्टम्। प्रहेलिकासु या चमत्कृतिः दृश्यते सा कदाचित् श्लेष-यमकाद्यलंकारमाध्यमेन कदाचित् च सन्धि-समासादिमाध्यमेन उत्पाद्यते।

प्रहेलिकाः न केवलं मनोविनोद-कारिकाः अपितु बौद्धिक-व्यायाम-साधिकाः सन्ति। इयं शाब्दी-क्रीडा अपि, बौद्धिक-क्रीडा चापि विद्यते। संस्कृत-कवयः प्रहेलिका-परम्परां संवर्धितवन्तः। अस्मिन् पाठे काश्चन प्रसिद्धाः प्रहेलिकाः विविधेभ्यः ग्रन्थेभ्यः समाकृष्य प्रस्तूयन्ते। आगम्यतां, पठ्यताम्, आस्वाद्यताम्!

## वाक्केलिः

**कस्तूरी जायते कस्मात्, को हन्ति करिणां कुलम्।**
**किं कुर्यात् कातरो युद्धे, मृगात् सिंहः पलायते ।।१।।**

**भोजनान्ते च किं पेयं, जयन्तः कस्य वै सुतः।**
**कथं विष्णुपदं प्रोक्तं, तक्रं शक्रस्य दुर्लभम् ।।२।।**

**रवेः कवेः किं समरस्य सारं,**
**कृषेर्भयं किं किमदन्ति भृङ्गाः।**
**सदा भयं चाप्यभयञ्च केषां,**
**भागीरथीतीरसमाश्रितानाम् ।।३।।**

**सीमन्तिनीषु का शान्ता, राजा कोऽभूद्गुणोत्तमः।**
**विद्वद्भिः का सदा वन्द्या, अत्रैवोक्तं न बुध्यते ।।४।।**

पानीयं पातुमिच्छामि, त्वत्तः कमललोचने।
यदि दास्यसि नेच्छामि, न दास्यसि पिबाम्यहम् ।।५।।

कं संजघान कृष्णः, का शीतलवाहिनी गङ्गा।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ।।६।।

केशवं पतितं दृष्ट्वा, द्रोणः हर्षमुपागतः।
रुदन्ति कौरवाः सर्वे, हा! हा! केशव केशव ।।७।।

अपदो दूरगामी च, साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च, यो जानाति स पण्डितः ।।८।।

वृक्षाग्रवासी न च पक्षिराजः,
त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी,
जलं च विभ्रन्न घटो न मेघः ।।९।।

नन्दामि मेघान् गगनेऽवलोक्य,
नृत्यामि गायामि भवामि तुष्टः।
नाहं कृषिज्ञः पथिकोऽपि नाहं,
वदन्तु विज्ञाः मम नामधेयम् ।।१०।।

## अन्वयः

१. कस्तूरी कस्मात् जायते? करिणां कुलं कः हन्ति? कातरः युद्धे किं कुर्यात्? मृगात् सिंहः पलायते।
२. भोजनान्ते च किं पेयम्? जयन्तः वै कस्य सुतः? विष्णुपदं कथं प्रोक्तम्? तक्रं शक्रस्य दुर्लभम्।
३. रवेः कवेः समरस्य (च) सारं किम्? कृषेः भयं किम्? भृङ्गाः किम् अदन्ति? केषां च सदा भयम्? केषां च सदा अपि अभयम्? भागीरथीतीरसमाश्रितानाम्।
४. सीमन्तिनीषु शान्ता का? गुणोत्तमः राजा कः अभूत्? विद्वद्भिः सदा का वन्द्या? अत्र एव उक्तं (उत्तरं) न बुध्यते।
५. (हे) कमललोचने! त्वत्तः पानीयं पातुम् इच्छामि। यदि दास्यसि (वितरिष्यसि, दासी+असि), न इच्छामि। (यदि) न दास्यसि (न वितरिष्यसि, न दासी+असि), अहं पिबामि।
६. कृष्णः कं संजघान? शीतलवाहिनी गङ्गा का (अस्ति)? दार-पोषण-रताः के (सन्ति)? कं बलवन्तं शीतं न बाधते?
७. केशवं पतितं दृष्ट्वा द्रोणः हर्षम् उपागतः। कौरवाः सर्वे रुदन्ति, हा केशव! हा केशव!

८. स्पष्टम्।

९. स्पष्टम्।

१०. गगने मेघान् अवलोक्य (अहं) नन्दामि, नृत्यामि, गायामि, तुष्टः (च) भवामि। न अहं कृषिज्ञः, अहं पथिकः अपि न। विज्ञाः मम नामधेयं वदन्तु!

## शब्दार्थाः

**कस्तूरी**- सुगन्धितः द्रव्यविशेषः। **कस्मात्**- कुतः (किससे, कहाँ से)। **जायते**- उत्पद्यते (उत्पन्न होती है)। **करिणाम् कुलम्**- गजानां वंशम् (हस्ति-कुलम्)। **कातरः**- कापुरुषः, भयभीतः (कायर, डरपोक)। **पलायते**- पलायनं करोति, धावति (भाग जाता है)। **भोजनान्ते**- भोजनस्य अन्ते (खाने के बाद)। **पेयम्**- पातव्यम् (पीना चाहिये)। **जयन्तः**- इन्द्रस्य पुत्रः। **सुतः**- आत्मजः, पुत्रः। **विष्णुपदम्**- विष्णोः पदम् (विष्णु का पद)। **प्रोक्तम्**- कथितम् (कहा गया है)। **तक्रम्**- दधि-निर्मितम् पेयम् (छाछ, मट्ठा)। **शक्रस्य**- इन्द्रस्य। **दुर्लभम्**- दुष्प्राप्यम् । **समरस्य**- युद्धस्य। **भृङ्गाः**- भ्रमराः। **अदन्ति**- खादन्ति। **सीमन्तिनीषु**- स्त्रीषु। **अभूत्**- अभवत्। **वन्द्या**- वन्दनीया। **अत्रैवोक्तम्**- अस्मिन् एव श्लोके कथितम्। **बुध्यते**- ज्ञायते। **पानीयम्**- जलम्। **त्वत्तः**- तव हस्ताद्। **दास्यसि**- वितरिष्यसि, तुम दोगी/पिलाओगी अथवा दास्यसि (दासी+असि)-तुम दासी हो। **संजघान**- हतवान्। **वाहिनी**- नदी। **दारपोषणरताः**- दाराणां (पत्नीनां बालानां च) पोषणे लग्नाः। पत्नियों के भरण-पोषण में लगे हुए। **बलवन्तम्**- बलशालिनम् **बाधते**- पीडयति। **केशवम्**- वासुदेवम् अथवा के=जले शवम्=मृतशरीरम्। **द्रोणः**- द्रोणाचार्यः अथवा शवभक्षकः काकः। **हर्षमुपागतः**- (हर्षम् उपागतः)- हर्षं प्राप्तः, हृष्टः। **रुदन्ति**- रोदनं कुर्वन्ति। **कौरवाः**- दुर्योधन-दुश्शासनादयः अथवा शृगालाः। **केशव**- हे वासुदेव! अथवा के=जले, शवः=मृतशरीरः। **अपदो**- चरणरहितः। **अमुखः**- मुखरहितः। **स्फुटवक्ता**- स्पष्टवक्ता। **त्रिनेत्रधारी**- त्र्यम्बकः, तीन आँखों वाला । **शूलपाणिः**- शूली, शिवः। **पक्षिराजः**- गरुडः। **त्वग्वस्त्रधारी**- वल्कलवस्त्रधारी। **जलं बिभ्रत्**- जलं धारयन्। **घटः**- कलशः, घड़ा। **मेघाः** - जलदः, बादल। **अवलोक्य**- दृष्ट्वा। **नन्दामि**- आनन्दम् अनुभवामि। **तुष्टः**- प्रसन्नः । **कृषिज्ञः**- कृषीवलः, कृषकः। **पथिकः**- यात्री, पान्थः। **विज्ञाः**- ये जानन्ति। **नामधेयम्**- नाम।

## सन्धि-विच्छेदः

**भोजनान्ते**- भोजन+अन्ते। **प्रोक्तम्**- प्र+उक्तम्। **कृषेर्भयम्**- कृषेः+भयम्। **चाप्यभयञ्च**- च+अपि+अभयम्+च। **भागीरथीतीरसमाश्रितानाम्**- भा+गिर्+रथी+ईतिः+रसम्+आश्रितानाम्। **कोऽभूद्गुणोत्तमः**- कः+अभूत्+गुण+उत्तमः। **अत्रैवोक्तम्**- अत्र+एव+उक्तम्। **दास्यसि**- दासी+असि। **पिबाम्यहम्**- पिबामि+अहम्। **वृक्षाग्रवासी**- वृक्ष+अग्रवासी। **त्वग्वस्त्रधारी**- त्वक्+वस्त्रधारी। **बिभ्रन्न**- बिभ्रत्+न। **गगनेऽवलोक्य**- गगने+अवलोक्य। **नाहम्**- न+अहम्। **पथिकोऽपि**- पथिकः+अपि।

## प्रहेलिका-समाधानम्

१. कस्तूरीत्यत्र उत्तरम् अन्तिमे चरणे – 'मृगात् सिंहः पलायते' इति। तद्यथा– कस्तूरी कस्मात् जायते? मृगात्। करिणां कुलं को हन्ति? सिंहः। कातरो युद्धे किं कुर्यात्? पलायते।

२. भोजनान्ते इत्यत्रापि उत्तरम् चतुर्थे चरणे– 'तक्रं शक्रस्य दुर्लभम्' इति। तद्यथा– भोजनान्ते किं पेयम्? तक्रम्। जयन्तः कस्य वै सुतः? शक्रस्य। विष्णुपदं कथं प्रोक्तम्? दुर्लभम्।

३. रवेः कवेः इत्यत्र आदौ सप्त प्रश्नाः सन्ति, पश्चात् च चतुर्थे चरणे सर्वेषामेव प्रश्नानाम् एकेनैव समस्तपदेन उत्तरमस्ति–'भागीरथीतीरसमाश्रितानाम्' इति। तदित्थम्– रवेः सारं किम्? भा=कान्तिः, आभा, प्रकाशः। कवेः सारं किम्? गीः=वाणी, भाषा। समरस्य सारं किम्? रथी = वीरः। कृषेर्भयं किम्? ईतिः=अतिवृष्टिः अनावृष्टिः इत्याद्याः। (अतिवृष्टिरनावृष्टिः शलभाः मूषकाः शुकाः। प्रत्यासन्नाश्चराजानः षडेता ईतयः स्मृताः।।) भृङ्गाः किम् अदन्ति? रसम्=पुष्परसम्। केषां सदा भयम्? आश्रितानाम्=पराश्रितानाम्। केषां सदा अभयम्? भागीरथीतीरसमाश्रितानाम् अर्थात् गङ्गातीरे निवसतां सदा अभयम् वर्तते।

| १ | २ | ३ | ४ | ५ | ६ | ७ |
|---|---|---|---|---|---|---|
| भा | गी | रथी | ईती | रसम् | आश्रितानाम् | भागीरथीतीरसमाश्रितानाम्। |

४. सीमन्तिनीषु इत्यादौ प्रत्येकं चरणे यः प्रश्नः, तस्य उत्तरं तस्यैव चरणस्य आद्यन्ताक्षर-मेलनेन लभ्यते। तद्यथा– सीमन्तिनीषु का शान्ता? सीता। राजा कोऽभूद्गुणोत्तमः? रामः। विद्वद्भिः का सदा वन्द्या? विद्या।

५. पानीयम् इत्यस्मिन् पद्ये यण्सन्धेः प्रयोगः दर्शनीयः। सन्धिरहितस्य 'दास्यसि' इति क्रियापदस्य अर्थः विरोधं जनयति परमनन्तरं दासी+असि=दास्यसि इत्येवं यण्सन्धिः वैचित्र्यं चमत्कारं च उत्पादयति।

६. कं संजघान इत्यत्र सभङ्गश्लेषालङ्कारः वैचित्र्यम् उत्पादयति। तदित्थम्– कं संजघान कृष्णः? कंसं जघान। का शीतलवाहिनी गङ्गा? काशी-तल-वाहिनी। के दारपोषणरताः? केदारपोषणरताः= सजलक्षेत्रस्य पोषणकर्त्तारः, कृषकाः। कं बलवन्तं न बाधते शीतम्? कम्बलवन्तम= कम्बलयुक्तम् जनम्।

७. केशवमिति कूटश्लोके वासुदेवं पतितं दृष्ट्वा द्रोणाचार्यः हर्षं प्राप्तः, कौरवाः च रुदन्ति इत्याद्यर्थः यदा असंगतः भवति तदा श्लेषालङ्कार-कारणाद् अपरः अर्थः प्रतीयते। महाभारतयुद्धस्य विभीषिका अत्र वर्णिता; तद्यथा– के अर्थात् जलमध्ये यदा शवस्य प्रवाहः भवति तदा तद्दृष्ट्वा द्रोणः= काकः हर्षं प्राप्नोति। किन्तु ये कौरवाः=शृगालाः भवन्ति तत्र ते तु अतिगभीरे जले गन्तुं न पारयन्ति अतः दूरादेव पश्यन्तः रोदनं कुर्वन्ति इति आशयः।

८. अपदो दूरगामी चेति स्पष्टमेव। अत्रोत्तरं सन्देश-पत्रमिति। समाचारपत्रमित्यपि वक्तुं शक्यम्।

९. वृक्षाग्रवासीत्यपि स्पष्टम्। उत्तरमत्र-नारिकेलफलम्।

१०. नन्दामि इतीदमपि सुस्पष्टम्। उत्तरमस्ति– मयूरः (नीलकण्ठः, शिखी, बर्हिः)।

## अभ्यासः

**वस्तुनिष्ठ-प्रश्नाः**

१. कस्तूरी कस्मात् जायते —

| | | |
|---|---|---|
| (अ) मृगयातः | (आ) मार्गात् | |
| (इ) मृगात् | (ई) मृगात् मार्गात् च | ( ) |

२. भोजनान्ते किं पेयम् —

| | | |
|---|---|---|
| (अ) तक्रम् | (आ) नक्रम | |
| (इ) शक्रम् | (ई) वक्रम् | ( ) |

३. 'भा' कस्य सारम् अस्ति —

| | | |
|---|---|---|
| (अ) रवेः | (आ) कवेः | |
| (इ) समरस्य | (ई) रवेः, कवेः, समरस्य च | ( ) |

४. 'सीमन्तिनीषु का शान्ता'-इत्यस्मिन् वाक्ये आद्यन्ताक्षरौ स्तः —

| | | |
|---|---|---|
| (अ) शान्ता | (आ) सीता | |
| (इ) सीषुता | (ई) सीषुकाता | ( ) |

५. 'त्वं दास्यसि'-इत्यस्य अर्थोऽस्ति —

| | | |
|---|---|---|
| (अ) त्वं वितरिष्यसि | (आ) त्वं दासी असि | |
| (इ) अ, आ इत्युभयमपि | (ई) कश्चिद् अन्यः एवार्थः | ( ) |

६. दासी+असि=दास्यसि- इत्यत्र सन्धिरस्ति —

| | | |
|---|---|---|
| (अ) यण् सन्धिः | (आ) गुणसन्धि | |
| (इ) अयादिसन्धिः | (ई) पूर्वरूपसन्धिः | ( ) |

७. नेच्छामि- इत्यस्य सन्धिविच्छेदः अस्ति —

| | | |
|---|---|---|
| (अ) नेच्छा+मि | (आ) ने+च्छामि | |
| (इ) नच्+इच्छामि | (ई) न+इच्छामि | ( ) |

८. दृष्ट्वा-इत्यस्य व्याकरणं किमस्ति —

| | | |
|---|---|---|
| (अ) दृश्+क्त्वा | (आ) दृक्+क्त्वा | |
| (इ) दृश्+ट्वा | (ई) दृश्+इष्ट्वा | ( ) |

**लघूत्तरात्मक-प्रश्नाः**

१. करिणां कुलं को हन्ति?

२. कति ईतयः? ईतित्रयस्य नामोल्लेखं कुर्वन्तु।

३. समरस्य सारं किमस्ति?

४. पिबाम्यहम्- इत्यस्मिन् कः सन्धिः?

५. द्रोण: हर्षमुपागत:– अत्र द्रोणशब्दस्य अर्थद्वयं किमस्ति?

६. कं बलवन्तं न बाधते शीतम्?

७. कं संजघान कृष्ण: ?

८. संजघान– इत्यत्र क: उपसर्ग: ?

**निबन्धात्मक-प्रश्ना:**

१. ''भोजनान्ते च.....दुर्लभम्।।'' अस्या: प्रहेलिकाया: हिन्द्या विवरणं कुर्वन्तु।

२. ''केशवं पतितं दृष्ट्वा.....केशव केशव।।'' अस्या: प्रहेलिकाया: विवरणं संस्कृतेन क्रियताम्।

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्ना:**

१. (इ) २. (अ) ३. (अ) ४. (आ) ५. (इ) ६. (अ) ७. (ई) ८. (अ)

# षष्ठः पाठः

*भारतवर्षं सहस्राधिकवर्षाणि परतन्त्रम् आसीत्। वैदेशिकपददलिते दास्यदूषिते तस्मिन् काले मुगलवंशीयानां शासने प्रायशो राजानः युद्धं विनैव मुगलसत्ताधीशानाम् आधिपत्यं स्वीकृत्य तानेव जगदीश्वरान् भावयन्ति स्म। तेषां सेवायां बद्धपरिकराः सन्तः स्वदेशरक्षाव्रतविमुखतां भजन्ते स्म। भारतीयाः सर्वथा निराशां परमात्मानञ्च आश्रित्य जीवनं यापयन्ति स्म। तस्मिन्नेव अन्धकारमये कालखण्डे स्वतन्त्रतायाः दीपशिखेव, आत्मगौरवस्य मूर्तिरिव, प्रतापस्य प्रतिमानम् इव महाराणा प्रतापः मेवाड़राज्ये भ्राजते स्म।*

*प्रतापः भारतीयस्वातन्त्र्येतिहासे स्वतन्त्रतायाः अप्रतिमयोद्धारूपेण स्मर्यते। स्वीये पञ्चविंशवर्षात्मके शासनकाले मुगलैः सह अनेकवारं युद्धं कृतवान्। जीवने नैकाभिः विपरीतस्थितिभिः संतप्यमानोऽपि कदापि पराजयं दैन्यं वा न प्रदर्शितवान्।*

*प्रस्तुतः पाठः प्रातः स्मरणीयस्य प्रतापस्य परिचयं ददाति, येन छात्राः तस्य जीवनेन प्रेरणां प्राप्नुयुः।*

## महाराणा-प्रतापः

उत्सर्गपरम्परायाः उद्भवभूमिं, प्रतापस्य पुण्यभूमिं 'मेवाड़' राज्यं को न जानाति ? इदं राज्यं शूराणां शौर्य्येण, यूनाम् आत्माहुत्या, सतीनाञ्च 'जौहर' परम्परया विश्वस्मिन् जगति महतीं प्रसिद्धिम् अलभत। मेवाड़राज्यस्य सिसोदियावंशे बप्पारावल-राणाहमीर-राणासांगा प्रभृति-वीराणां सुदीर्घा परम्परा विद्यते। अस्यामेव परम्परायां महाराणाप्रतापसिंहस्य जन्म विक्रमस्य १५९७ तमे वर्षे (१५४० ईसवीयाब्दे) ज्येष्ठ शुक्लतृतीयायाम् अभवत्। प्रतापः बाल्यकालादेव वीरयोद्धा, कुशलसेनानी, धीरनायकश्च आसीत्। पितुः उदयसिंहस्य अनन्तरं 'प्रतापः' महाराणापदवीं प्राप्य स्ववयसः ३२ तमे वर्षे मेवाडराज्यसिंहासनम् आरूढ़वान्। तस्य राज्याभिषेकः 'गोगुन्दा' ग्रामे अभवत्।

तस्मिन् काले उत्तरभारते मुगलवंशीयानां शासकानां शासनम् आसीत्। राजानः तत्सेवामेव स्वकर्त्तव्यं मन्यमानाः देशरक्षाकर्त्तव्याद् सर्वथा विमुखाः आसन्। मुगलशासकस्य साहाय्यं विधाय आत्मगौरवं मन्यन्ते स्म। शत्रुभिः सह दीर्घकालीनानां युद्धानां कारणेन मेवाड़राज्य-स्थितिः समीचीना न आसीत्। यद्यपि प्रतापस्य पिता महाराणा उदयसिंहः प्रतापी राजा आसीत्, किन्तु परिस्थितिवशात् चित्तौड़ादिस्थानानि आक्रान्तृभिरधिगृहीतानि। अतएव सिंहासनमधिरूढः प्रतापः हस्तच्युतान् प्रमुखदुर्गान् प्राप्तुं चिन्तनमारेभे। प्रथमं सः स्वस्वामिभक्तसामन्तानां स्थानीयभिल्लजनानां च सभाम् आकारितवान्। तत्रैव सः प्रतिज्ञां कृतवान्-

**''यावत् अहं हस्तच्युतान् स्वराज्यभागान् पुनः न प्राप्स्यामि, तावत् सुवर्णपात्रेषु भोजनं न करिष्यामि, राजप्रासादे वासं न करिष्यामि, मृदुतल्पे च शयनं न करिष्यामि।''**

प्रतापस्य राज्यकाले 'अकबर' इति नामकः मुगलशासकः आसीत्। अकबरस्य सेनया सह प्रतापस्य अनेकवारं युद्धम् अभवत्। मुख्ययुद्धं हल्दीघाटीस्थाने अभवत्, अतएव एतत् 'हल्दीघाटीयुद्धम्' इति नाम्ना प्रसिद्धमस्ति। अस्मिन् युद्धे प्रतापः 'चेतक' इति नामकम् अश्वम् आरुह्य बहुशौर्यं प्रदर्शितवान्। प्रतापस्य सेना पर्वतीययुद्धेषु कुशला आसीत्। अतएव मुगलसेनायाः अतिक्षतिः जाता। मुगलसेना स्थानीयजनानां विरोधकारणेन परावर्तिता। अस्मिन् युद्धे प्रतापस्य राज्येऽपि जनक्षतिः धनक्षतिश्च संजाता। तस्य सेनाऽपि धनाभावे विघटिता। परं प्रतापः कदापि पराजयं न स्वीकृतवान्। अरण्यगुहाप्रदेशेषु उषित्वा स्वसंकल्पसिद्धये सैन्यसंग्रहणम् उपाक्रमत। सैन्यसंग्रहणं तत्प्रशिक्षणं च बहुवित्तसाध्यं कार्यम्। महता दारिद्र्येण परितप्यमानस्य प्रतापस्य इदमेव बहुचिन्ताकारणमासीत्। प्रतापस्य चिन्तां विभाव्य 'भामाशाह' नामा कश्चित् श्रेष्ठी किमपि महत्कार्यं कर्तुं कालः समायातः इति भावितवान्। सः प्रतापं निकषा गत्वा उवाच-''प्रभो! अहं भवद्वंशस्य सेवकः, मम हस्ते प्रभूतं धनं विद्यते। तेन भवान् पञ्चविंशतिसहस्रसैनिकान् द्वादशवर्षपर्यन्तं पालयितुं प्रभविष्यति'' इति। तदा प्रतापः उवाच - ''अहं नैतद्धनं स्वीकर्तुं शक्नोमि, एतद् धनं भवता अर्जितमस्ति।'' तदा भामाशाहः प्रावोचत्-''नैतद्धनं परकीयम्। देशरक्षार्थं मया अर्जितमिदं धनं यदि सहायकं भवेत् तर्हि मम जीवनं सार्थकं भविष्यति'' इति। भामाशाहस्य वचनं श्रुत्वा प्रतापस्य मनः असीमसान्त्वनाम् आप्तवान्।

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्, महासैन्यं स रचयामास। तया सेनया च मुगलशासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान्। तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्। तस्मिन् काले 'चावण्ड' स्थानं स्थापत्यकलायाः, ललितकलायाः, वाणिज्यस्य, विद्यायाश्च प्रमुखकेन्द्रम् आसीत्।

अन्ते असावधानतया पादे धनुष्-प्रत्यञ्चाघातेन प्रतापोऽस्वस्थोऽभवत्। १५९७ तमे ईस्वीयाब्दे प्रतापः दिवङ्गतः। प्रतापः महान् सेनानायकः, जननायकः, व्यवस्थापकः, सङ्घटनकर्त्ता च आसीत्। भारतवासिनः अधुनापि तस्य स्वातन्त्र्यप्रेमिणः शौर्यगाथां गायन्ति।

## शब्दार्थाः

**उत्सर्ग-परम्परायाः** — त्याग-परम्परायाः (त्याग की परम्परा की)। **उद्भवभूमिम्** — उत्पत्तिस्थानं (उत्पत्तिस्थान)। **शूराणाम्** — वीराणाम् (वीरों के)। **यूनाम्** — युवकानाम् (युवकों के)। **आत्माहुत्या** — बलिदानेन (बलिदान से)। **जगति** — संसारे (संसार में)। **कुशलसेनानी** — निपुण-सेनापतिः (कुशल सेनापति)। **विमुखाः** — पराङ्मुखाः विरक्ताः वा (विपरीत हुए/विमुख)। **साहाय्यम्** — सहायताम् (सहायता को)। **विधाय** — कृत्वा (करके)। **आक्रान्तृभिः** — आक्रमणकारिभिः (आक्रमणकारियों के द्वारा)। **अधिगृहीतानि** — आत्मवशीकृतानि (अधिगृहीत कर लिये गये)। **आरेभे** — आरब्धवान् (आरम्भ किया)। **भिल्लजनानाम्** — 'भील' नामधेयवनवासिनाम् (भीलों की)। **आकारितवान्** — आहूतवान्

(बुलाई)। **हस्तच्युतान्** — स्वनियन्त्रणात् वियुक्तान् (अपने नियन्त्रण से अलग हुए)। **अतिक्षतिः** — अतिहानिः (अत्यधिक हानिः)। **विघटिता** — विशृंखलिता (बिखर गई)। **अरण्यगुहाप्रदेशेषु** — वनक्षेत्रेषु (गुफा एवं वन के क्षेत्रों में)। **उषित्वा** — निवासं कृत्वा (रहकर)। **उपाक्रमत** — अकरोत् (किया)। **बहुवित्तसाध्यम्** — बहुधनेन साधनीयम् (बहुत धन से सिद्ध होने वाला कार्य)। **परितप्यमानस्य** — संतापितस्य (संतापित का)। **श्रेष्ठी** — वणिक् (सेठ/व्यापारी)। **भावितवान्** — विचारितवान् (विचार किया)। **प्रभविष्यति** — समर्थो भविष्यति (समर्थ होओगे)। **धनुष्प्रत्यञ्चाघातेन** — धनुषः प्रत्यञ्चायाः घातेन (धनुष की प्रत्यञ्चा की चोट से)। **दिवङ्गतः** — स्वर्गलोकं गतवान् (स्वर्गवासी हो गये)।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. 'मेवाड़' राज्यम् उद्भवभूमिरस्ति —

(अ) उत्सर्गपरम्परायाः (आ) शूराणां शौर्य्यस्य
(इ) प्रतापस्य (ई) वीराणाम् ( )

२. महाराणा प्रतापस्य वंशः आसीत् —

(अ) पुण्यवंशः (आ) सिसोदिया
(इ) गुप्तवंशः (ई) मौर्यवंशः ( )

३. मुगलैः सह प्रवृत्तं प्रतापस्य मुख्यं युद्धमासीत् —

(अ) चित्तौड़युद्धम् (आ) उदयपुरयुद्धम्
(इ) हल्दीघाटीयुद्धम् (ई) चावण्डयुद्धम् ( )

४. प्रतापाय कः स्वीयं सम्पूर्णं धनं दत्तवान् —

(अ) चेटकः (आ) उदयसिंहः
(इ) हकीम खाँ सूरि (ई) भामाशाहः ( )

**लघूत्तरात्मकप्रश्नाः**

१. मेवाड़राज्यस्य वीराणां नामानि लिखत?
२. प्रतापस्य जन्म कदा अभवत्?
३. प्रतापस्य शासनकाले कः मुगलशासकः आसीत्?
४. प्रतापः कुत्र स्वराजधानीम् अकरोत्?

**निबन्धात्मकप्रश्नाः**

१. मेवाड़राज्यं केन प्रकारेण विश्वस्मिन् जगति प्रसिद्धिम् अलभत्?
२. मेवाड़राज्यस्य वीरपरम्परायां के के वीराः अभवन्?
३. प्रतापस्य प्रतिज्ञा का?
४. प्रताप-भामाशाहयोः वार्तां स्वशब्देषु लिखत।

## उत्तरमाला

**वस्तुनिष्ठप्रश्नाः**

१. (अ) २. (आ) ३. (इ) ४. (ई)

**व्याकरण-प्रश्नाः**

१. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत —

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| **उदा.** | जानाति | ज्ञा | लट् | प्रथमः | एकवचनम् |
| | अलभत् | ..... | ..... | ..... | ..... |
| | विद्यते | ..... | ..... | ..... | ..... |
| | आरेभे | ..... | ..... | ..... | ..... |
| | करिष्यामि | ..... | ..... | ..... | ..... |
| | आसीत् | ..... | ..... | ..... | ..... |
| | प्राप्स्यामि | ..... | ..... | ..... | ..... |
| | प्रारभत | ..... | ..... | ..... | ..... |
| | गायन्ति | ..... | ..... | ..... | ..... |

२. अधोलिखितेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत —

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| **उदा.** | परम्परायाः | परम्परा | षष्ठी | एकवचनम् |
| | यूनाम् | ..... | ..... | ..... |
| | आत्माहुत्या | ..... | ..... | ..... |
| | बन्धून् | ..... | ..... | ..... |
| | कर्त्तव्यात् | ..... | ..... | ..... |
| | श्रेष्ठी | ..... | ..... | ..... |
| | कलायाः | ..... | ..... | ..... |
| | भारतवासिनः | ..... | ..... | ..... |
| | सेनया | ..... | ..... | ..... |

३. निम्नलिखितेषु प्रकृति-प्रत्यययोः निर्देशं कुरुत —

| | पदम् | प्रकृतिः | + | प्रत्ययः |
|---|---|---|---|---|
| **उदा.** | अलङ्कृत्य | अलम् + कृ | + | ल्यप् (क्त्वा) |
| | प्राप्तुम् | ................. | + | ................ |
| | गृहीतानि | ................. | + | ................ |

| | | | |
|---|---|---|---|
| आकारितवान् | ................. | + | ............... |
| विधाय | ................. | + | ............... |
| जाता: | ................. | + | ............... |
| कृतवान् | ................. | + | ............... |
| अधिरूढ: | ................. | + | ............... |

४. अधोलिखितपदानां समासविग्रहं प्रदर्श्य समास-नामोल्लेखं कुरुत —

| **पदम्** | **समासविग्रहः** | **समासनाम** |
|---|---|---|
| उत्सर्गपरम्पराया: | उत्सर्गस्य परम्पराया: | षष्ठीतत्पुरुष: |
| कुशलसेनानी | ....................... | .............. |
| परिस्थितिवशाद् | ....................... | .............. |
| हस्तच्युतान् | ....................... | .............. |
| सुवर्णपात्रेषु | ....................... | .............. |
| जनक्षति: | ........................ | .............. |
| स्थापत्यकला | ........................ | .............. |
| असावधानतया | ........................ | .............. |
| अरण्य-गुहा-प्रदेशेषु | ........................ | .............. |

५. अधोलिखितान् पदान् आधारीकृत्य वाक्यनिर्माणं कुरुत —

| | **पदम्** | **वाक्यम्** |
|---|---|---|
| **उदा.** | कुशलसेनानी | प्रताप: कुशलसेनानी आसीत्। |
| | राजान: | ................................. |
| | प्रतिज्ञाम् | ................................. |
| | सेनया | ................................. |
| | कुशला | ................................. |
| | सार्थकम् | .................................. |
| | निकषा | .................................. |
| | स्थापत्यम् | .................................. |
| | जननायक: | .................................. |

६. अधोलिखितेषु यथानिर्देशं विभक्तिपरिवर्तनं कुरुत —

| | **पदम्** | **परिवर्तनम्** | **परिवर्तितरूपम्** |
|---|---|---|---|
| **उदा.** | सेनया | (सप्तमी-विभक्ति: एकवचनम्) | सेनायाम् |
| | 1. मम | (चतुर्थी-विभक्ति: एकवचनम्) | .................... |
| | 2. राजान: | (तृतीया-विभक्ति: एकवचनम्) | .................... |

3. तेन (पञ्चमी-विभक्तिः एकवचनम्) ....................
4. श्रेष्ठी (षष्ठी-विभक्तिः एकवचनम्) ....................
5. शत्रुभिः (षष्ठी-विभक्तिः बहुचनम्) ....................
6. कर्त्ता (सप्तमी-विभक्तिः एकवचनम्) ....................

७. उचितपदप्रयोगेण रिक्तस्थानानि पूरयत —

**उदा.** प्रतापः कदापि **पराजयं** न स्वीकृतवान्। (पराजयः)

प्रभो! अहं ......... सेवकः। (भवद्वंशः)

प्रतापस्य सेना .......... कुशला आसीत्। (पर्वतीययुद्धम्)

राजानः .............. सर्वथा विमुखा आसन्। (देशरक्षा कर्त्तव्यः)

प्रतापः हस्तच्युतान् ......... प्राप्तुं चिन्तनमकरोत्। (दुर्गः)

तावत् .......... भोजनं न करिष्यामि। (सुवर्णपात्रम्)

८. अधोलिखितानाम् उत्तराणाम् आधारेण प्रश्ननिर्माणं कुरुत —

**उदा.** प्रश्नः -वीराणां सुदीर्घा परम्परा कस्य विद्यते?

उत्तरम्- मेवाड़राज्यस्य सिसोदियावंशस्य वीराणां सुदीर्घा परम्परा विद्यते।

प्रश्नः ..........................................................................

उत्तरम्- प्रतापस्य जन्म विक्रमस्य १५९७ तमे वर्षे ज्येष्ठशुक्लतृतीयायाम् अभवत्।

प्रश्नः- ..........................................................................

उत्तरम्- प्रतापस्य राज्यकाले 'अकबर' इति नामकः मुगलशासकः आसीत्।

प्रश्नः ..........................................................................

उत्तरम्- प्रतापः हल्दीघाटीयुद्धे बहुशौर्यं प्रदर्शितवान्।

प्रश्नः .......................................................

उत्तरम्- प्रतापाय भामाशाहः प्रभूतं धनं दत्तवान्।

प्रश्नः .................................................

उत्तरम्- प्रतापः 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्।





# सप्तमः पाठः

प्राचीन-काले आभारतं आबालवृद्धं च प्रसृता आसीत् संस्कृतवाणी। अनन्तरं चिरकालं यावद् उत्तरोत्तरं घटमाना इयं क्षीणा जाता। अद्यत्वे पुनरियं किञ्चिद् वर्धमाना दृश्यते। पुरा कदाचिदिह भारते अजस्रं प्रवहन्ती इयं संस्कृतगङ्गा पुनरपि लोकहिताय देवलोकाद् अवतारणीया इति धिया नैके भगीरथाः प्रयत्नवन्तः सन्ति। तेन च चतुर्दिक्षु संस्कृतजगति किञ्चित् स्पन्दनं स्फुरणं वा अवलोक्यते। संस्कृतानुकूलस्य वातावरणस्य निर्माणमारब्धम्। बहुकालादनन्तरं विद्यालयेषु अधीयानाः लघवः बालकाः अपि तत्र तत्र संस्कृतेन सम्भाषणं कुर्वन्तः दृश्यन्ते। बालानाम् आकर्षणाय संस्कृतगीतानि अपि एकः सरलः उपक्रमः। तेन संस्कृतभाषा-संस्कारोऽपि अनायासं जन्यते। विगतेषु केषुचिद् वर्षेषु नानाविधानि नवानि संस्कृतगीतानि रचितानि। पाठेऽस्मिन् अतीव सरलया भाषया सरलया च शैल्या संस्कृतगीतमेकं प्रस्तूयते। आयान्तु, पठन्तु, शृण्वन्तु, अभ्यस्यन्तु, गायन्तु च अतीव सरलं-तरलं-सरसं च गीतमिदम्।

## लोकहितं मम करणीयम्

(हिन्दोलरागः) (आदितालः)

**मनसा सततं स्मरणीयम्**
**वचसा सततं वदनीयम्**
**लोकहितं मम करणीयम्।।** ।। लोकहितं ।।

**न भोगभवने रमणीयम्**
**न च सुखशयने शयनीयम्।**
**अहर्निशं जागरणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

**न जातु दुःखं गणनीयम्**
**न च निजसौख्यं मननीयम्।**
**कार्य - क्षेत्रे त्वरणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

**दुःखसागरे तरणीयम्**
**कष्टपर्वते चरणीयम्।**
**विपत्तिविपिने भ्रमणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

**गहनारण्ये घनान्धकारे**
**बन्धुजना ये स्थिता गह्वरे।**
**तत्र मया सञ्चरणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

-डॉ. श्रीधर भास्कर वर्णेकरः

## शब्दार्थाः

**मनसा**- हृदयेन, चित्तेन (मन के द्वारा)। **सततम्**- निरन्तरम्। **स्मरणीयम्**- स्मरणं कर्त्तव्यम्। **वचसा**- वचनेन, वाण्या। **वदनीयम्**- वक्तव्यम्। **लोकहितम्**- लोकस्य हितम्, लोक-कल्याणम्। **करणीयम्**- कर्त्तव्यम्, करण-योग्यम्। **भोगभवने**- भोगानाम् आवासे-निवासे, भौतिके संसारे। **अहर्निशम्**- अहनि (दिने) च रात्रौ च, रात्रिन्दिवम्, अहोरात्रम्। **जातु**- कदाचित्, कदापि। **कार्यक्षेत्रे**- कर्मक्षेत्रे। **विपिने**- वने। **गहनारण्ये**- गहने-गभीरे अरण्ये-वने। **घनान्धकारे**- निबिडान्धकारे। **गह्वरे**- गर्ते, कन्दरायाम्।

## सन्धिविच्छेदः

गहनारण्ये- गहन+अरण्ये
घनान्धकारे- घन+अन्धकारे

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. अस्माकं करणीयं किमस्ति —
(अ) निर्धनानां साहाय्यम् (आ) रोगिणां सेवा
(इ) ज्ञानस्य धनस्य च दानम् (ई) लोकहितम् ( )

२. अस्माभिः कुत्र न शयनीयम् —
(अ) सुखशय्यायाम् (आ) शरशय्यायाम्
(इ) परशय्यायाम् (ई) तृणशय्यायाम् ( )

३. लोकहिताय कदा जागरणीयम् —
(अ) दिने (आ) रात्रौ
(इ) अहर्निशम् (ई) अन्येषु सुप्तेषु जागरणीयम् ( )

४. कुत्र तरणीयम् —

(अ) दुःखसागरे (आ) दुस्तरसागरे

(इ) सुखसागरे (ई) गंगासागरे ( )

५. अस्मिन् गीते आहत्य कति अनीयर्-प्रत्ययान्तानि (स्मरणीयम् इत्यादीनि) पदानि प्रयुक्तानि-

(अ) दश (आ) पञ्चदश

(इ) षोडश (ई) सप्तदश ( )

**लघूत्तरात्मक-प्रश्नाः**

१. त्वरणीयम् तरणीयम् च इत्यनयोः द्वयो कः अर्थभेदः ?

२. अस्माभिः कुत्र सञ्चरणीयम् ?

३. अधोलिखित-पदानां पर्यायपदं पाठाद् अन्विष्य लिखन्तु —

१. जनकल्याणम् ...............

२. वाण्या ...............

३. चलनीयम् ...............

४. बान्धवाः ...............

५. तमसि ...............

४. स्थूलपदमाधृत्य प्रश्न-निर्माणं कुर्वन्तु —

१. **अहर्निशं** जागरणीयम्।

२. न जातु **दुःखं** गणनीयम्।

३. न **भोगभवने** रमणीयम्।

४. **मनसा** सततं स्मरणीयम्।

५. अधोलिखित-पदेषु मूलधातुं प्रत्ययं च पृथक् कृत्वा लिखन्तु —

| पदम् | धातुः | + | प्रत्ययः |
|---|---|---|---|
| १. स्मरणीयम् | .......... | + | .......... |
| २. करणीयम् | .......... | + | .......... |
| ३. रमणीयम् | .......... | + | .......... |
| ४. जागरणीयम् | .......... | + | .......... |

६. संस्कृतेन वाक्य-निर्माणं (अधोदत्त-पदानि प्रयुज्य) कुर्वन्तु-

१. अहर्निशम् .........................

२. तत्र .........................

३. न जातु .........................

**निबन्धात्मक-प्रश्नाः**

१. 'गहनारण्ये......करणीयम्' इत्यस्य श्लोकस्य हिन्द्या अनुवादः करणीयः।

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (ई) २. (अ) ३. (इ) ४. (अ) ५. (ई)

**परियोजना-कार्यम्**

१. संस्कृत-गीतानां कामपि ध्वनिमुद्रिकां सान्द्रमुद्रिकां वा स्वीकृत्य, अन्तर्जाल-साहाय्यं वा स्वीकृत्य, कस्यचिद् संस्कृत-गायकस्य वा सविधे गत्वा कानिचन गीतानि अभ्यस्य कक्षायां शिक्षकस्य पुरतः प्रस्तोतव्यानि।

२. अस्मिन् गीते 'स्मरणीयम्' इत्यादीनि सप्तदश अनीयर्-प्रत्ययान्तानि पदानि प्रयुक्तानि, तदतिरिच्य नवानि कानिचन दश तादृशानि पदानि प्रयुज्य वाक्य-निर्माणं क्रियताम्। उदाहरणम् - 'अस्माभिः प्रतिदिनं पठनीयम्।'

(अवधेयम् : अस्मिन्नेव पुस्तके अग्रे व्याकरण-भागे अनीयर्-प्रत्यय-विषयकं विवरणं पठनीयम्)

# अष्टमः पाठः

*राजस्थानस्य रत्नगर्भेयं वसुन्धरा धीराणां वीराणां लोकदेवतानां भक्तानां योगिनां तपस्विनां सतीनां सन्तानां च खनिरस्ति। कानि तानि रत्नानि इति केनापि जिज्ञास्यते चेत् तावती भूयसी तेषां संख्या यत् सर्वेषां नामग्रहणमपि न सुकरम्। अस्यामेव भूमौ नातिचिरं जातस्यैकस्य नररत्नस्य स्वामिनः केशवानन्दस्य प्रेरकं जीवनवृत्तमत्र संक्षेपेण प्रस्तूयते।*

## कर्मयोगी स्वामी केशवानन्दः

स्वामिकेशवानन्दस्य जन्म पौषमासे १९४० तमे विक्रम-संवत्सरे (ईस्वी १८८३) राजस्थानस्य सीकर-जनपदे मगलूणा-ग्रामे अभवत्। अस्य पितुर्नाम ठाकुरसी ढाका इति मातुश्च नाम साराँ इत्यासीत्। बाल्ये केशवानन्दस्य नाम 'बीरमा' इत्यासीत्। यदा एषः बालः सप्तवर्षकल्पः आसीत् तदैव उष्ट्रमेकमाश्रित्य रतनगढ़-स्थले जीवनयापनं कुर्वन्नस्य पिता दिवङ्गतः।

पितुः प्रयाणात् प्रागेव विपन्नतायां श्रेष्ठिगृहेषु गोधूमादि-पेषणं पात्रमार्जनम् इत्येवमादिभिः कार्यैः यथाकथञ्चित् काल-यापनं कुर्वती अस्य बालस्य वराकी माता इदानीं वैधव्य-कारणाद् इतोऽपि विपदाभिभूता अभवत्, उच्यते हि – '**छिद्रेष्वनर्थाः बहुलीभवन्ति।**' इदानीं मातुः सहयोगाय बीरमा-बालकेन गोचारण-कार्यमारब्धम्। तदानीन्तनः दीन-हीनः ग्रामीणः कृषकवर्गः श्रमिकवर्गश्च सामन्तानां, राज्ञां (नवाब-संज्ञकानां वा), वैदेशिकानां च शासकानां त्रिविधे दासता-पञ्जरे आबद्धः आसीत्। रौरव-नरकप्रायं हि तेषां जीवनमासीत्। अयं पुनः '**गण्डस्योपरि पिटकः**' संवृत्तः यत् भयङ्करो दुर्भिक्षकालः समापन्नः। 'छप्पनियाँ अकाळ' इति कुख्याते वि.सं. १९५६ तमस्य तस्मिन् दारुणे दुर्भिक्षे प्राणधारणमपि दुर्भरमासीत्। चतुर्दिक्षु जलं नैव, अन्नं नैव, तृणं नैव। आसीत् केवलं क्षुत्पिपासयोः अखण्डं साम्राज्यं, प्राणिनामार्तनादश्च। शमीवृक्षाणां त्वचं भरुट-संज्ञकं घासं च खादित्वा मनुष्याः यथाकथञ्चित् प्राणान् रक्षितवन्तः। पशवः प्रायः काल-कवलिताः। एतौ मातापुत्रौ अपि जनपदात् जनपदं ग्रामात् ग्रामं च अटन्तौ आस्ताम्। अस्मिन्नेवान्तरे सततं दुर्भिक्ष-प्रतारणैः जर्जरिता बलवदस्वस्था च वीरमा-जनन्यपि षोडशवर्षदेशीयम् इमं किशोरम् एकलं विहाय दिवं प्रयाता।

तदनन्तरम् एकलोऽपि सन् असार-संसार-दुःखदावानल-द्वितीयः क्षुत्पिपासार्दितः बीरमा उत्तरस्यां दिशि अज्ञाते पथि आहिण्डमानः पञ्जाबे फिरोजपुरं प्राप्तः। तत्र केनापि कृपालुना आर्यसमाजस्य अनाथालये प्रवेशितोऽयं बीरमा रोटिकायाः अक्षरज्ञानस्य च युगपत् दर्शनम् इदम्प्रथमतया अकरोत्। अयमेव एकस्य पशुचारकस्य महापुरुषत्वं प्रति यात्रायाः प्रस्थानबिन्दुरासीत्। अत्र तस्य हृदि संस्कृताध्ययनेच्छा अङ्कुरिता।

जिज्ञासिते सति कथितं यद् जाटस्य तव संस्कृतं क्व सुलभम्? संस्कृतमिच्छसि चेत् साधुर्भव! तदनु १९६१ तमे वैक्रमाब्दे (१९०४ ई.) फाजिल्का-नगरे संस्कृतमध्येतुं उदासी-सम्प्रदायस्य स्वामिकुशलदासस्य शिष्यत्वं साधुत्वं च अङ्गीकृतम्। तत्र गुरुमुखीलिप्यां, गुरुग्रन्थसाहिब-इत्यस्य पठने च पाटवमधिगतम्। आगामिनि वर्षे प्रयागे कुम्भमेलायामेकेन महात्मना 'स्वामिकेशवानन्दः' इति नाम दत्तम्। गुर्वाज्ञया संस्कृताध्ययनाय हरिद्वारे अमृतसरे चाप्युषितम्। देशाटनं कुर्वता स्वामिना नगराणां, तीर्थानां, मन्दिराणां, मठानाम्, आश्रमाणां, विद्यालयानां, विश्वविद्यालयानां, पुस्तकालयानां, संग्रहालयानां, वनानां, पर्वतानां, नदीनाम्, ऐतिहासिक-स्थलानां च अध्ययनमपि कृतम्।

स्वशिष्यस्य गुण-गण-महिम्ना परमप्रीतः गुरुः कुशलदासः स्वजीवितकाले एव आश्रमस्य स्वामित्वं केशवानन्दाय दत्तवान् गुरुपीठे च तं प्रतिष्ठापितवान्। '**परोपकाराय सतां विभूतयः**' इति धिया समृद्धमठस्य विभूतीनामुपयोगं विधाय उर्दू-प्रधाने फाजिल्का-अबोहर-क्षेत्रे राष्ट्रभाषायाः प्रचारकार्यमारब्धम्। आदौ तावद् आश्रमे एव 'वेदान्त पुष्पवाटिका' इत्याख्य-सार्वजनिक-हिन्दी-पुस्तकालयस्य वाचनालयस्य च प्रारम्भः कृतः। पश्चात्तत्रैव एका संस्कृत-पाठशालाऽपि स्थापिता। अबोहर-नगरे 'नागरी-प्रचारिणीसभा' प्रारब्धा। जनसहयोगेन 'साहित्य-सदनम्, अबोहर' इत्याख्या संस्थापि आरब्धा या हि रविन्द्रनाथठाकुरस्य शान्तिनिकेतनोपमासीत्, यन्माध्यमेन च ग्राम्यक्षेत्रेषु २५ विद्यालयानां, चलपुस्तकालयस्य, सत्साहित्य-प्रकाशनाय 'दीपक-प्रेस' इत्यस्य च स्थापना जाता। साहित्य-सदने एव स्वामिना ३० तमम् अखिलभारतीयं हिन्दी-साहित्य-सम्मेलनमपि आयोजितम्। हिन्दी-सेवार्थं स्वामिने 'साहित्य वाचस्पतिः' तथा च 'राष्ट्रभाषा-गौरवम्' इत्युपाधिद्वयं प्रदत्तम्। केशवानन्दस्य हिन्दी-प्रचार-कार्याणामेकं सुफलम् एतदासीद् यद् देशविभाजन-काले पञ्जाबस्य फाजिल्का-क्षेत्रं पाकिस्ताने गमनात् वारितम्।

स्वातन्त्र्यान्दोलनेऽपि सक्रियः स्वामिकेशवानन्दः नैकवारं वर्षाणि यावत् कारागारेष्वपि निबद्धः।

शिक्षा-प्रसाराय कृतभूरिश्रमेण स्वामिना 'ग्रामोत्थान-विद्यापीठ, संगरिया' इत्यस्य संस्थापनं कृतम्। ग्राम्यक्षेत्रेषु तेन उपत्रिशतं (३००) शिक्षाशालाः, उपपञ्चाशच्च (५०) छात्रावासाः स्थापिताः। शिक्षाक्षेत्रे स्वामिनः श्रमः पं. मदनमोहनमालवीयस्य पुरुषार्थं स्मारयति। योग्यमेव स्वामिवर्यः 'शिक्षा-सन्तः' इति विरुदेन भूषितः।

समाज-सुधारकः केशवानन्दः मरुप्रदेशे व्याप्तानां मृत्यु-भोजनं, बाल-विवाहः, नार्युत्पीडनं, यौतुकप्रथा, अवगुण्ठनप्रथा, अस्पृश्यता, मद्यसेवनम् इत्यादीनां कुप्रथानाम् निवारणाय सदैव सचेष्टः आसीत्।

स्वामिनो जीवनं सर्वपन्थसद्भावस्य निदर्शनमस्ति। अयं हि जाट-जातौ जातः परं सिक्खगुरोः नानकदेवस्य पुत्रेण श्रीचन्देन प्रवर्तिते उदासी-सम्प्रदाये दीक्षितः। गुरुग्रन्थस्योत्तमः पाठी अभूत्। एकादशवार्षिक-साधनया ७०० पृष्ठात्मकस्य सिक्खेतिहासस्य लेखनं कारितवान्। विभाजनकालीने हिंसाचारे क्षतानां मुस्लिमबन्धूनां चिकित्सा कारिता। सिक्ख-विश्नोई-नामधारी-दशनामी-आर्यसमाजी-जैनाद्याचार्याणां सम्मानने कार्यक्रमाः आयोजिताः। 'जाट-विद्यालयः, संगरिया' इत्यस्य नाम परीवर्त्य 'ग्रामोत्थान-विद्यापीठ' इत्यकरोत्। स्वामिकेशवानन्दस्य प्रकल्पान् द्रष्टुं सरछोटूरामः, के.एम. पणिक्करः, राजर्षि-पुरुषोत्तमदास-टण्डनः, भूदान-प्रणेता विनोबा भावे, पं. जवाहरलालः नेहरू, श्रीमती इन्दिरा गांधी, बाबू जगजीवनरामः,

श्रीलालबहादुरः शास्त्री, राजा महेन्द्र प्रतापः, महाराजा शार्दूलसिंहः, महाराजा करणीसिंहः, मोहनलालः सुखाड़िया, बरकतुल्ला खाँ, डॉ. वासुदेवशरणः अग्रवालः, नैके चान्ये भारतीयाः वैदेशिकाश्च विद्वांसः, शिक्षाविदः, राजनीतिविदः, धर्माचार्याश्च यथावसरं संगरिया-विद्यापीठे समायाताः। शिक्षायां, महिला-कल्याणे, दलितोत्थाने च लग्नः स्वामीजी द्विवारं (सन् १९५२-१९६४) संसदः सदस्यः (राज्यसभा) अवर्तत।

सत्यं विलक्षणोऽयमासीत् संन्यासी यः खलु आत्मकल्याणस्य मुक्तेः वा मार्गमनादृत्य —

**''न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।**
**कामये दुःख-तप्तानां प्राणिनामर्तिनाशनम्।।''**

— इति पन्थानमनुसरन् जीवनस्य एकोननवतितमे वर्षेऽपि कुर्वन्नेवेह कर्माणि देहल्यां राजमार्गे चरन् वै अनन्त-यात्रायै प्रस्थितः। सत्यमेवोक्तम् — **'सन्ति सन्तः कियन्तः!'**

## शब्दार्थाः

**सप्तवर्षकल्पः** — प्रायशः सप्तवर्षीयः (लगभग ७ वर्ष का)। **प्रयाणात्** — गमनात् (जाने से)। **प्रागेव (प्राक्+एव)** — पूर्वमेव (पहले ही)। **श्रेष्ठिगृहेषु** — महाजन-गृहेषु (सेठों के घरों में)। **गोधूमादिपेषणम्**- गोधूमादिकस्य चूर्ण-निर्माणम्। **पात्र-मार्जनम्** — भाजन-स्वच्छीकरणम् (बर्तन माँजना)। **वराकी** — दयनीया, मन्दभाग्या (बेचारी)। **वैधव्यम्** — विधवा-भावः। **छिद्रेषु** — दुर्बलतायाम् (कमजोरी में, परेशानी में)। **अनर्थाः** — आपदः, समस्याः, (समस्याएँ, परेशानियाँ)। **बहुलीभवन्ति** — वर्धन्ते (बढ़ जाती हैं)। **गोचारणकार्यम्** — धेनु-चारणकार्यम् (गाय चराने का कार्य)। **तदानीन्तनः** — तत्कालीनः (उस समय का)। **रौरवनरकम्** — एतन्नामकः नरक-विशेषः (रौरव नामक नरक)। **गण्डस्योपरि** — विद्रधेः उपरि (विद्रधि=फोड़े के ऊपर)। **पिटकः** — पिटिका (फुंसी)। **दुर्भरम्** — दुष्करम् (दूभर)। **दारुणः** — अतिकठोरः, भीषणः। **क्षुत्पिपासयोः** — क्षुत् च पिपासा च तयोः (भूख-प्यास का)। **आर्तनादः** — क्रन्दनम् (चीख-पुकार)। **शमीवृक्षाणाम्** — वृक्षविशेषाणाम् (खेजड़ी के पेड़ों की)। **भरूटसंज्ञकम्** — भरूटनामकम्। **अटन्तौ** — भ्रमन्तौ। **प्रतारणैः** — पीडनैः। **जर्जरिता** — क्षीणा। **बलवदस्वस्था** — अत्यन्तम् अस्वस्था। **षोडशवर्षदेशीयम्** — प्रायशः षोडशवर्षीयम्। **एकलम्** — एकाकिनम्। **विहाय** — त्यक्त्वा (छोड़कर) **दिवम्** — स्वर्गम् (परलोक को)। **प्रयाता** — गता (चली गई)। **एकलः** — एकाकी (अकेला)। **असार-संसार-दुःखदावानल-द्वितीयः** — असारसंसार दुःखदवाग्निसहायः (असार संसार का दुःख रूपी दवाग्नि जिसका साथी हो)। **क्षुत्पिपासार्दितः** — क्षुत् च पिपासा च इति क्षुत्पिपासे, ताभ्याम् अर्दितः=पीडितः (भूख और प्यास से पीड़ित)। **आहिण्डमानः** — अटन् (भटकता हुआ)। **युगपत्** — सह एव, एकस्मिन्नेव काले (एक साथ)। **इदम्प्रथमतया** — सर्वप्रथमम् (पहली वार)। **पशुचारकः** — पशून् चारयति यः सः (चरवाहा)। **प्रस्थानबिन्दुः** — प्रारम्भ-बिन्दुः। **हृदि** — हृदये। **अङ्कुरिता** — प्रस्फुटिता, उत्पन्ना। **पाटवम्** — पटुता, नैपुण्यम्। **अधिगतम्** — प्राप्तम्। **उषितम्** — निवासः कृतः। **देशाटनम्** — देश-भ्रमणम्। **गुण-गण-महिम्ना** — गुणानां गणः

(समूहः) गुणगणः, तस्य महिमा, तेन। (गुण-समूह की महिमा से)। **परमप्रीतः** — अतिप्रसन्नः। **परोपकाराय** — परहिताय। **सतां विभूतयः** — सत्पुरुषाणां सम्पदः। **शान्तिनिकेतनोपमा** — शान्तिनिकेतन-तुल्या। **वारितम्** — निवारणं कृतम् (बचा लिया गया)। **विरुदेन** — स्तुतिवचनेन। **यौतुकम्** — कन्या-विवाहे तत्पित्रा दीयमानं धनम् (दहेज)। **अवगुण्ठनम्** — 'घूँघट' इति हिन्द्याम्। **मुक्तेः** — मोक्षस्य। **अनादृत्य** — अस्वीकृत्य, त्यक्त्वा। **कामये** — इच्छामि। **अपुनर्भवम्** — मोक्षम्। **अर्तिः** — पीडा, दुःखम्। **कुर्वन्** — सम्पादयन्। **चरन्** — चलन् (चलते हुए)। **कियन्तः** — कति (कितने)।

## सन्धिविच्छेदः

| | | |
|---|---|---|
| मातुश्च | – | मातुः + च |
| इत्यासीत् | – | इति + आसीत् |
| कुर्वन्नस्य | – | कुर्वन् + अस्य |
| प्रागेव | – | प्राक् + एव |
| विपदाभिभूता | – | विपदा + अभिभूता |
| छिद्रेष्वनर्थाः | – | छिद्रेषु + अनर्थाः |
| गण्डस्योपरि | – | गण्डस्य + उपरि |
| अस्मिन्नेवान्तरे | – | अस्मिन् + एव + अन्तरे |
| जनन्यपि | – | जननी + अपि |
| प्रवेशितोऽयम् | – | प्रवेशितः + अयम् |
| संस्कृताध्ययनेच्छा | – | संस्कृत + अध्ययन + इच्छा |
| साधुर्भव | – | साधुः + भव |
| गुर्वाज्ञया | – | गुरु + आज्ञया |
| चाप्युषितम् | – | च + अपि + उषितम् |
| इत्याख्या | – | इति + आख्या |
| शान्तिनिकेतनोपमासीत् | – | शान्तिनिकेतन + उपमा + आसीत् |
| यन्माध्यमेन | – | यत् + माध्यमेन |
| स्वातन्त्र्यान्दोलनेऽपि | – | स्वातन्त्र्य + आन्दोलने + अपि |
| नैकवारम् | – | न + एकवारम् |
| कारागारेष्वपि | – | कारागारेषु + अपि |
| ग्रामोत्थानम् | – | ग्राम + उत्थानम् |
| इत्यस्य | – | इति + अस्य |
| उपपञ्चाशच्च | – | उपपञ्चाशत् + च |
| नार्युत्पीडनम् | – | नारी + उत्पीडनम् |

| | | |
|---|---|---|
| गुरुग्रन्थस्योत्तमः | – | गुरुग्रस्थस्य + उत्तमः |
| सिक्खेतिहासस्य | – | सिक्ख + इतिहासस्य |
| जैनाद्याचार्याणाम् | – | जैन + आदि + आचार्याणाम् |
| इत्यकरोत् | – | इति + अकरोत् |
| त्वहम् | – | तु + अहम् |
| नापुनर्भवम् | – | न + अपुनः + भवम् |
| कुर्वन्नेवेह | – | कुर्वन् + एव + इह |

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. बाल्यावस्थायां स्वामिकेशवानन्दस्य नामासीत् —
(अ) वीरु (आ) बीरमा
(इ) वीरः (ई) बिरसा ( )

२. बाल्यकाले स्वामी केशवानन्दः आसीत्–
(अ) पशुचारकः (आ) चाय-विक्रेता
(इ) राज-सेवकः (ई) रजकः, प्रक्षालकः ( )

३. मातुः निधनसमये 'बीरमा' आसीत् —
(अ) शिशुः (आ) किशोरः
(इ) युवा (ई) प्रौढ़ः ( )

४. संस्कृतमध्येतुं कस्य शिष्यत्वं 'बीरमा' अङ्गीकृतवान् —
(अ) स्वामिकुशलदासस्य (आ) स्वामिबिरजानन्दस्य
(इ) गुरुनानकदेवस्य (ई) बन्दाबहादुरस्य ( )

५. 'केशवानन्द' इति नामकरणं केन, कुत्र च कृतम् —
(अ) सरछोटूरामेण, पञ्जाबे (आ) एकेन साधुना, कुम्भमेलायाम्
(इ) राज्ञा महेन्द्रप्रतापेन,वृन्दावने (ई) मातापितृभ्याम्, मगलूणा-ग्रामे ( )

६. यदा स्वामिकेशवानन्दस्य शिक्षारम्भः जातः तदा स आसीत् —
(अ) पञ्चवर्षीयः (आ) दशवर्षीयः
(इ) द्वादशवर्षीयः (ई) षोडशवर्षीयः ( )

७. स्वामिकेशवानन्दः आसीत् —
(अ) स्वतन्त्रता-सेनानी (आ) शिक्षाविद्
(इ) समाज-सुधारकः (ई) एतत्सर्वमपि ( )

८. स्वामिकेशवानन्दः संसदः सदस्यः अवर्तत —

(अ) एकवारं, राज्यसभायाः (आ) एकवारं, लोकसभायाः

(इ) द्विवारं, राज्यसभायाः (ई) त्रिवारं लोकसभायाः ( )

**लघूत्तरात्मक-प्रश्नाः**

१. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखन्तु —

(क) स्वामिकेशवानन्दस्य जन्म कदा अभवत्?

(ख) स्वामिकेशवानन्दस्य मातापित्रोः नाम किम्?

(ग) स्वामिनः संस्कृताध्ययनं कुत्र अभवत्?

(घ) केशवानन्देन संस्कृत-पाठशाला कुत्र स्थापिता?

(ङ) स्वामिनः शिक्षा-प्रसारादिकार्याणि द्रष्टुं ये महापुरुषाः आगताः तेषु केषामपि पञ्चानां नामानि वदन्तु।

२. 'क'-खण्डं 'ख'-खण्डेन सह यथोचितं योजयन्तु-

| **'क'** | **'ख'** |
|---|---|
| १. केशवानन्दः | संगरिया |
| २. छप्पनियाँ काळ इति | बीरमा |
| ३. अबोहरम् | स्वामिकेशवानन्द-कृषि-विश्वविद्यालयः |
| ४. उदासी-सम्प्रदायः | दुर्भिक्षम् |
| ५. ग्रामोत्थान-विद्यापीठः | साहित्य-सदनम् |
| ६. बीकानेरम् | श्रीचन्दः |
| ७. वेदान्त-पुष्प-वाटिका | सीकरम् |
| ८. मगलूणा | हिन्दी-पुस्तकालयः |

३. निम्नलिखित-शब्दानां पर्यायशब्दान् पाठात् चित्वा लिखन्तु —

| | |
|---|---|
| (अ) पूर्वमेव | प्रागेव |
| (आ) क्रमेलकः | ................ |
| (इ) एकाकी | ................ |
| (ई) अतीव प्रसन्नः | ................ |
| (उ) मोक्षम् | ................ |
| (ऊ) इच्छामि | ................ |
| (ऋ) धरित्री | ................ |

४. अधोलिखित-पदानां पर्यायपदानि पाठात् चित्वा लेखनीयानि —

| | |
|---|---|
| १. सम्पन्नता | ................ |
| २. स्वतन्त्रता | ................ |

३. सुभिक्षम् ................
४. दुर्लभम् ................
५. निष्क्रियः ................
६. विस्मारयति ................

५. स्थूलाक्षरपदमाधृत्य उदाहरणं च अनुसृत्य प्रश्न-वाक्यं रचयतु –

स्वामिनः जन्म **१९४० तमे वर्षे** अभवत्। स्वामिनः जन्म कदा अभवत्?
१. **मातुः** नाम साराँ इत्यासीत्। ..................................
२. **तस्मिन्** दुर्भिक्षे जीवनं दुर्भरमासीत्। ..................................
३. **केशवानन्दाय** दत्तवान्। ..................................
४. केशवानन्दः **द्विवारं** राज्यसभायाः सदस्यः आसीत्। ..................................
५. **परोपकाराय** सतां विभूतयः। ..................................
६. **कुप्रथानां** निवारणे संलग्नः आसीत्। ..................................

६. अधोलिखित-पदानि आश्रित्य उदाहरणं च अनुसृत्य संस्कृतेन वाक्य-रचनां कुर्वन्तु —

१. पिटकः तव नासाग्रे पिटकः संवृत्तः।
२. एकलः ............................................
३. विहाय ............................................
४. पशुचारकः ............................................
५. हृदि ............................................
६. कामये ............................................
७. कुर्वन् ............................................
८. परोपकाराय ............................................

**निबन्धात्मक-प्रश्नाः**

१. स्वामिकेशवानन्दस्य बाल्यकालः कथं कष्टापन्नः आसीदिति वर्णयन्तु।
२. स्वामिनः केशवानन्दस्य जीवनं सर्वपन्थ-सद्भावस्य निदर्शनम् आसीदिति सोदाहरणं प्रतिपादयन्तु।

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (आ) २. (अ) ३. (आ) ४. (अ) ५. (आ) ६. (ई) ७. (ई) ८. (इ)

# भावचित्राणि











# नवमः पाठः

प्रस्तुतोऽयं पाठः 'भारत-भारती-वैभवम्' इत्याख्य-ग्रन्थाद् संकलितः। अस्य महनीय-ग्रन्थस्य रचनाकारः श्रीनिम्बार्काचार्यपीठाधीश्वरः श्रीराधासर्वेश्वरशरणदेवाचार्यः 'श्रीजी' महाराजः वर्तते। मातृभूमेः भारतस्य, भारत्याः च संस्कृतभाषायाः वन्दनात्मकं सुन्दरं गीतिकाव्यम् एतदस्ति, यत्र 'गीता-गङ्गा-गावश्च' इत्येवं गकारत्रयी अपि सुष्ठु वर्णिता। अत्र संगृहीतः ग्रन्थस्य अस्य स्वल्पः अंश एव एतावद्-कलात्मकः, सर्वाङ्गसुन्दरः, मधुरश्चास्ति यत् बंकिमचन्द्रस्य 'वन्देमातरम्' इति गीतम् अनायासं स्मारयति।

## भारत-वैभवम्

**वन्दे नितरां भारतवसुधाम्।**
**दिव्यहिमालय-गङ्गा-यमुना-सरयू-कृष्णाशोभितसरसाम्।।**

**मुनिजनदेवैरनिशं पूज्यां जलधितरङ्गैरञ्चितसीमाम्।**
**भगवल्लीला-धाममयीं तां नाना तीर्थैरभिरमणीयाम्।।**

**अध्यात्मधरित्रीं गौरवपूर्णां शान्तिवहां श्री-वरदां सुखदाम्।**
**सस्यश्यामलां कलितामलां कोटि-कोटिजनसेवितमुदिताम्।।**

**वीरकदम्बैरतिकमनीयां सुधीजनैश्च परमोपास्याम्।**
**वेद-पुराणैर्नित्यसुगीतां राष्ट्रसुभक्तैरीड्यां भव्याम्।।**

**नानारत्नैर्मणिभिर्युक्तां हिरण्यरूपां हरिपदपुण्याम्।**
**राधासर्वेश्वरशरणोऽहं वारं वारं वन्दे रम्याम्।।**

## शब्दार्थाः

**भारत-वसुधाम्** — भारत-भूमिम्। **नितराम्**- सततम्। **वन्दे**—अभिवादये। कीदृशीं भारत-वसुधाम् -**दिव्यहिमालय-गंगा-यमुना-सरयू-कृष्णाशोभितसरसाम्** — परमदिव्यो हिमालयो नाम नगाधिराजः पुनश्च गङ्गा-भागीरथी। यमुना-कालिन्दनन्दिनी। सरयू-वासिष्ठी। कृष्णा-कावेरी प्रभृति-नदीभिः पावनतमाम्। **मुनिजनदेवैरनिशम्** — सुरनरमुनिवृन्दैर्नित्यम्। **पूज्याम्** — आराध्याम्। **जलधितरङ्गैः** — समुद्रवीचिभिः। **अञ्चितसीमाम्** — परिशोभित-प्रान्तभागाम्। **भगवल्लीलाधाममयीम्** — भगवत्क्रीडास्थलमयीम्। **नानातीर्थैरभिरमणीयाम्**- विविधतीर्थैरतिमनोहराम्। **अध्यात्मधरित्रीम्**- अध्यात्मविद्याधरणीम्। **गौरवपूर्णाम्** — महत्वपूर्णाम्। **शान्तिवहाम्** — शान्ति-प्रदाम्। **श्रीवरदाम्** — लक्ष्मीदात्रीम्। **सुखदाम्** — सुखप्रदाम्। **सस्यश्यामलाम्** — धन-धान्यपरिपूर्णाम्। **कलिताम्**— ललिताम् अर्थात् सुन्दरतमाम्। **अमलाम्** — निर्मलाम्। **कोटि-कोटिजनसेवितमुदिताम्** — असंख्य-जन-निस्सेवनेन सुप्रसन्नाम्। **वीरकदम्बैरतिकमनीयाम्** — वीरपुरुषसमूहैः सुमनोहराम्। **सुधीजनैश्च** — बुधजनैश्च। **परमोपास्याम्**- परिसेव्याम्। **वेदपुराणैर्नित्यसुगीताम्** — निगमागमशास्त्रैरनिशं प्रगीयमानाम्। **राष्ट्रसुभक्तैरीड्याम्** — देशभक्तैः संस्तुताम्। **भव्याम्** — विशालाम्। **नानारत्नैर्मणिभिर्युक्ताम्** — मुक्ता-माणिक्य-प्रवालादिविविधरत्नैर्मणिभिश्च भरिताम्। **हिरण्यरूपाम्** — स्वर्णस्वरूपाम्। **हरिपदपुण्याम्** — भगवच्चरणसमलङ्कृताम्, अतएव पुण्याम्। **रम्याम्** — परममनोहराम्। ताम्-भारतवसुधाम्। **अहम्** — ग्रन्थकारः। **वारं वारम्** — मुहुर्मुहुः। **वन्दे** — अभिवादये।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. 'भारत-वैभवम्' इति पाठः कस्माद् ग्रन्थाद् गृहीतः वर्तते —

(अ) भारत-भारती (आ) देवभारती- वैभवम्

(इ) भारत-भारती-वैभवम् (ई) सुरभारती-वैभवम्। ( )

२. 'वन्दे नितरां भारत-वसुधाम्' इत्यस्य रचनाकारः अस्ति —

(अ) श्रीजी महाराजः (आ) श्रीमहेश्वरानन्दगिरिजी महाराजः

(इ) श्रीईश्वरानन्दगिरिजी महाराजः (ई) श्री संवित्सोमगिरिदेवः ( )

३. वीरकदम्बैरतिकमनीयाम् — इत्यत्र कदम्ब-शब्दस्य अर्थोऽस्ति —

(अ) वृक्षविशेषः (आ) पुष्पविशेषः

(इ) समूहः (ई) वसन्तः ( )

**लघूत्तरात्मक-प्रश्नाः**

१. राधासर्वेश्वरशरणः कोऽस्ति?

२. 'भारतवसुधाम्' इत्यस्य पञ्चविशेषणानि कानिचन लिख्यन्ताम्।

३. सन्धिविच्छेदं कुर्वन्तु —

१. भगवल्लीला ................+................

२. सुधीजनैश्च ................+................

३. परमोपास्याम् ................+................

४. सुभक्तैरीड्याम् ................+................

**निबन्धात्मक-प्रश्नाः**

१. पाठम् अनुसृत्य भारतवसुधायाः महत्त्वं वर्णयन्तु।

## उत्तर-माला

**वस्तुनिष्ठ-प्रश्नाः**

1. (इ) 2. (अ) 3. (इ)

**परियोजनात्मकं कार्यम्-**

भारतभक्तियुतं किमपि एकं संस्कृत-हिन्दी-बंग्ला-राजस्थानी-गीतं कण्ठाग्रं कृत्वा कक्षायां श्रावयन्तु।

# दशमः पाठः

'सुभाषितम्' इत्यनेन पदेन तु भवन्तः सर्वे परिचिताः एव स्युः। सुभाषितम्, अमृतवचनं, नीतिवाक्यं, सूक्तिः इत्यादयः सर्वेऽपि पर्यायशब्दास्सन्ति। तद् वाक्यं (वाक्यांशोऽपि वा) सुभाषितम् इत्युच्यते यत् श्रुत्वा मनस्तोषः सुखानुभूतिश्च जायते, यत् अन्येषां मनः क्लेशाय न भवेत्, यस्य प्रयोगः अपरेषाम् अनादराय न स्यात्, यत् सत्यपूतं हितावहं च भवेत्, यत्र नैतिकता-बुद्धिमत्ता-विवेकशीलता च स्यात्। सुभाषितस्य लक्षणं क्वचिद् एवं कृतमस्ति-"**वचनं सारभूतं यत्-तत् सुभाषितमुच्यते।**" अस्माकं जीवने सुभाषितानां कियत् महत्त्वं वर्तते, इत्यस्मिन् विषयेऽपि कतिपयानि सुभाषितानि एवं मिलन्ति-

१. संसार-कटुवृक्षस्य द्वे फले अमृतोपमे।
सुभाषितरसास्वादः सङ्गतिः सुजने जने।।

२. सुभाषितरसास्वादः सज्जनैः सह संगतिः।
सेवा विवेकिभूपस्य दुःख-निर्मूलनं त्रयम्।।

३. सुभाषितेन गीतेन बालकानां च लीलया।
मनो न भिद्यते यस्य स वै मुक्तोऽथवा पशुः।।

४. अमेध्यादपि काञ्चनम् बालादपि सुभाषितम्।।

सुभाषित-प्रशंसात्मकानां एषां चतुर्णां पद्यानाम् अयमेव सारः यत् —

१. असारेऽस्मिन् संसारे सुभाषितरसास्वादनं खलु अमृतास्वादनसमम्।
२. सुभाषितास्वादनं दुःखनिवारणम्।
३. सुभाषितं हि मनसः द्रवीभावस्य कारणम्।
४. सुभाषितं तु बालकादपि लभ्यते चेत् स्वीकरणीयम्।

अतो हि पाठेऽस्मिन् भवतां रसास्वादनाय, ज्ञानार्जनाय, गुणार्जनाय च कानिचन प्रसिद्धानि ज्ञातमूलानि अज्ञातमूलानि च सुभाषितानि इतस्ततः समाकृष्य लिख्यन्ते। वाणी-माधुरी, सद्गुण-महिमा, पात्रापात्रविवेकः, खल-सज्जन-विवेकः, विद्यार्जन-धनार्जन-धर्मार्जन-प्रकारः, मैत्री, दानशीलता, अहिंसावृत्तिः, आततायिनं प्रति नीतिः, संघवृत्तिः — इत्येवं विविध-विषय-सम्बद्धानि सुभाषितानि अत्र चितानि।

## सुभाषित-रत्नानि

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढ़ैः पाषाण - खण्डेषु रत्नसंज्ञा विधीयते।। १ ।।

प्रियवाक्य - प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।। २ ।।

गुणैः गौरवमायाति नोच्चैः आसनमास्थितः।
प्रासादशिखरस्थोऽपि काको न गरुडायते।। ३ ।।

पात्रापात्र - विवेकोऽस्ति धेनुपन्नगयोः इव।
तृणात्संजायते क्षीरं क्षीरात्संजायते विषम्।। ४ ।।

यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।। ५ ।।

अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।। ६ ।।

धन - धान्य - प्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्।। ७ ।।

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय ।। ८ ।।

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति।। ९।।

शोकाराति - परित्राणं प्रीतिविस्रम्भभाजनम्।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्।। १० ।।

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।। ११ ।।

अनुकूले विधौ देयं यतः पूरयिता हरिः।
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति।। १२ ।।

अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते।। १३ ।।

आततायिनम् आयान्तं हन्यादेवाविचारयन्।
नाततायि-वधे दोषो हन्तुर्भवति कश्चन।। १४ ।।

गोपालसाङ्गिकः कृष्णः रामो वानरसाङ्गिकः।
सद्भिक्षुसाङ्गिको बुद्धः महात्मानो हि साङ्गिकाः।। १५ ।।

## अन्वय:

१. पृथिव्यां त्रीणि रत्नानि (सन्ति) - जलम् अन्नं सुभाषितम् (च)। मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।
२. प्रियवाक्य-प्रदानेन सर्वे जन्तवः तुष्यन्ति। तस्मात् तदेव (प्रियवाक्यमेव) वक्तव्यम्। वचने का दरिद्रता?
३. (मनुष्यः) गुणैः गौरवम् आयाति, न (तु) उच्चैः आसनम् आस्थितः (जनः)। काकः प्रासाद-शिखरस्थः अपि (सन्) न गरुडायते।
४. पात्रापात्र-विवेकः धेनुपन्नगयोः इव अस्ति। तृणात् क्षीरं संजायते, क्षीरात् (च) विषं संजायते।
५. यथा नरः खनित्रेण खनन् वारि अधिगच्छति, तथा (एव) शुश्रूषुः गुरुगतां विद्याम् अधिगच्छति।
६. प्राज्ञः अजरामरवत् विद्याम् अर्थं च चिन्तयेत्, मृत्युना केशेषु गृहीतः इव (च) धर्मम् आचरेत्।
७. धनधान्य-प्रयोगेषु विद्यायाः संग्रहेषु च, आहारे व्यवहारे च त्यक्तलज्जः (जनः) सुखी-भवेत्।
८. खलस्य विद्या विवादाय, धनं मदाय, शक्तिः (च) परेषां परिपीडनाय (भवति)। (किन्तु) साधोः एतत् (सर्वं) विपरीतं-(विद्या) ज्ञानाय, (धनं) दानाय, (शक्तिः) रक्षणाय च (भवति)।
९. खलः सर्षपमात्राणि (अपि) परच्छिद्राणि पश्यति, (परन्तु) आत्मनः बिल्वमात्राणि (छिद्राणि अपि) पश्यन् अपि न पश्यति।
१०. शोकाराति-परित्राणं प्रीतिविस्रम्भभाजनं मित्रम् इति इदम् अक्षरद्वयं रत्नं केन सृष्टम्?
११. परोक्षे कार्य-हन्तारं प्रत्यक्षे प्रियवादिनं, तादृशं पयोमुखं विषकुम्भं मित्रं वर्जयेत्।
१२. विधौ अनुकूले (सति) देयं यतः पूरयिता हरिः (अस्ति); विधौ प्रतिकूले (सत्यपि) देयं यतः (सः हरिः) सर्वं हरिष्यति।
१३. अहिंसा परमः धर्मः (अस्ति), तथा अहिंसा परं तपः, (तथा च) अहिंसा परमं सत्यं (विद्यते) यतः धर्मः प्रवर्तते।
१४. आयान्तं आततायिनं अविचारयन् हन्यात् एव। आततायि-वधे हन्तुः कश्चन दोषः न भवति।
१५. कृष्णः गोपाल-साङ्घिकः, रामः वानर-साङ्घिकः, बुद्धः (च) सद्भिक्षु-साङ्घिकः (आसीत्)। हि महात्मानः साङ्घिकाः (भवन्ति)।

## शब्दार्थाः

**पृथिव्याम्** — वसुन्धरायाम्। **पाषाण-खण्डेषु** — प्रस्तर-खण्डेषु। **रत्नसंज्ञा विधीयते** — रत्नम् इति नाम प्रदीयते। **प्रियवाक्य-प्रदानेन** — मृदुवाक्यप्रयोगेण, मधुरभाषणेन। **सर्वे जन्तवः** — सर्वेऽपि प्राणिनः। **तुष्यन्ति** — सन्तोषं प्राप्नुवन्ति। **दरिद्रता** — कृपणता। **गौरवम्** — गुरुताम्। **आयाति** — प्राप्नोति। **प्रासादशिखरस्थः** — प्रासादस्य भवनस्य शिखरे शीर्षे स्थितः। **गरुडायते** — गरुडवत् आचरति। **पात्रापात्रविवेकः** — पात्रस्य अपात्रस्य च भेदः। **धेनुपन्नगयोः इव** — गोसर्पयोः तुल्यम् (गाय व सर्प के समान)। **तृणात् क्षीरम्** — घासात् दुग्धम्। **क्षीरात् विषम्** — दुग्धात् विषम्। **संजायते** — उत्पद्यते। **खनित्रेण** — खनन साधनेन (कुदाल से)। **वारि** — जलम्। **अधिगच्छति** — प्राप्नोति (प्राप्त कर लेता है)। **गुरुगताम्** — गुरौ विद्यमानाम् (गुरु में विद्यमान)। **शुश्रूषुः** — श्रोतुं ज्ञातुम् इच्छुकः,

जिज्ञासुः, सेवापरायणः। **प्राज्ञः** — विद्वान्, बुद्धिमान्। **अजरामरवत्** — अहम् अजरः अमरः च इति मत्वा (अजर व अमर के समान अर्थात् स्वयं को अजर-अमर मानकर) **अजरः** = जरारहितः, **अमरः** = मरणरहितः। **चिन्तयेत्** — विचारयेत्, प्राप्नुयात्। **मृत्युना** — यमराजेन (मृत्यु के द्वारा)। **केशेषु गृहीत इव** — मरणासन्नः इव (मृत्यु ने केश पकड़ रखे हैं, ऐसा मानकर)। **धर्मम् आचरेत्** — धर्माचरणं कुर्यात्। **त्यक्तलज्जः** — त्यक्ता लज्जा येन सः (लज्जारहित)। **परेषाम्** — अन्येषाम्। **परिपीडनाय** — दुःखं दातुम्। **सर्षपमात्राणि** — सर्षपसदृशानि, अतिलघूनि (सर्षप=सरसों)। **परच्छिद्राणि** — परेषां दोषान्। **आत्मनः** — स्वस्य। **बिल्वमात्राणि** — बिल्वसदृशानि (बिल्व=बील के फल के समान), स्थूलानि। **शोकाराति-परित्राणम्** — शोकः एव अरातिः शत्रुः, तस्मात् परित्राणम् रक्षणम्। (शोकरूपी शत्रु से बचाने वाला)। **प्रीतिविस्रम्भ-भाजनम्** — प्रीतेः प्रेम्णः विस्रम्भस्य विश्वासस्य च भाजनं पात्रम् (प्रेम और विश्वास का पात्र)। **अक्षरद्वयम्** — मि+त्र इत्यक्षरद्वयात्मकम् ('मि' और 'त्र' इन दो अक्षरों वाला)। **रत्नम्** — मणिः। **सृष्टम्** — निर्मितम्। **परोक्षे** — अप्रत्यक्षम्, अनुपस्थितौ (पीठ पीछे)। **कार्यहन्तारम्** — कार्यविघातकम्, कार्यविनाशकम् (काम बिगाड़ने वाले को)। **प्रत्यक्षे** — सम्मुखे, पुरतः (प्रकट में, सामने)। **प्रियवादिनम्** — मधुरभाषिणम्। **पयोमुखम्** — पयः दुग्धं मुखे यस्य तत्, तादृशम् (जिसके मुखभाग पर यानी ऊपर-ऊपर दूध हो, ऐसे को)। **विषकुम्भम्** — विषपूरितं कलशम् (जहर-भरे घड़े को)। **वर्जयेत्** — त्यजेत्। **विधौ** — भाग्ये। **अनुकूले** — अभिमते, मनोवाञ्छिते सति (अनुकूल होने पर)। **देयम्** — दातव्यम् (देना चाहिये)। **प्रतिकूले** — विपरीते सति (विपरीत होने पर)। **यतः** — यस्मात् (क्योंकि)। **पूरयिता** — दाता (देने वाला)। **हरिः** — परमेश्वरः। **हरिष्यति** — अपहरिष्यति (छीन लेगा)। **अहिंसा** — प्राणिवधस्य अभावः, मनसा-वाचा-कर्मणा च प्राणिनाम् अपीडनम्। **परमः** — चरमः, सर्वोच्चः। **तपः** — तपश्चर्या। **यतः** — यस्मात् (जिससे)। **प्रवर्तते** — प्रारभते (प्रवृत्त होता है, चलता है)। **आयान्तम्** — आगच्छन्तम् (आते हुए)। **आततायिनम्** — आतंकिनम् (आततायी को)। **अविचारयन्** — अविचार्य (बिना विचारे)। **हन्तुः** — घातकस्य (मारने वाले का)। **दोषः** — अपराधः। **गोपालसाङ्घिकः** — गोपालानां संघटनेन सम्बद्धः। **वानरसाङ्घिकः** — वानराणां संघेन सम्बद्धः। **सद्भिक्षुसाङ्घिकः** — सद्भिक्षूणां संघेन सम्बद्धः। **महात्मानः** — महापुरुषाः। **साङ्घिकाः** — संघसम्बद्धाः, संघप्रियाः, संघनिष्ठाः, साहचर्यशीलाः।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. पृथिव्यां त्रिषु रत्नेषु एतत् न गण्यते —

(अ) जलम् (आ) अन्नम्

(इ) धनम् (ई) सुभाषितम् ( )

२. 'पन्नग'-शब्दस्य अर्थोऽस्ति —

(अ) पत्रम् (आ) नगः पर्वतः वा

(इ) गरुडः (ई) सर्पः ( )

३. कस्य धनं मदाय भवति —

(अ) खलस्य (आ) सज्जनस्य

(इ) धनिकस्य (ई) सर्वस्व ( )

४. अहिंसा अस्ति —

(अ) परमो धर्मः (आ) परं तपः

(इ) परमं सत्यम् (ई) उपर्युक्तं सर्वमपि ( )

५. 'खलः परच्छिद्राणि पश्यति' इत्यत्र 'छिद्रम्' इत्यस्य अर्थोऽस्ति —

(अ) विवरम् (आ) दोषः

(इ) गुणः (ई) बिलम् ( )

६. पुरतः यदि कश्चित् आततायी आयाति तर्हि सः —

(अ) बहिष्करणीयः, उत्सारणीयः (आ) ससम्भ्रमम् अभिनन्दनीयः

(इ) सत्वरं हन्तव्यः (ई) सर्वथा उपेक्षणीयः ( )

७. प्रीतिविस्रम्भभाजनम् कः भवति —

(अ) मित्रम् (आ) अमित्रम्

(इ) तटस्थः (ई) एते सर्वेऽपि ( )

८. दानं करणीयम् —

(अ) भाग्ये अनुकूले सति (आ) भाग्ये प्रतिकूले सति

(इ) सदैव (ई) कदापि नैव ( )

९. अधोलिखितेषु असत्यं कथनमस्ति —

(अ) शुश्रूषुः विद्याम् अधिगच्छति (आ) साधोः विद्या विवादाय भवति

(इ) आततायि-वधे दोषः न भवति (ई) महापुरुषाः सङ्कशीलाः भवन्ति ( )

**लघूत्तरात्मक-प्रश्नाः**

१. अधोलिखित-प्रश्नानाम् उत्तराणि दीयन्ताम् —

(क) 'सुभाषितम्' इति पदस्य कोऽर्थः ?

(ख) पृथिव्यां कियन्ति रत्नानि ? कानि च तानि ?

(ग) मूढैः कुत्र रत्नसंज्ञा विधीयते ?

(घ) पात्रापात्रविवेकः केन तुल्यं भवति ?

(ङ) अजरामरवत् किं चिन्तयेत् प्राज्ञः ?

(च) कुत्र लज्जा त्यक्तव्या सुखार्थिना ?

(छ) 'मित्रम्' इति पदं द्व्यक्षरं वा सार्द्धद्व्यक्षरं वा?

(ज) धनस्य पूरयिता, हर्त्ता च कोऽस्ति?

२. 'क'-खण्डं 'ख'-खण्डेन सह यथोचितं योजयतु —

| क | ख |
|---|---|
| १. खलः | खनित्रम् |
| २. पात्रम् | शोकाराति-परित्राणम् |
| ३. अपात्रम् | छिद्रान्वेषणम् |
| ४. खननम् | वानर-साङ्घिकः |
| ५. मित्रम् | धेनुः |
| ६. रामः | पन्नगः |
| ७. विद्या | दानाय मदाय च |
| ८. शक्तिः | कृष्णः |
| ९. धनम् | ज्ञानाय विवादाय च |
| १०. गोपालसाङ्घिकः | रक्षणाय पीडनाय च |

३. अधोलिखित-पदानां पर्यायपदानि पाठाद् आकृष्य लिखन्तु —

| | |
|---|---|
| १. पानीयम् | जलम्, वारि |
| २. दुग्धम् | .............. |
| ३. गौः | .............. |
| ४. सर्पः | .............. |
| ५. दुर्जनः | .............. |
| ६. धनम् | .............. |
| ७. शत्रुः | .............. |
| ८. भाग्यम् | .............. |
| ९. वासुदेवः | .............. |
| १०. सुहृद् | .............. |

४. निम्नलिखित-पदानां विलोमपदानि पाठाद् चित्वा लिखन्तु —

| | |
|---|---|
| १. दुर्भाषितम् | सुभाषितम् |
| २. सम्पन्नता | .............. |
| ३. सज्जनः | .............. |
| ४. नीचैः | .............. |
| ५. दुःखी | .............. |
| ६. प्रत्यक्षम् | .............. |

७. अनुकूलः ...............
८. हिंसा ...............
९. गुणः ...............
१०. अदेयम् ...............

५. स्थूलाक्षरपदमाश्रित्य (उदाहरणम् अनुसृत्य च) संस्कृतेन प्रश्नवाक्य-निर्माणं क्रियताम् —

| | |
|---|---|
| १. **सर्वे जन्तवः** तुष्यन्ति। | के तुष्यन्ति ? |
| २. **काको** न गरुडायते। | .............................. |
| ३. **खलस्य** विद्या विवादाय भवति। | .............................. |
| ४. साधोः विद्या **ज्ञानाय** भवति। | .............................. |
| ५. वर्जयेत् **तादृशं** मित्रम्। | .............................. |
| ६. **आततायिनं** हन्यात्। | .............................. |
| ७. **विधौ अनुकूले** देयम्। | .............................. |

६. अधोलिखित-पदानि आधृत्य (उदाहरणं च अनुसृत्य) संस्कृतेन वाक्य-निर्माणं क्रियताम् —

| | |
|---|---|
| १. दरिद्रता | दरिद्रता सदा दुःखदायिनी भवति। |
| २. त्रीणि | ....................................... |
| ३. यथा | ....................................... |
| ४. इव | ....................................... |
| ५. सुखी | ....................................... |
| ६. कश्चन | ....................................... |
| ७. धर्मः | ....................................... |
| ८. रामः | ....................................... |

**निबन्धात्मक-प्रश्नाः**

१. 'पृथिव्यां त्रीणि रत्नानि...... संज्ञा विधीयते'-अस्य सुभाषितस्य हिन्द्यर्थः लिख्यताम्।
२. 'विद्या विवादाय...... रक्षणाय।' — अस्य श्लोकस्य संस्कृत-व्याख्या क्रियताम्।
३. अस्मिन् पाठे सन्मित्रस्य कुमित्रस्य च विषये किं प्रतिपादितम् अस्ति ? लिख्यताम्।

## उत्तर-माला

**वस्तुनिष्ठ-प्रश्नाः**

१. (इ) २. (ई) ३. (अ) ४. (ई) ५. (आ) ६. (इ) ७. (अ) ८. (इ) ९. (आ)

**परियोजनात्मकं कार्यम्**

१. अस्य पाठस्य सर्वाण्यपि सुभाषितानि कण्ठस्थीकृत्य तेषां शुद्धतया लेखनस्य, सस्वरं प्रस्तुतीकरणस्य च स्पर्धा कक्षायां सहपाठिभिः साकम् आयोजनीया।

**व्याकरण-प्रश्नाः**

१. सन्धिविच्छेदं/सन्धिं कुर्वन्तु —

| | |
|---|---|
| १. पात्रापात्रम् | ............... + ................ |
| २. वार्यधिगच्छति | ............... + ................ |
| ३. अजरामरवत् | ............... + ................ |
| ४. परच्छिद्राणि | ............... + ................ |
| ५. पश्यन्+अपि | .................................... |
| ६. शोकारातिः | ............... + ................ |
| ७. धर्मस्तथाऽहिंसा | ........... + ............+........... |
| ८. हन्यादेवाविचारयन् | ........... + ............+........... |

२. अधस्तन पदेषु प्रकृति-प्रत्यय-विभागं कुर्वन्तु —

| **पदम्** | **उपसर्गः + धातु + प्रत्ययः** |
|---|---|
| १. वक्तव्यम् | ................................. |
| २. रक्षणम् | ................................. |
| ३. त्यक्तम् | ................................. |
| ४. पश्यन् | ................................. |
| ५. परित्राणम् | ................................. |
| ६. सृष्टम् | ................................. |
| ७. हन्ता | ................................. |

३. समासः/समास-विग्रहः करणीयः —

| | |
|---|---|
| १. धेनुः च पन्नगः च | ................................. |
| २. पाषाणानां खण्डाः | ................................. |
| ३. त्यक्तलज्जः | ................................. |
| ४. परच्छिद्राणि | ................................. |
| ५. कार्यहन्ता | ................................. |
| ६. आततायिनां वधः | ................................. |

# एकादशः पाठः

*इयम् एकाङ्की डॉ. नारायणशास्त्रीकांकरेण विरचिता अस्ति। अस्य महोदयस्य जन्म जयपुरनगरे अभवत्। अनेन संस्कृतभाषायां अनेकाः एकाङ्क्यः लिखिताः। तासां संकलनं 'एकाङ्कीसंस्कृतनवरत्नसुषमा' नामके अनेनैव विरचिते ग्रन्थे अस्ति। अकबरेण सह युद्धं कुर्वन् धनाभावे सैन्यशक्त्यभावे खिन्नः महाराणा प्रतापः स्वदेशं परित्यक्तुं समुद्यतः भवति। तस्मिन् अवसरे मेवाड़मन्त्री भामाशाहः आगत्य स्वकीयां विपुलां धनराशिं देशस्य स्वतन्त्रतायै प्रतापाय समर्पयति। इत्थमस्मिन् एकाङ्करूपके महाराणाप्रतापस्य कर्त्तव्यबुद्धिः, स्वराष्ट्रस्य स्वतन्त्रतायै दृढ़ेच्छाशक्तिः, स्वाभिमानं, भामाशाहस्य उदारता, देशरक्षायै स्वसम्पत्तिसमर्पणं च इत्येवमादयः विशिष्टाः गुणाः वर्णिताः सन्ति।*

## स्वदेशं कथं रक्षेयम्

*(मेवाड़ाधिपतिः महाराणाप्रतापः अरण्ये स्वसहचरेण सह एकस्यां शिलायाम् उपविष्टः वर्तते। असौ प्राणैः अपि स्वदेशं रक्षितुम् इच्छति। साधनाभावात् किमपि कर्तुम् असमर्थः स मनसि किञ्चित् विचारयन्नस्ति)*

**प्रतापः** – अरे धिक् माम्। यदि अहं मातृभूमिं रक्षितुं न शक्नोमि, किम् अत्र वासेन मे प्रयोजनम्। *(दीर्घं निःश्वसिति)*

*(ततः प्रविशति कश्चन राजपुत्र-सर्वदारः)*

**सर्वदारः** – (राजोचितं प्रणम्य) विजयतां विजयतां महाराजः।

**प्रतापः** – *(दीर्घं निःश्वस्य मुखम् उन्नमय्य च)* हा धिक्। विजयध्वनिं कृत्वा त्वम् अपि किम् एवं मां लज्जयसे भ्रातः!

**सर्वदारः** – प्राणाधार! किम् इदं भवान् वदति? स्वधर्माय भवता सर्वं किम् अपि कृतम्। स्वाधीनतायै सर्वं किम् अपि सोढम्। भवतः सदा विजयः एव भविष्यति।

**प्रतापः** – कीदृशस्तावद् विजयः? स्वदेशं परित्यक्तुं तु समुद्यतः अस्मि!

**द्वितीयसर्वदारः** – *(उत्थाय साञ्जलिः)* नहि नहि महाराज! यत्र-यत्र भवान् गमिष्यति, तत्र-तत्र वयम् अपि अनुगमिष्यामः।

**प्रतापः** – एवं न वाच्यम्। भवन्तः अत्र स्थित्वा एव मातृभूमेः सेवां कुर्वन्तु।

**तृतीयसर्वदारः** – नहि भगवन्! अस्माकं सेवाः भवता सह सन्ति। वयं तु भवता सह एव निवत्स्यामः।

**प्रतापः** – यद् रोचते भवद्भ्यः, कुर्वन्तु। न अहं भवतः विवशान् करोमि।

*(महाराणा प्रतापेन सह सर्वे अपि अनुचराः ततः उत्थाय भिल्लानाम् आवासस्य मध्यतः*

*निःसरन्ति।)*

**प्रथमः भिल्लः** – हा भगवन्! अद्य कीदृशः समयः आगतः? प्रतापः अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः अस्ति।

**द्वितीयः भिल्लः** – न जाने अस्य मेवाड़देशस्य भाग्ये किं लिखितम् अस्ति। हे दीनदयालो! परमेश्वर!! त्वम् अपि अद्य इयान् निष्ठुरः कथं जातः!

**तृतीयः भिल्लः** – हा धिक्! वराकस्य समीपे न जीवनसामग्री न च युद्धसामग्री एव विद्यते। मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः? *(रोदिति)*

*(भिल्लानां प्रलापं श्रुत्वा)*

**एकः सहचरः** – हा धिक्! एते भिल्लाः सत्यम् एव वदन्ति। अयं समयः देशाय धर्माय च न शोभनः। परं किं क्रियेत? *(असिं निःसार्य प्रतापाय ददत्)* प्रभो! बलिं ददातु मम भवान् अनेन। न आत्मचक्षुषा मेवाड़भूमेः दुर्दशा द्रष्टुं शक्यते।

**द्वितीयः सहचरः** – सत्यम् एव साम्प्रतं जीवनं नरकायते।

**भिल्लाः** – हा! अस्माकम् अपि जीवनेन को लाभः? यदि वयं देशरक्षायै न किम् अपि कर्तुं समर्थाः, तदा मरणम् एव अस्माकं श्रेयस्करम्।

**प्रतापः** – हा धिक्! भवन्तः सर्वे इदं किं कुर्वन्ति? आत्महननं महत्पापं वर्तते। स्थीयतां स्थीयताम्। कष्टानि सोढ्वा वीरगत्या मरणं कल्याणकरं कथ्यते। इत्थम् आत्महननं तु नपुंसकानां कर्म। किञ्चिद् धैर्येण विचारयन्तु।

*(पृष्ठतः ध्वनिः भवति – स्थीयतां स्थीयतां प्रभो! स्थीयतां स्थीयताम्!!)*

**प्रतापः** – *(परिचित-ध्वनिमिव आकर्ण्य सोत्साहम्)* अरे सर्वदार! वृक्षम् आरुह्य दृश्यतां तु तावद् कः अयं शब्दायते?

**सर्वदारः** – *(तथा निपुणं निरीक्षमाणः)* महाराज! मेवाड़मन्त्री भामाशाहः इव कश्चन आगच्छन् प्रतीयते।

**प्रतापः** – हुँ, किम् उक्तम्! भामाशाहः? तस्य कथम् इदं ज्ञातम् अभूत्? अस्तु तावत्, प्रतीक्षामहे तम्। *(भामाशाहः धनराशिग्रन्थिम् आदाय आयाति)*

**भामाशाहः** – *(प्रणम्य)* अन्नदातः! सेवकं सन्त्यज्य क्व प्रस्थीयते श्रीमता?

**प्रतापः** – *(दीर्घं निःश्वस्य)* न क्व अपि बन्धो! गन्तुं शक्यम् अपि तु न। पार्श्वे धनं नैव, न च सेना एव। अहं स्वदेशं कथं रक्षेयम्? अस्माद् एव मनः दोलायितम् अस्ति।

**भामाशाहः** – महाराज! यदा इमान् समाचारान् अशृण्वम् तदा हृदयं मे भग्नम् इव अभवत् *(धनग्रन्थिं निर्दिश्य)* इयं पुनः सम्पत्तिः कस्मै प्रयोजनाय? यदि ईदृशे एव अवसरे न इयम् उपयुज्येत!

**प्रतापः** – भवान् सत्यं वदति।

**भामाशाहः** – यदि एवं, गृह्यतां भवदीया सम्पत्तिः श्रीमता एव। त्रोट्यतां पारतन्त्र्य-शृंखला एभिः

लोहमय-बाहुभि: ! स्वतन्त्र: क्रियतां स्वदेश: !! सुरक्ष्यतां धर्म: !!!

*(धनस्य ग्रन्थिकां चरणयो: अर्पयति सप्रणामम्)*

**प्रताप:** - *(साश्चर्यम्)* किम् इदं भवान् करोति ? भवदीया सम्पत्ति: कथं मदीया ? किम् एतेन न मे अपमान: ? न अहं दत्तां सम्पत्तिं पुनराददामि।

**भामाशाह:** - *(सविनयम्)* महाराज ! न अहम् अपमानं करोमि। का तुच्छ-सेवके शक्ति: यया असौ तथा दु:साहसं कुर्यात्। गृह्यतां महाराज ! गृह्यताम् ! देश-धर्मयो: रक्षा विधीयताम् !

**प्रताप:**- *(सहर्षम् आदाय)* धन्य: असि मन्त्रिवर्य ! धन्य: । त्वदीया जननी धन्या। कथ्यतां तु अभिन्नहृदय ! अस्यां कियती सम्पत्ति: ?

**भामाशाह:** - *(प्रसन्नमुख: प्रणम्य)* महाराज ! इयती एव स्वल्पतमा यद् अनया द्वादशवर्षाणि यावत् पञ्चविंशतिसहस्रसैनिका: सहर्षं योद्धुं शक्नुवन्ति।

**प्रताप:** - अहो ! तदा तु किं कथनीयम् ? महत्कार्यं सेत्स्यति अनया। *(सर्वान् सम्बोध्य)* अद्य अस्मात् एव क्षणात् राणा स्वदेशस्य पारतन्त्र्य-शृंखला: त्रोटयितुं शत्रून् संहारयितुं धर्मं रक्षितुं च योत्स्यते, योत्स्यते अवश्यं योत्स्यते ! *(भामाशाहम् अभिलक्ष्य)* धन्योऽसि मित्र ! धन्य: । एहि त्वां गाढम् आलिङ्गितुम् अभिलषामि।

**भामाशाह:** - *(प्रतापं ससंकोचम् उपसृत्य)* अनुगृहीत: अस्मि स्वामिन् ! अनुगृहीत: ।

*(तत: उभौ अपि प्रेम्णा परस्परम् आलिङ्गत:, द्वयो: मेलनं विलोक्य सर्वे सहचरा: सहर्षम्)*

**धन्योऽस्ति राणा, पुनरस्ति मन्त्री, धन्यं द्वयोर्मेलनमस्ति धन्यम्।**

**धन्या वयं स्म: समयश्च धन्य:, धन्यं पुनर्दर्शनमस्ति पुण्यम्।।**

स्वदेश: विजयताम् ! महाराणा विजयताम् !! भामाशाह: विजयताम् !!!

*(पटाक्षेप:)*

## शब्दार्था:

**अधिपति:** — राजा, **अरण्ये**-वने। **सहचरेण** — सहयोगिना। **शिलायाम्** — पर्वतखण्डे। **उपविष्ट:** — स्थित:। **साधनाभावात्** — साधनानाम् अभावात्। **कश्चन** — कश्चित्। **राजोचितम्** — राजानुरूपम्। **उन्नमय्य** — उत्थाप्य। **स्वाधीनतायै** — स्वतन्त्रतायै, **सोढम्** — विसोढ़म् (सहा)। **समुद्यत:** — सन्नद्ध:। **साञ्जलि:** — अञ्जलि-सहितम् (प्रणामपूर्वकम्)। **अनुगमिष्याम:** — अनुगमनं करिष्याम:। **भिल्ल:** — भील इति भाषायाम्। **नि:सरन्ति** — गच्छन्ति। **परित्यज्य** — त्यक्त्वा, **इयान्** — एतावत्। **निष्ठुर:** — संवेदनाहीन:। **वराकस्य** — असहायस्य। **असिम्** — खड्गम्। **नि:सार्य** — बहि: कृत्वा। **साम्प्रतम्** — अधुना। **नरकायते** — नरकम् इव भवति। **देशरक्षायै** — देशस्य रक्षार्थम्। **श्रेयस्करम्** — उचितम्। **आत्महननम्** — आत्महत्या। **महत्पापम्** — अत्यन्तं पापम्। **स्थीयताम्** — तिष्ठन्तु। **सोढ्वा** — भुक्त्वा। **कल्याणदम्** — कल्याणकारी। **आकर्ण्य** — श्रुत्वा। **सोत्साहम्** — उत्साहपूर्वकम्। **सर्वदार:**

— सरदार इति भाषायाम्। **आरुह्य** — आरोहणं कृत्वा। **निपुणम्** — ध्यानपूर्वकम्। **निरीक्षमाणः** — निरीक्षणं कुर्वन्। **प्रतीयते** — आभासते। **उक्तम्** — वदति। **अभूत्** — अभवत्। **प्रतीक्षामहे** — प्रतीक्षां कुर्महे। **धनराशिग्रन्थिम्** — धनस्य पोटली इति भाषायाम्। **आदाय** — गृहीत्वा। **आयाति** — आगच्छति, **प्रणम्य** — नमस्कृत्य। **अन्नदाता** — भरणपोषणकर्त्ता। **क्व** — कुत्र। **पार्श्वे** — निकटे, **दोलायितम्** — कम्पनयुक्तम्। **उपयुज्येत** — उपयोगं कुर्यात्। **त्रोट्यताम्** — भग्नां कुर्वन्तु। **पारतन्त्र्य शृंखला** — परतन्त्रतायाः बन्धनम्, **भवदीया** — तव, **मदीया** — मम, **आददामि** — स्वीकरोमि। **विधीयताम्** — करोतु। **मन्त्रिवर्यः** — मन्त्रिश्रेष्ठः, **इयती** — एतावती, **शक्नुवन्ति** — समर्थाः भवन्ति। **सेत्स्यति** — सिद्धं भविष्यति। **योत्स्यते** — युद्धं करिष्यति। **गाढ़म** — अत्यधिकम्, **अभिलषामि** — इच्छामि। **ससंकोचम्** — संकोचपूर्वकम्। **उपसृत्य** — निकटं गत्वा। **अनुगृहीतः** — धन्यः।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. महाराणा प्रतापः राजा आसीत् —

(क) मारवाड़ राज्यस्य (ख) मेवाड़ राज्यस्य

(ग) भरतपुरराज्यस्य (घ) अलवरराज्यस्य ( )

२. महाराणा प्रतापः कष्टं स्वीकरोति —

(क) धनसंग्रहणाय (ख) राज्यसुखाय

(ग) देशस्य स्वाधीनतायै (घ) भोजनाय ( )

३. किं महत्पापं वर्तते —

(क) आत्मधनम् (ख) आत्मेच्छा

(ग) आत्महननम् (घ) आत्मप्रशंसा ( )

४. किं कल्याणप्रदं उच्यते —

(क) वीरगत्या मरणम् (ख) आत्महननम्

(ग) परनिन्दा (घ) आत्मप्रशंसा ( )

५. महाराणाप्रतापः कथं स्वदेशं रक्षितुम् इच्छति —

(क) धनैः (ख) प्राणैः

(ग) विचारैः (घ) उद्घोषैः ( )

**लघूत्तरात्मक-प्रश्नाः**

१. महाराणा प्रतापः कुत्र उपविष्टः आसीत्?

२. भामाशाहः कः आसीत्?

३.भामाशाहः किं आदाय प्रतापस्य समीपम् आगच्छति?

४. प्रतापः कस्य अभावे किमपि कर्तुम् असमर्थः?

५. भिल्ला: किं कर्तुम् उद्यता: भवन्ति?

**निबन्धात्मक-प्रश्ना:**

१. प्रताप: अरण्ये उपविष्ट: किमर्थं खिन्न: भवति?

२. आत्महननं किमर्थं महत्पापम् अस्ति?

३. भामाशाह: किं निमित्तं स्वकीयं धनं प्रतापाय अर्पयति?

४. भामाशाह: कियत् धनं प्रतापाय ददाति?

५. धनं प्राप्य महाराणाप्रताप: किं उद्घोषयति?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्ना:**

१. (ख) २. (ग) ३. (ग) ४. (क) ५. (ख)

**लघूत्तरात्मक-प्रश्ना:**

१. अरण्ये एकस्यां शिलायाम् २. मेवाड़मन्त्री ३. धनराशिग्रन्थिम् ४. धनाभावे ५. आत्मबलिदानम्

**व्याकरणा-प्रश्ना:**

१. निम्नलिखितानां समासयुक्तानां पदानां समास-नामोल्लेख-सहितं विग्रहं कुरुत —

| **पदम्** | **विग्रह:** | **समास-नाम** |
|---|---|---|
| (क) महत्पापम् | ...................... | ................... |
| (ख) परमेश्वर: | ...................... | ................... |
| (ग) तुच्छसेवक: | ...................... | ................... |
| (घ) वीरपुरुष: | ...................... | ................... |

२. निम्नलिखितानां पदानां सन्धिविच्छेदं कुरुत —

(क) अनेनैव ................ + ................

(ख) धन्योऽसि ................ + ................

(ग) राजोचितम् ................ + ................

(घ) देह्येतत् ................ + ................

३. कोष्ठकगत-संकेतानुसारं रिक्तस्थानानां पूर्तिं कुरुत —

(क) आवां विद्यालयं ................। (गम्)

(ख) यदा श्याम ................ तदा मोहन: ................। (पच्, खाद्)

(ग) सुधीर: नरेन्द्रेण सह विद्यालये ................। (पठ्)

(घ) युवां अत्र किं ................। (कृ)

४. निम्नलिखितानि वाक्यानि संशोधयत —

(क) पुत्रं सह पिता आगच्छति।

(ख) उदयपुरस्य परितः जलम् अस्ति।

(ग) हरिं नमः

(घ) धर्माय विना न सुखम्।

५. स्थूलाक्षर-पदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत —

(क) **आत्महननं** महत्पापम् अस्ति।

(ख) अनेन द्वादशवर्षाणि यावत् **पञ्चविंशतिसहस्रं** सैनिकाः सहर्षं योद्धुं शक्नुवन्ति।

(ग) महाराणाप्रतापः **अरण्ये एकस्यां शिलायाम्** उपविष्टः वर्तते।

(घ) विजयतां **महाराजः**।

(ङ) भवतां वीरता धीरता च **देशरक्षायै** महान्तं सहयोगं कृतवती।

**प्रयोगात्मक-कार्यम्**

स्व-विद्यालयस्य संस्कृत-दिनोत्सवे, वार्षिकोत्सवे, अन्यस्मिन् वा कस्मिंश्चित् अवसरे अस्य एकाङ्क -नाट्यस्य प्रयोगः (अभिनयः) शिक्षकस्य निर्देशने करणीयः।



# द्वादशः पाठः

राजस्थानप्रदेशस्य पश्चिमाञ्चले प्रसृतास्ति थारमरुभूमिः। राजस्थानीयाः वयं विशेषतः अस्य मरुदेशस्य शोभासम्पदः अक्षयकोषं प्रति अनुरक्ताः गौरवान्विताः च स्मः। न केवलं वयमपितु मरुमहिम्ना आकृष्टाः देशाटनरुचयः वैदेशिकाः अपि मरुसौन्दर्य-दर्शन-वञ्चितान् स्वात्मनः लोचनैर्वञ्चितान् मन्यमानाः मरुदर्शनं कृत्वा आत्मनः धन्यान् मन्यन्ते। राजस्थानी-भाषायाः महाकविः स्वनामधन्यः पद्मश्रीः कन्हैयालालः सेठिया इमामेव भूमिं स्तुवन् 'धरती धोराँ री' इत्यमरं गीतं रचितवान्। आधुनिकाः संस्कृत-कवयोऽपि स्वकाव्येषु मरुभूमि-गौरवगानं कृतवन्तः। प्रस्तुते पाठे कतिपयैः सरलैः श्लोकैः मरुभूमेः अपूर्वसौन्दर्यस्य यथावच्च चित्ताकर्षकं च चारुचित्रं प्रस्तूयते।

## मरुसौन्दर्यम्

**शरीर - विज्ञान - विचक्षणेन प्रशंसितोऽयं चरकेश्वरेण।**
**स्नेहार्द्र-भावैकरसैर्विशिष्टः शुष्कोऽपि नित्यं सरसः स देशः ।। १ ।।**

**मरुः सुवर्णो न हि येन दृष्टः किं तेन दृष्टं कुहचित् सुदृश्यम्।**
**स्फुटं मरौ भान्ति सुमेरुशृङ्गाः शिलासु कृष्णासु न ते हि मृग्याः ।। २ ।।**

**रम्ये क्वचित् सैकत-वप्र-सानौ सुकोमले भास्वति हैमवर्णे।**
**प्रातः प्रदोषे च सुखं स्थितानां केषां न चेतांसि विकासवन्ति ।। ३ ।।**

**स शीतलो गन्धवहः समीरः स तित्तिराणां मधुरो विरावः।**
**तन्नर्तनं बर्हविभूषणानां समुत्प्लुतिः सा च कुरङ्गमाणाम् ।। ४ ।।**

**ते तुन्दिलाः स्वादुरसाः कलिङ्गाः सा शारदी चञ्चलचन्द्रिका च।**
**स्फूर्तिः स्फुरन्ती स्फुरगावलीषु क्रमेलकानां गतयश्च तास्ताः ।। ५ ।।**

**वर्षागमे चारुमरुं विहाय क्वान्यत्र कस्यापि रमेत चित्तम्।**
**सरःसु वर्षासमयेऽपि यस्मिन् शरत्-प्रसन्नं सलिलं चकास्ति ।। ६ ।।**

**गावः प्रसन्नाः मनुजाः प्रसन्नाः देवाः प्रसन्नाः व्रतदानयज्ञैः।**
**किं नाम तद्यन्न मरौ समृद्धं विद्या-समृद्धो भवता विधेयः ।। ७ ।।**

-पं. विद्याधरः शास्त्री

**मानं मनीषिता मैत्री मरुदुष्णं मरीचिका।**
**मृगाः मूर्ध्नि मनुष्याणाम् उष्णीषं प्रमुखम्मरौ ।।८ ।।**

–अज्ञातमूलं सम्पादितञ्च

## अन्वयः

१. शरीरविज्ञानविचक्षणेन चरकेश्वरेण प्रशंसितः सः अयं देशः शुष्कः अपि (सन्) स्नेहार्द्रभावैकरसैः विशिष्टः (अतः) नित्यं सरसः (अस्ति)।

२. सुवर्णः मरुः येन न हि दृष्टः तेन कुहचित् सुदृश्यं किं दृष्टम्? (ये) सुमेरुशृङ्गाः मरौ स्फुटं भान्ति, कृष्णासु शिलासु ते नहि मृग्याः।

३. क्वचित् रम्ये सुकोमले भास्वति हैमवर्णे सैकतवप्रसानौ प्रातः प्रदोषे च सुखं स्थितानां केषां चेतांसि विकासवन्ति न?

४. स शीतलः गन्धवहः (च) समीरः, तित्तिराणां स मधुरः विरावः, बर्हविभूषणानां तत् नर्तनम्, सा च कुरङ्गमाणां समुत्प्लुतिः।

५. ते तुन्दिलाः स्वादुरसा कलिङ्गाः, सा च शारदी चञ्चल-चन्द्रिका, स्फुरगावलीषु स्फुरन्ती (सा) स्फूर्तिः, क्रमेलकानां च ताः ताः गतयः।

६. वर्षागमे चारुमरुं विहाय अन्यत्र क्व कस्यापि चित्तम् रमेत? यस्मिन् (मरौ) वर्षासमयेऽपि सरःसु शरत्प्रसन्नं सलिलं चकास्ति।

७. (मरौ) गावः प्रसन्नाः, मनुजाः प्रसन्नाः व्रतदानयज्ञैः च देवाः प्रसन्नाः। किं नाम तत् यत् मरौ न समृद्धम्? (सोऽयं मरुः) भवता विद्यासमृद्धो विधेयः।

८. मानं, मनीषिता, मैत्री, उष्णं मरुत्, मरीचिका, मृगाः, मनुष्याणां मूर्ध्नि उष्णीषम्— (इत्येतत्सर्वं) मरौ प्रमुखम्।

## शब्दार्थाः

**शरीरविज्ञान-विचक्षणेन** — शरीरविज्ञानस्य=चिकित्साशास्त्रस्य विचक्षणेन=विशेषज्ञेन, चिकित्सकेन वैद्येन वा इत्यर्थः। **चरकेश्वरेण**— आचार्य-चरकेण। **स्नेहार्द्रभावैकरसैः विशिष्टः** — स्नेहेन आर्द्रःभावः स्नेहार्द्रभावः, केवलं तद्रसैः विशिष्टः=युक्तः। अत्र अर्थद्वयम् — १. घृतादि की चिकनाई के एकमात्र रसों से २. प्रेम और दयादि भावों की एकमात्र मधुरताओं से। **शुष्कः अपि**- रूक्षः अपि। **सरसः** - रसेन सहितः रसयुक्तः। अत्रापि अर्थद्वयम् — १. स्वादिष्ठम् २. आनन्दमयः। **सुवर्णः** — सुन्दरः, सुन्दरवर्णयुक्तः, स्वर्णरूपः (सुरंगा-रंगीला)। **मरुः** — मरुप्रदेशः, सुमेरुपर्वतः **दृष्टः** — अवलोकितः। **कुहचित्** — कुत्रचित् (कहीं पर)। **सुदृश्यम्** — दर्शनीयम्। **मरौ** — मरुदेशे। **स्फुटम्** — स्पष्टम्। **भान्ति** — शोभन्ते। **सुमेरुशृङ्गाः** — सुमेरुपर्वतस्य शिखराणि। **कृष्णासु** — श्यामासु। **मृग्याः** — अन्वेषणीयाः। **क्वचित्** — कुत्रचित्। **रम्ये** — रमणीये। **सुकोमले** — मृदौ। **भास्वति** — द्युतिमाने,

ज्योतिर्मये। **हैमवर्णे** — स्वर्णिमे। **सैकतवप्र-सानौ**— सैकतवप्रः=बालुकास्तूपः, बालुका-पर्वतः वा तस्य सानौ=शिखरे (मिट्टी के टीलों या धोरों की चोटी पर)। **प्रदोषे** — निशीथकाले, रात्रौ। **सुखम्** — सुखपूर्वकम्, सानन्दम्। **स्थितानाम्** — उपविष्टाणाम्। **केषाम्** — केषां जनानाम्। **चेतांसि** — मनांसि। **विकासवन्ति** — विकसितानि, प्रफुल्लानि। **गन्धवहः** — गन्धं=सौरभं वहति इति। **समीरः** — वायुः। **तित्तिराणाम्** — पक्षिविशेषाणाम्, 'तीतर' इत्याख्यानाम्। तीतरों का। तित्ति इति शब्दं करोति इति तित्तिरः। **विरावः** — कूजनम्, कूजितम्, ध्वनिः। **बर्हविभूषणानाम्** —बर्हः=पुच्छः एव विभूषणं येषां ते मयूराः, तेषाम्। मोरों का। **नर्तनम्** — नृत्यम्। **कुरङ्गमाणाम्** — कुरङ्गमः=हरिणः, तेषाम्। हरिणों की। **तुन्दिलाः** — स्थूलाः। मोटे। **स्वादुरसाः** — सुमधुराः। **कलिङ्गाः** — कलिङ्गः इति देशविशेषः। किन्तु अत्र फल-विशेषः। मतीरे। **शारदी** — शरत्कालीना। **चञ्चल-चन्द्रिका**- चञ्चला चन्द्रज्योत्स्ना। **स्फुरगावलीषु** — खगपङ्क्तिषु। **स्फुरन्ती** — स्पन्दमाना-फड़कती हुई, दमकती हुई। **स्फूर्तिः** — स्फुरणम्। **क्रमेलकानाम्** — उष्ट्राणाम्। **गतयः** — गमनप्रकाराः, चाल इति। **वर्षागमे** — वृष्टिकाले। **चारु-मरुम्** — सुन्दरं मरुदेशम्। **विहाय** — त्यक्त्वा। **क्व** — कुत्र। **चित्तम्** — मनः। **रमेत** — रमणं कुर्यात्। **सरःसु** — सरोवरेषु, तडागेषु। **शरत्प्रसन्नम्** — शरदृतौ इव प्रसन्नं=स्वच्छं, निर्मलम्। शरद् ऋतु के समान साफ। **सलिलम्** — जलम्, पयः। **चकास्ति** — शोभते। **गावः** — धेनवः। **प्रसन्नाः** — तुष्टाः। **मनुजाः** — मानवाः। **व्रतदानयज्ञैः** — व्रतेन दानेन यज्ञेन च। **विद्यासमृद्धो** — विद्यया समृद्धः=सम्पन्नः। **विधेयः** — विधातव्यः, सम्पादनीयः, करणीयः। **मानम्** — सम्मानः, आदरः। **मनीषिता** — विद्वत्ता, विचारशीलता। **मैत्री** — मित्रता। **मरुत्** — वायुः। **मरीचिका** — मृगतृष्णा, मृगमरीचिका। **मूर्ध्नि** — शिरसि, मस्तके। **उष्णीषम्** — शिरोवेष्टनम्, शिरस्त्राणम्, पगड़ी इति।

## अभ्यासः

**वस्तुनिष्ठ-प्रश्नाः**

१. पाठेऽस्मिन् 'शरीर विज्ञान-विचक्षणः' इति विशेषणं कस्य कृते प्रयुक्तम् —

(अ) आचार्य-चरकस्य (आ) आचार्य-चार्वाकस्य

(इ) आचार्य-सुश्रुतस्य (ई) आचार्य वाग्भटस्य ( )

२. 'मरुः सुवर्णो नहि येन दृष्टः'- इत्यस्य अर्थोऽस्ति —

(अ) मरुभूमौ येन स्वर्णम् (काञ्चनम्) न दृष्टम्।

(आ) मरुभूमौ सुन्दरः वर्णः (रङ्ग) येन न दृष्टः।

(इ) स्वर्णस्य मरुप्रदेशः येन न दृष्टः

(ई) सुवर्णः (सुरङ्ग) स्वर्णरूपः वा मरुदेशः येन न दृष्टः। ( )

३. 'सैकतवप्रसानुः' इत्यस्य कृते प्रयुक्तं विशेषणमस्ति —

(अ) रम्यः (आ) सुकोमलः

(इ) हैमवर्णः (ई) उपर्युक्तानि सर्वाणि अपि( )

४. मरोः सौन्दर्यम् वर्धते विशेषतः —

(अ) वसन्तर्तौ (आ) शीतर्तौ

(इ) ग्रीष्मर्तौ (ई) वर्षर्तौ ( )

५. मरुदेशे के प्रसन्नाः सन्ति —

(अ) गावः (आ) मनुजाः

(इ) देवाः (ई) एते सर्वेऽपि ( )

६. 'मानं मनीषिता' इत्यादिपद्यानुसारं कियन्ति वस्तूनि मरुदेशे मुख्यानि प्रतिपादितानि —

(अ) पञ्च (आ) सप्त

(इ) अष्टौ (ई) नव ( )

**लघूत्तरात्मक-प्रश्नाः**

१. अधोलिखित- प्रश्नानाम् उत्तराणि लिखन्तु —

(क) चरकाचार्येण मरुभूमेः का विशेषता प्रकटिता ?

(ख) मरुदेशे सैकतवप्राः (बालुका-स्तूपाः) कीदृशाः सन्ति ?

(ग) वर्षागमे मरोः शोभा कीदृशी भवति ?

(घ) मरुमरीचिकां स्पष्टीकुर्वन्तु।

२. 'क'-खण्डं 'ख'-खण्डेन यथोचितं योजयतु —

| क | ख |
|---|---|
| १. चरकः | विरावः |
| २. बर्हविभूषणाः | उष्णीषम् |
| ३. गन्धवहः | तुन्दिलाः |
| ४. मूर्धा | समुत्प्लुतिः |
| ५. तित्तिराः | नर्तनम् |
| ६. कलिङ्गाः | शरीर-विज्ञानम् |
| ७. कुरङ्गमाः | समीरः |

३. अधोलिखित-पदानां पर्यायपदानि पाठाद् अन्विष्य लिख्यन्ताम् —

| | |
|---|---|
| १. विशेषज्ञः | विचक्षणः |
| २. रूक्षः | ............... |
| ३. वायुः | ............... |
| ४. उष्ट्रः | ............... |
| ५. शिरस्त्राणम् | ............... |
| ६. हरिणः | ............... |
| ७. मयूरः | ............... |

८. निशाकालः/निशारम्भः ...............

४. अधस्तनपदानां विलोमपदानि पाठात् चित्वा लिखन्तु —

१. शुष्कः सरसः
२. निन्दितः ...............
३. उष्णः ...............
४. खिन्नः ...............
५. दरिद्रः ...............
६. अपमानम्, अपमानः ..............
७. कृशः ..............
८. कठोरः ..............

५. अधस्तन-पदानि आधृत्य (उदाहरणं च अनुसृत्य) संस्कृतेन वाक्य-निर्माणं कुर्वन्तु —

१. अयम् अयं भारतदेशः विश्वगुरुः इति कथ्यते।
२. विहाय ................................................
३. प्रातः ................................................
४. प्रदोषे ................................................
५. मैत्री ................................................

६. स्थूलाक्षरपदमाश्रित्य संस्कृतेन प्रश्नवाक्य-निर्माणं क्रियताम् —

१. **अयं** देशः शुष्कः अपि सरसः। कः देशः शुष्कः अपि सरसः ?
२. मरौ **तुन्दिलाः** कलिङ्गाः भवन्ति। ....................................
३. **प्रदोषे** चेतांसि विकसन्ति। ....................................
४. **सुमेरुशृङ्गाः** मरौ भान्ति। ....................................
५. **तित्तिराणां** विरावः मधुरः। ....................................
६. **मरुदेशः** चरकेश्वरेण प्रशंसितः। ....................................

**निबन्धात्मक-प्रश्नाः**

१. मरुभूमेः सौन्दर्यम् अवलम्ब्य दश संस्कृत-वाक्यानि लिखन्तु।
२. मरुदेशस्य वर्षाकालिकं माहात्म्यं वर्णयन्तु।
३. 'रम्ये क्वचित्.....विकासवन्ति'-इत्यस्य पद्यस्य हिन्द्यनुवादो विधेयः।
४. 'सः शीतलो......कुरङ्गमाणाम्'-इत्यस्य पद्यस्य संस्कृत-व्याख्या विधेया।

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (अ) २. (ई) ३. (ई) ४. (ई) ५. (ई) ६. (आ)

**व्याकरण-प्रश्नाः**

१. सन्धिविच्छेदं/सन्धिं वा कुर्वन्तु —

| | |
|---|---|
| १. प्रशंसितोऽयम् | ......................+................. |
| २. शुष्कः+अपि | ......................................... |
| ३. तत्+नर्तनम् | ......................................... |
| ४. तास्ताः | ......................+................. |
| ५. क्वान्यत्र | ......................+................. |
| ६. कस्य+अपि | ......................................... |
| ७. समये+अपि | ......................................... |
| ८. यन्न | ......................+................. |
| ९. चरक+ईश्वरः | ......................................... |
| १०. गतयश्च | ......................+................. |

२. अधोलिखितेषु पदेषु प्रकृतिप्रत्यय-विभागं कुर्वन्तु —

| **पदम्** | **उपसर्गः** | + | **धातुः** | + | **प्रत्ययः** |
|---|---|---|---|---|---|
| १. विशिष्टः | वि | + | शिश् | + | क्त |
| २. प्रशंसितः | ...................................................... | | | | |
| ३. दृष्टः | ...................................................... | | | | |
| ४. सुदृश्यम् | ...................................................... | | | | |
| ५. नर्तनम् | ...................................................... | | | | |
| ६. समुत्प्लुतिः | ...................................................... | | | | |
| ७. स्फुरन्ती | ...................................................... | | | | |
| ८. गतिः | ...................................................... | | | | |
| ९. विहाय | ...................................................... | | | | |
| १०. प्रसन्नम् | ...................................................... | | | | |
| ११. मनीषिता | ...................................................... | | | | |

३. निम्नलिखितेषु पदेषु समासः करणीयः —

| | |
|---|---|
| १. शरीरस्य विज्ञानम् | शरीरविज्ञानम् |
| २. सुमेरोः शृङ्गाः | .................. |
| ३. मयूराणां नर्तनम् | .................. |
| ४. विद्यया समृद्धः | .................. |
| ५ सैकतस्य वप्रः | .................. |

४. अधोलिखितानां समस्तपदानां विग्रहं कुर्वन्तु–

| | |
|---|---|
| १. कृष्णशिलासु | कृष्णासु शिलासु |
| २. स्नेहार्द्रः | .................. |
| ३. मधुरविरावः | .................. |
| ४. क्रमेलकगतिः | .................. |
| ५. विद्यासमृद्धः | .................. |
| ६. चञ्चलचन्द्रिका | .................. |

५. वाच्य–परिवर्तनं (कर्तृवाच्याद् कर्मवाच्यम्, कर्मवाच्याद् वा कर्तृवाच्यम्) कुर्वन्तु –

| | |
|---|---|
| १. अयं चरकेण प्रशंसितः। | चरकः इमं प्रशंसितवान्। |
| २. येन मरुः न दृष्टः। | ............................. |
| ३. सः किम् अपश्यत्? | ............................. |
| ४. तित्तिरैः मधुरः विरावः क्रियते। | .............................. |
| ५. देवाः प्रसन्नाः भवन्ति। | .............................. |

# त्रयोदशः पाठः

*अस्यां राजस्थान-भूमौ अन्नोत्पादने न्यूनाधिक्यं भवतु नाम, परन्तु वीरोत्पादने अत्र कदापि न्यूनता नासीत्, अतएव वीरप्रसविनी भूरियमुच्यते इतिहासविद्भिः कविभिश्च। यथा अत्रत्य महाराणा-प्रतापस्य यशोगानं सर्वत्र श्रूयते तथैव भरतपुरस्य महाराजः सूरजमल्लः अपि आभारतम् अतीव प्रसिद्धोऽस्ति। अस्मिन् पाठे तस्यैव अमलं जीवन-चरितम् अतिसंक्षेपेण प्रस्तूयते।*

## महाराजः सूरजमल्लः विजयते

महाराजस्य सूरजमल्लस्य जन्म वसन्तपञ्चम्याम् (१३ फेब्रवरी-दिने) १७०७ तमे ईस्वीयवर्षे अभवत्। स हि महाराजस्य बदनसिंहस्य ज्येष्ठपुत्रः तस्योत्तराधिकारी चासीत्। सूरजमल्लस्य अपरम् एकं नाम सुजानसिंहः इत्यासीत्। अष्टादश-शताब्दस्य भारतस्य नायकेषु अन्यतमः आसीत् सूरजमल्लः। तस्य जनिः तदा अभूत् यदा भारतदेशस्य राजनीतिः अत्यन्तं दोलायमाना आसीत्, भारतं च विध्वंसक-शक्तीनां बाहुपाशे सर्वथा निबद्धम् आसीत्। नादिरशाहः, अहमदशाहः अब्दाली इत्येताभ्यां पापिभ्याम् उत्तर-भारते महता प्रमाणेन नरवधाः गोवधाश्च क्रियन्ते स्म, तीर्थानि मन्दिराणि च विध्वस्तानि क्रियन्ते स्म। भारतं लुण्ठितुम् आगच्छतः बाह्याक्रमणकारिणः निरोद्धुं न कोऽपि शासकः सज्जः आसीत्।

मल्लेषु मल्लः सूरजमल्लः शरीर-सौष्ठवस्य, सौन्दर्यस्य, सरलतायाः, चारित्रिक-दृढ़तायाः, धार्मिकतायाः, वीरतायाः, करुणायाः, त्यागस्य, बलिदानस्य, शरणागत-रक्षणस्य, प्रजावात्सल्यस्य, राष्ट्रवादस्य, सर्वपन्थसमादरस्य च साक्षात् प्रतिमूर्तिरासीत्। सूरजमल्लः स्वकालखण्डस्य अत्यन्तं दुर्धर्षः, अतिशयेन तेजस्वी, नितान्तं नीतिनिपुणः, अद्वितीयश्च योद्धा आसीत्। तेन प्रायशः सप्तसु महत्युद्धेषु विजयश्रीः चुम्बिता। कविः सूदनः स्वकीये 'सुजानचरितम्' इति काव्ये तेषां सप्त-युद्धानां रोमाञ्चकं सजीवं च वर्णनम् अकरोत्।

रणाङ्गणे पाणियुगलेन खड्गं चालयन्तं तं वीक्ष्य तस्यारयोऽपि विस्मिताः जायन्ते स्म। युद्धरतस्य मल्लस्य अस्य शौर्य-वर्णनं कुर्वन् प्रसिद्धः कविवरः सूर्यमल्ल-मिश्रणः 'वंशभास्कर'-ग्रन्थे डिंगळ-भाषायां लिखति-

**सह्यो भलैं ही जट्टनी, जय अरिष्ट अरिष्ट।**
**जिहिं जाठर रविमल्ल हुव, आमेरन को इष्ट।।**

अस्य पद्यस्य हिन्दीच्छाया किञ्चिदित्थम् —

**नहीं जाटनी ने सही, व्यर्थ प्रसव की पीर।**
**जन्मा उसके गर्भ से, सूरजमल सा वीर।।**

महाराणा-प्रतापस्य छत्रपति-शिवाजिमहाराजस्य चाऽनन्तरं महाराजः सूरजमल्लः एव सः वीरः यः उत्साह-साहस-चातुरी-दृढ़तादिबलेन मुगलसाम्राज्यस्य उपरि प्रत्यक्षं प्रहारम् अकरोत्। तत्समक्षं मुगलानाम् अहङ्कारस्य नैकवारं पराजयः अभवत्। मीरबख्शी सलावतखान-सदृशः शासकोऽपि तेन सह सन्धिं करोति यद् अद्यारभ्य अहं पिप्पलवृक्षच्छेदनं-गोहननं-मन्दिरादिध्वंसनं च नैव करिष्यामि। इदं सूरजमल्लस्य प्रभावशालितायाः एकं निदर्शनम्। तदानीन्तनः न कोऽपि भारतीय-शासकः मल्लेन तुल्यः दृश्यते। अष्टादश-शताब्दस्य प्रायशः सर्वेऽपि इतिहासज्ञाः वृत्तान्त-लेखकाश्च तं मुक्तकण्ठं प्रशंसन्ति।

जाट-जातौ सूरजमल्लः तदेव स्थानं धत्ते यत्खलु स्थानं विदेशीयेषु प्लेटो-नेपोलियन-लूथर इत्यादीनामस्ति। कश्चिदेकः लेखकस्तु तं '**जाट-प्लेटो**' इति विरुदेन भूषितवानेव। हिन्दु-इतिहासज्ञाः तं १८ शताब्दस्य '**कनिष्कः**' इति मुस्लिमाश्च तं '**अन्तिमः प्रतापी हिन्दु-नरेशः**' इति घोषितवन्तः। औपचारिक-शिक्षा-रहितोऽपि सूरजमल्लः वस्तुतः समकालीनेषु वीरेषु भीमः, नीतिज्ञेषु कृष्णः, अर्थशास्त्रज्ञेषु च कौटिल्यः आसीत् इति मन्यते। सैय्यद गुलाम अली नकवी स्वीये '**इमादुस्सादात**' इत्याख्ये ग्रन्थे लिखति यत् राजनीतेः, राजस्वस्य, नागरिक-न्यायस्य च प्रबन्ध-नैपुण्ये आसफजाह-बहादुर-निजामं विहाय हिन्दुस्थाने तत्समये नैकोऽपि कश्चिद् तत्तुल्यः आसीत्।

'**इळा न देणी आपणी**' इति मातृशिक्षां पालयन्, '**धर्म्याद् हि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते**' इति गीतोपदेशं च परिपालयन् राष्ट्रधर्म-रक्षणाय प्राणान् पणीकृत्य अपि युध्यमानः २५ डेसेम्बर १७६३ ई. इति दिवसे रणे चाभिमुखे हतः।

प्रताप इव, शिवाजी इव, बन्दा बैरागी इव, गुरुगोविन्दसिंह इव च महाराजस्य सूरजमल्लस्य परमः प्रभावः अद्यापि इतिहासे गुञ्जति इव।

## शब्दार्थाः

**दोलायमाना** — अस्थिरा (डोलती हुई, झूलती हुई)। **बाहुपाशे** — भुजयोः बन्धने (भुजाओं के बन्धन में)। **विध्वस्तानि** — विनष्टानि। **लुण्ठितुम्** — लुण्ठनाय, हर्त्तुम् (लूटने के लिए)। **निरोद्धुम्** — अवरोद्धुम् (रोकने के लिए)। **मल्लेषु** — वीरेषु। **दुर्धर्षः** — अनुल्लंघनीयः, अनतिक्रमणीयः (जिसे आसानी से दबाया या हराया न जा सके)। **नीतिनिपुणः** — नीतौ निपुणः (नीति में चतुर)। **रणाङ्गणे** — युद्ध-क्षेत्रे। **पाणियुगलेन** — करयुग्मेन (दोनों हाथों से)। **अरयोऽपि** — शत्रवः अपि। **वीक्ष्य** — दृष्ट्वा। **खड्गं** — असिम् (तलवार को)। **नैकवारम्** — बहुवारम्। **तदानीन्तनः** — तत्कालीनः (उस समय का)। **तत्तुल्यः** — तेन तुल्यः (उसके समान)। **इळा** — पृथ्वी, भूमिः। **श्रेयः** — कल्याणम्। **प्राणान् पणीकृत्य** — प्राणानां पणं कृत्वा (प्राणों की बाजी लगाकर)। **युध्यमानः** — युद्धरतः। **अभिमुखे** — सम्मुखे (सामना करते हुए)। **इळा न देणी आपणी** — स्वकीया मातृभूमिः न दातव्या।

## सन्धिविच्छेदः

| | | |
|---|---|---|
| भूरियमुच्यते | – | भूः + इयम् + उच्यते |
| चासीत् | – | च + आसीत् |
| बाह्याक्रमणकारिणः | – | बाह्य + आक्रमणकारिणः |
| प्रतिमूर्तिरासीत् | – | प्रतिमूर्तिः + आसीत् |
| रणाङ्गणे | – | रण + अङ्गणे |
| तस्यारयोऽपि | – | तस्य + अरयः + अपि |
| चाऽनन्तरम् | – | च + अनन्तरम् |
| नैकवारम् | – | न + एकवारम् |
| शासकोऽपि | – | शासकः + अपि |
| अद्यारभ्य | – | अद्य + आरभ्य |
| वृक्षच्छेदनम् | – | वृक्ष + छेदनम् |
| नैव | – | न + एव |
| इत्याख्ये | – | इति + आख्ये |
| नैकोऽपि | – | न + एकः + अपि |
| श्रेयोऽन्यत् | – | श्रेयः + अन्यत् |
| गीतोपदेशम् | – | गीता + उपदेशम् |
| चाभिमुखे | – | च + अभिमुखे |
| अद्यापि | – | अद्य + अपि |

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. महाराजस्य सूरजमल्लस्य अन्यत् नाम आसीत् —

(अ) सज्जनसिंहः (आ) सुजानसिंहः

(इ) सुरजनसिंह (ई) बदनसिंह ( )

२. महाराजः सूरजमल्लः आसीत् —

(अ) जाट-राजा (आ) मराठा-राजा

(इ) सिक्ख-राजा (ई) राजपूत-राजा ( )

३. सूदन-कवेः सूरजमल्लविषयकं काव्यमस्ति —

(अ) रामचरितम् (आ) सूरजमल्लचरितम्

(इ) सुजानचरितम् (ई) भूपालचरितम् ( )

४. 'वंशभास्कर' इति ख्यातस्य ग्रन्थस्य रचनाकारोऽस्ति —

(अ) भास्कराचार्यः (आ) सूर्यमल्ल-मिश्रणः

(इ) मल्लिनाथः (ई) महाराजः सूरजमल्लः ( )

५. सूरजमल्लस्य कालः अस्ति —

(अ) नवमी शती ई. (आ) दशमी शताब्दी ई.

(इ) अष्टादश-शताब्दः ई. (ई) विंश-शताब्दः ई. ( )

६. धर्म्याद् हि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते — इति वचनमस्ति —

(अ) श्रीमद्भगवद्गीतायाम् (आ) रामायणे-युद्धकाण्डे

(इ) पुराणेषु (ई) रघुवंशे ( )

**लघूत्तरात्मक-प्रश्नाः**

१. महाराज-सूरजमल्लस्य पितुर्नाम किमासीत्?

२. 'जाट-प्लेटो' कः कथ्यते?

३. सूरजमल्लस्य औपचारिक-शिक्षा-विषये भवन्तः किं जानन्ति?

४. सुजान-चरित-काव्ये सूरजमल्लस्य कति युद्धानां वर्णनम् उपलभ्यते?

५. सूरजमल्लस्य जन्म कदा अभवत्?

६. सूरजमल्लस्य मृत्युः कदा कथं च अभवत्?

**निबन्धात्मक-प्रश्नाः**

१. सूरजमल्लस्य जन्म-समये भारतवर्षस्य परिस्थितिः कीदृशी आसीत्?

२. सूरजमल्लमहाराजस्य गुणान् वर्णयन्तु।

## उत्तर-माला

**वस्तुनिष्ठ-प्रश्ना**

१. (आ) २. (अ) ३. (इ) ४. (आ) ५. (इ) ६. (अ)






# चतुर्दशः पाठः

*पञ्चतन्त्रं नीतियुतानां सरल-सरस-सदुपदेशात्मिकानां कथानां संग्रहोऽस्ति। पञ्चतन्त्रस्य रचना पण्डित विष्णुशर्मणा सरलोपायेन नीतिज्ञानप्रदानाय कृता। स्वाद्भुत-भाषा-शैल्याः अयं ग्रन्थः विश्वस्मिन् जगति प्रसिद्धोऽस्ति। संसारस्य नैकासु भाषासु अस्यानुवादो लभ्यते।*

*पञ्चतन्त्रनामात्मकेऽस्मिन् ग्रन्थे पञ्चतन्त्राणि सन्ति — १. मित्रभेदः २. मित्रसम्प्राप्तिः ३. काकोलूकीयम् ४. लब्धप्रणाशः ५. अपरीक्षित-कारकञ्चेति।*

*प्रस्तुतोऽयं पाठः पञ्चतन्त्रस्य चतुर्थतन्त्रस्य लब्धप्रणाशस्य प्रथमायाः कथायाः सारः वर्तते। अस्मिन् पाठे गङ्गदत्तनामकः मण्डूकः कदाचिद् स्वीयजनैः अपमानितः सन् प्रतिशोधभावनया तेषां प्रत्यपकाराय प्रियदर्शनं नाम सर्पं आह्वयति। सर्पश्च सर्वान् बन्धुवर्गान् भक्षयति। तत्रान्तरे सर्वेषां बन्धुवर्गाणां समाप्तौ सति सः सर्पः गङ्गदत्तस्य शिशूनपि भक्षयति। कथा सन्दिशति — यया दुष्टतया गङ्गदत्तेन स्वबान्धवाः हताः, तया एव तस्य पुत्राः अपि कालकवलिताः। उक्तं हि-''यो यद्वपति बीजं हि लभते तादृशं फलम्।''*

## यो यद्वपति बीजं हि लभते तादृशं फलम्

कस्मिंश्चिद् कूपे गङ्गदत्तो नाम मण्डूकः प्रतिवसति स्म। स कदाचिद् दायादैः उद्वेजितः अरघट्टघटीम् आरुह्य निष्क्रान्तः। अथ तेन चिन्तितं यत् ''कथं तेषां दायादानां मया प्रत्यपकारः कर्त्तव्यः ?'' एवं चिन्तयन् बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्। तं दृष्ट्वा भूयोऽप्यचिन्तयत् यत् ''एनं तत्र कूपे नीत्वा सकलदायादानाम् उच्छेदं करोमि।''

एवं विभाव्य बिलद्वारं गत्वा तम् आहूतवान् — एहि, एहि प्रियदर्शन, एहि! तच्छ्रुत्वा सर्पोऽचिन्तयत्- ''य एषः माम् आह्वयति, न स स्वजातीयः। यतो नैषा सर्पवाणी। तदत्रैव दुर्गे स्थितस्तावद् वेद्मि-कोऽयमिति ?'' आह च- 'भोः को भवान् ?' स आह-''भोः गङ्गदत्तो नाम मण्डूकाधिपतिः त्वत्सकाशे मैत्र्यर्थमभ्यागतः।'' तच्छ्रुत्वा सर्प आह- ''भो अश्रद्धेयमेतत् यत् तृणानां वह्निना सह संगमः।''

गङ्गदत्त आह-''भोः सत्यमेतत्। स्वभाववैरी त्वमस्माकं, परं परपरिभवात् प्राप्तोऽहं ते सकाशम्।'' सर्प आह-''कथय, कस्मात्ते परिभवः ?'' स आह-''दायादेभ्यः''। सोऽप्याह-''क्व ते आश्रयः, कूपे, तडागे, ह्रदे वा ? तत् कथय स्वाश्रयम्।'' तेनोक्तम्-''पाषाणचयनिबद्धे कूपे''। सर्प आह-''अपदा वयम्। तन्नास्ति मे तत्र प्रवेशः। प्रविष्टस्य च, स्थानं नास्ति, यत्र स्थितस्तव दायादान् व्यापादयामि। तद् गम्यताम्।''

गङ्गदत्त आह-''भोः समागच्छ त्वम्। अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि। तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति तत्र स्थितस्त्वं लीलया दायादान्-व्यापादयिष्यसि।''

तच्छ्रुत्वा सर्पो व्यचिन्तयत्–"अहं तावत् परिणतवयः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि। तत् सुखावहो जीवनोपायोऽयमनेन कुलाङ्गारेण मे दर्शितः। तद् गत्वा तान् मूषकान् भक्षयामि" इति।

एवं विचिन्त्य तमाह–"भो गङ्गदत्त! यद्येवं तदग्रे भव, येन तत्र गच्छावः।" गङ्गदत्त आह–"भोः प्रियदर्शन! अहं त्वां सुखोपायेन तत्र नेष्यामि, स्थानं च दर्शयिष्यामि। परं त्वयाऽस्मत्परिजनो रक्षणीयः। केवलं यानहं तव दर्शयिष्यामि, त एव भक्षणीयाः" इति। सर्प आह–"साम्प्रतं त्वं मे मित्रं जातम्। तन्न भेतव्यम्। तव वचनेन भक्षणीयास्ते दायादाः।" एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च, तेनैव सह प्रस्थितः।

अथ कूपम् आसाद्य अरघट्टघटिकामार्गेण सर्पस्तेन सह तस्यालयं गतः। ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे धृत्वा दर्शितास्ते दायादाः। ते च तेन शनैः शनैर्भक्षिताः। अथ मण्डूकाभावे सर्पेणाभिहितम्– "भद्र, निःशेषितास्ते रिपवः। तत् प्रयच्छान्यन्मे किञ्चित् भोजनं यतोऽहं त्वयात्रानीतः।" गङ्गदत्त आह–'भद्र, कृतं त्वया मित्रकृत्यं, तत्साम्प्रतमनेनैव घटिकायन्त्रमार्गेण गम्यताम्' इति। सर्प आह–"भो गङ्गदत्त, न सम्यगभिहितं त्वया। कथमहं तत्र गच्छामि? मदीयं बिलदुर्गमन्येन रुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत् सर्वानपि भक्षयिष्यामि" इति।

तच्छ्रुत्वा गङ्गदत्तो व्याकुलमना व्यचिन्तयत्–"अहो, किमेतन्मया कृतं सर्पमानयता? तद् यदि निषेधयिष्यामि तत् सर्वानपि भक्षयिष्यति।"

एवं चिन्तयतस्तस्य तेन सर्पेण शनैः शनैः सकलमपि मण्डूककुलं यथाकालं कवलितम्।

साध्विदमुच्यते– यो यद् वपति बीजं हि लभते तादृशं फलम्।

## शब्दार्थाः

**दायादैः** — स्ववंशीयजनैः (अपने कुटुम्बियों के द्वारा)। **उद्वेजितः** — क्षुब्धः (तंग किया गया)। **अरघट्टघटीम्** — अरहटडोलिकाम् (रहट में प्रयोग किया जाने वाला डोला)। **प्रत्यपकारः** — अपकारस्य प्रतिकारः (अपकार का बदला)। **उच्छेदम्** — विनाशम् (विनाश)। **विभाव्य** — विचार्य (विचार करके)। **वह्निना** — अग्निना (अग्नि का)। **सकाशम्** — निकटम् (निकट)। **परपरिभवात्** — परैः कृतापमानात्/तिरस्कारात् (दूसरे के द्वारा किये अपमान से)। **वाप्याम्** — (वापी में)। **कूपे** — (कुएँ में)। **तडागे** — (तालाब में)। **ह्रदे** — गभीरे जलाशये (गहरे जलाशय में)। **पाषाणचयनिबद्धे** — पाषाणखण्डैः निबद्धः (कूपः) तस्मिन् (पत्थरों के समूह से बने हुए में)। **अपदाः** — पदरहिताः (पैरों से हीन=सर्प)। **व्यापादयामि** — घातयामि (मारता हूँ)। **जलोपान्ते** — जलस्य निकटे (जल के पास)। **कोटरम्** — निष्कुहः (खोखल)। **परिणतवयाः** — वृद्धाः (परिणतं वयः यस्य असौ) (बूढ़ा)। **सुखावहः** — सुखकरः (सुखकारी)। **जीवनोपायं** — जीविकायाः उपायम् (जीविका का उपाय)। **कुलाङ्गारेण**- कुलस्य नाशकेन (कुलनाश के लिये अंगार के समान)। **अभिहितम्** — कथितम् (कहा)। **निःशेषिताः** — समाप्ताः (समाप्त कर दिये)। **रिपवः** — शत्रवः (शत्रु)। **स्ववर्गीयम्** — स्वपरिजनम् (कुटुम्बीजन को)। **व्याकुलमना** — व्यग्रमना (व्याकुल मन वाला)। **कवलितम्** — भक्षितम् (खा लिया)।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. मण्डूकराजस्य नामासीत् —

(अ) गङ्गदत्तः (आ) भुजङ्गदत्तः

(इ) मण्डूकराजः (ई) प्रियदर्शनः ( )

२. मण्डूकराजः कैः उद्वेजितः —

(अ) सर्पैः (आ) खगैः

(इ) दायादैः (ई) पुत्रैः ( )

३. "अहं तावत् परिणतवयाः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि" इति कः अचिन्तयत् —

(अ) मूषकः (आ) मण्डूकः

(इ) चित्रग्रीवः (ई) सर्पः ( )

४. "यो यद्वपति बीजं हि लभते तादृशं फलम्" इति पाठः संकलितोऽस्ति —

(अ) हितोपदेशात् (आ) जातकमालातः

(इ) मित्रभेदात् (ई) लब्धप्रणाशात् ( )

**लघूत्तरात्मकप्रश्नाः**

१. प्रियदर्शनः कः आसीत् ?

२. गङ्गदत्तस्य परिभवः कैः कृतः ?

३. कूपे सर्पः कुत्र स्थितः ?

४. गङ्गदत्तस्य आश्रयः क्व आसीत् ?

५. सर्पः केन मार्गेण गङ्गदत्तस्यालयं गतः ?

**निबन्धात्मक-प्रश्नाः**

१. दायादानां प्रत्यपकाराय गङ्गदत्तः किं कृतवान् ?

२. बिलद्वारं प्राप्तं गङ्गदत्तं सर्पः किम् उक्तवान् ?

३. कूपे नीयमानं सर्पं गङ्गदत्तः किम् उक्तवान् ?

४. मण्डूकाभावे गङ्गदत्ताय सर्पेण किम् अभिहितम् ?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (अ) २. (इ) ३. (आ) ४. (ई)

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत —

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदा. | अस्ति | अस् | लट् | प्रथमः | एकवचनम् |
| | अपश्यत् | ....... | ....... | ....... | ....... |
| | करोमि | ...... | ....... | ....... | ....... |
| | वेद्मि | ...... | ....... | ....... | ....... |
| | व्यापादयामि | ...... | ....... | ....... | ....... |
| | अचिन्तयत् | ...... | ....... | ....... | ....... |
| | प्राप्नोमि | ...... | ....... | ....... | ....... |
| | भक्षयामि | ...... | ....... | ....... | ....... |
| | दर्शयिष्यामि | ...... | ....... | ....... | ....... |
| | गच्छामि | ...... | ....... | ....... | ....... |

२. अधोलिखितपदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत —

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| उदा. | कूपे | कूप | सप्तमी | एकवचनम् |
| | माम् | ...... | ....... | ............. |
| | तेन | ...... | ....... | ............. |
| | दायादान् | ...... | ....... | ............. |
| | लीलया | ...... | ....... | ............. |
| | रिपवः | ...... | ....... | ............. |
| | त्वाम् | ...... | ....... | ............. |
| | प्रविष्टस्य | ...... | ....... | ............. |
| | मया | ...... | ....... | ............. |

३. अधोलिखितपदेषु सन्धि-विच्छेदं प्रदर्शयत —

| | पदम् | सन्धि-विच्छेदः |
|---|---|---|
| उदा. | प्रत्यपकारः | प्रति + अपकारः |
| | दायादैरुद्वेजितः | ..................... |
| | भूयोऽपि | ..................... |
| | अत्रैव | ..................... |
| | मैत्र्यर्थम् | ..................... |
| | तच्छ्रुत्वा | ..................... |
| | सर्पस्तेन | ..................... |

४. अधोलिखित-पदानाश्रित्य वाक्यनिर्माणं कुरुत —

| | पदम् | - | वाक्यम् |
|---|---|---|---|
| उदा. | कदाचित् | – | रामः कदाचित् मित्रैः रोषितः। |
| | कूपम् | – | .................................... |
| | तत्र | – | .................................... |
| | रिपवः | – | .................................... |
| | सर्पेण | – | .................................... |

५. अधोलिखितेषु समस्तपदेषु नामनिर्देशसहितं समासविग्रहो विधेयः —

| | पदम् | – | समास विग्रहः | समासनाम |
|---|---|---|---|---|
| उदा. | कृष्णसर्पः | – | कृष्णश्च असौ सर्पश्च | कर्मधारयः |
| | प्रियदर्शनः | – | ............................ | ................ |
| | पाषाणचयनिबद्धे | – | ............................ | ................ |
| | घट्टिकायन्त्रमार्गेण | – | ............................ | ................ |
| | व्याकुलमनाः | – | ............................ | ................ |
| | मण्डूकराजः | – | ............................ | ................ |

६. निम्नलिखितेषु पदेषु प्रकृति-प्रत्ययं प्रदर्शयत —

| | पदम् | धातुः ( प्रकृतिः ) | + | प्रत्ययः |
|---|---|---|---|---|
| उदा. | श्रुत्वा | श्रु | + | क्त्वा |
| | कर्त्तव्यः | ............. | + | ............. |
| | आहूतवान् | ............. | + | ............. |
| | उक्तम् | ............. | + | ............. |

७. अधोलिखितान् वाक्यान् अधीत्य प्रश्न-निर्माणं कुरुत —

उदा. वाक्यम्- गङ्गदत्तः कूपे प्रतिवसति स्म।

प्रश्नः- गङ्गदत्तः कुत्र प्रतिवसति स्म?

वाक्यम्- सः कदाचिद् दायादैः उद्वेजितः।

प्रश्नः- ................................................................

वाक्यम्- सः बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्।

प्रश्नः- ................................................................

वाक्यम्- सर्पोऽचिन्तयत्-"अहं तावत् परिणतवयाः"।

प्रश्नः- ................................................................

वाक्यम्- गङ्गदत्तः प्रियदर्शनमाह-"केवलं यानहं दर्शयिष्यामि, त एव भक्षणीयाः।"

प्रश्नः- ................................................................

# पञ्चदशः पाठः

विश्ववाङ्मये वैदिक साहित्यस्य महत्त्वपूर्णं स्थानमस्ति। वैदिक साहित्ये चत्वारः वेदाः, तेषां व्याख्यारूपाः ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदश्च सन्ति। तत्र अष्टोत्तर-एकशतानां (१०८) उपनिषदां परिगणनम् अस्ति। परन्तु प्रमुखाणां दश-उपनिषदां पठनं-पाठनं सर्वत्र एव भवति।

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।**
**ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश।।**

प्रस्तुतपाठः तैत्तिरीयोपनिषदः शीक्षा-वल्लीतः उद्धृतः अस्ति। विद्यासमाप्त्यनन्तरं छात्रस्य समावर्तन-संस्कारस्य अवसरे आचार्यः शिष्यं उपदिशति। तस्यैव वर्णनं 'शीक्षावल्ली' इत्यत्र अस्ति। अस्मिन् पाठे तस्यैव सारांशस्य उल्लेखः अस्ति।

## आचार्योपदेशः

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद! धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव! पितृदेवो भव! आचार्यदेवो भव! अतिथिदेवो भव! यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।**

## पदच्छेदः

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति-** वेदम्+ अनूच्य+ आचार्यः+ अन्तेवासिनम्+ अनुशास्ति, **स्वाध्यायान्मा-** स्वाध्यायात्+ मा, **सत्यान्न-** सत्यात्+ न, **धर्मान्न-** धर्मात्+ न, **कुशलान्न-** कुशलात्+न, **अश्रद्धयादेयम्-** अश्रद्धया+ देयम्/अदेयम्, **एतदनुशासनम्-** एतत्+ अनुशासनम्, **एवमुपासितव्यम्-** एवम्+ उपासितव्यम्।

## कठिनशब्दार्थाः

**वेदम्-** ज्ञानराशिम्, **अनूच्य-** अध्याप्य, अध्यापनं कृत्वा (अनु+वच्+ल्यप्), **आचार्यः-** गुरुः, **अन्तेवासिनम्-** शिष्यम्, **अनुशास्ति-** उपदिशति, **चर-** आचरणं कुरु, **मा-** न, **प्रमदः-** प्रमादं कुरु, **प्रमदितव्यम्-** प्रमादं करणीयम्, **धर्मात्-** कर्त्तव्यकर्मणः, **कुशलात्-** आत्मरक्षणकर्मणः, **भूत्यै-** ऐश्वर्यकर्मणः,

**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्**- नियमेन स्वाध्यायः प्रवचनं च अवश्यमेव करणीयम्, **मातृदेवः, पितृदेवः, आचार्यदेवः, अतिथिदेवः भव**- मात्रादयः देवाः यस्य स त्वं भव अर्थात् एते देवतावत्त्वया उपास्याः, **अनवद्यानि**- अनिन्दनीयानि अथवा प्रशंसनीयानि कर्माणि, (वदितुं योग्यं वद्यं, न वद्यम् अवद्यम्, न अवद्यम् इति अनवद्यम्, तानि), **सेवितव्यानि**- सेवनं करणीयम्, **सुचरितानि**- सुकर्माणि, **इतराणि**- अन्यानि, **श्रद्धया**- श्रद्धापूर्वकम्, **देयम्**- दातव्यम्, **अदेयम्**- कदापि न दातव्यम्, **ह्रिया**- मत्तुल्याः मदवराश्च अपि दास्यन्ति इति लज्जया वा देयम्, **भिया**- पारलौकिक-भयेन वा देयम्, **संविदा**- संवित् मित्रादिकार्यम् तया वा देयम्, **आदेशः** - विधिः, **एष उपदेशः** - पित्रादीनां पुत्रादिभ्यः एष एव उपदेशः, **एषा वेदोपनिषद्**- एतस्य वेदरहस्यार्थत्वात्, **अनुशासनम्**- ईश्वरवचनम् एतत् सर्वप्रमाणानाम् अनुशासनम्।

## अभ्यास-प्रश्नाः

**अतिलघूत्तरात्मक-प्रश्नाः**

१. रिक्त स्थानानि पूरयतु -

(१) श्रद्धया .........।

(२) अश्रद्धया .......।

(३) आचार्यदेवो .....।

(४) स्वाध्याय-प्रवचनाभ्यां ......।

**लघूत्तरात्मक-प्रश्नाः**

१. श्रद्धया किं करणीयम्?

२. धर्मात् किं न करणीयम्?

३. कीदृशानि कर्माणि सेवितव्यानि?

४. कानि त्वया उपास्यानि?

**निबन्धात्मक-प्रश्नाः**

१. केषु केषु कार्येषु कदापि प्रमादः न करणीयः?

२. दानस्य विषये शिक्षावल्यां यल्लिखितं तत् वर्ण्यताम्।

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखित पदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदा. | वद | वद् | लोट् | मध्यमः | एकवचनम् |
| | १. चर | ..... | ..... | ..... | ..... |
| | २. भव | ..... | ..... | ..... | ..... |
| | ३. गच्छ | ..... | ..... | ..... | ..... |
| | ४. जिघ्र | ..... | ..... | ..... | ..... |

२. निम्नलिखितेषु शब्द-लिङ्ग-विभक्ति-वचनानां निर्देशं कुरुत-

| | पदम् | शब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| उदा. | स्वाध्यायात् | स्वाध्याय | पुल्लिङ्गः | पञ्चमी | एकवचनम् |
| | १. श्रद्धया | ..... | ..... | ..... | ..... |
| | २. धर्मात् | ..... | ..... | ..... | ..... |

| | | | | |
|---|---|---|---|---|
| ३. भिया | ..... | ..... | ..... | ..... |
| ४. ह्रिया | ..... | ..... | ..... | ..... |
| ५. सुचरितानि | ..... | ..... | ..... | ..... |
| ६. कर्माणि | ..... | ..... | ..... | ..... |

३. अधोलिखितेषु प्रत्ययस्य निर्देशं कुरुत–

| | | |
|---|---|---|
| उदा. | प्रमदितव्यम् | प्र+मद्+तव्यत् |
| १. | सेवितव्यानि | सेव्+ ............ |
| २. | देयम् | दा+ .............. |
| ३. | युक्तः | युज्+ ............ |
| ४. | वचनम् | वच्+ ............ |

४. निम्नाङ्कितेषु उपसर्गस्य निर्देशं कुरुत–

| | | |
|---|---|---|
| उदा. | प्रवचनम् | प्र+ वचनम् |
| १. | प्रमादः | .............. |
| २. | आदेशः | .............. |
| ३. | उपदेशः | .............. |
| ४. | सुचरितानि | .............. |
| ५. | अनुशासनम् | .............. |

५. अधोलिखितपदानां एकवचनं लिखत–

| | | |
|---|---|---|
| उदा. | सुचरितानि | सुचरितम् |
| | १. कर्माणि | .............. |
| | २. तानि | .............. |
| | ३. यानि | .............. |
| | ४. अनवद्यानि | .............. |
| | ५. लताः | .............. |
| | ६. नामानि | .............. |

६. क–खण्डं ख–खण्डेन सह योजयत–

| **क** | **ख** |
|---|---|
| सत्यं | भव |
| आचार्यदेवो | वद |
| धर्मं | न प्रमदितव्यम् |
| श्रिया | चर |
| कुशलात् | देयम् |

# अपठितावबोधनम्

अधोलिखित–गद्यांशान् पठित्वा तदाधारित–प्रश्नानाम् उत्तराणि यथानिर्देशं लिखन्तु।

( १ )

यदि वयं समाजे राष्ट्रे वा परिवर्तनम् आनेतुम् इच्छामः तर्हि अस्माकं प्रभावः अन्येषाम् उपरि भवेत्। वयं बाह्यवातावरणेन कुप्रभाविताः न स्याम, अपितु वातावरणस्य उपरि अस्माकं प्रभावः स्यात्। अत्र काचित् एका कथा एवमस्ति–

कश्चन कृषकः महिष्याः अस्वास्थ्य–निवारणाय कञ्चित् पशुवैद्यम् औषधं पृष्टवान्। वैद्यः गुलिकाः दत्तवान्, किञ्च उक्तवान् यत् एकस्यां नलिकायां गोलिकाः स्थापयित्वा भवान् स्वमुखेन वायुं फूत्करोतु, तदा गुलिकाः महिष्याः उदरं गमिष्यन्ति इति। कृषकः अस्तु इति उक्त्वा गतवान्। दिनद्वयानन्तरं सः वैद्यः तं कृषकं मार्गे अस्वस्थरूपेण गच्छन्तं दृष्टवान्। किं सञ्जातमिति पृष्टे सति सः कृषकः उक्तवान् — तया नलिकया अहं फूत्करोमि ततः पूर्वं महिष्या एव फूत्कृतम्, परिणामतः गुलिकाः मम उदरं गताः। इति। अनया कथया बोध्यते यत् बाह्यवातावरणस्य कुप्रभावः येषाम् उपरि न भवति, ते एव सफलाः भवन्ति। नेतारः, मार्गदर्शकाः, समाजशोधकाः च बाह्यं दूषितं वातावरणं परिवर्तयन्ति, न तु स्वयं तेन दूषितेन वातावरणेन प्रभाविताः भवन्ति।

**प्रश्नाः**

१. अस्य गद्यावतरणस्य समुचितं शीर्षकं लिखन्तु।
२. अस्माकं प्रभावः कुत्र स्यात्?
३. उपर्युक्ता कथा किं बोधयति?
४. गुलिकाः कस्य उदरे गताः?
५. कः कं पृष्टवान् औषधम्?
६. ''कृषकः अस्तु इति उक्त्वा गतवान्''–अस्मिन् वाक्ये कर्तृपदम् किमस्ति?
७. 'अगच्छत्' इति पदस्य समानार्थकं पदं गद्यांशात् अन्विष्य लिखन्तु।
८. 'नेतुम्' इति पदस्य विलोमपदं गद्यांशात् अन्विष्य लिखन्तु।

**उत्तराणि**

१. अस्माकं प्रभावः वातावरणस्योपरि
२. वातावरणस्योपरि, अन्येषाम् उपरि वा

३. यत् बाह्यवातावरणस्य कुप्रभावः येषाम् उपरि न भवति ते एव सफलाः भवन्ति
४. कृषकस्य
५. कृषकः, पशुवैद्यम्
६. कृषकः
७. गतवान्
८. आनेतुम्

## ( २ )

मातृभूमिं प्रति प्रेम्णः, त्यागस्य, आत्मोत्सर्गस्य, सर्वस्वार्पणस्य च नैके समुज्ज्वलाः पृष्ठाः राजस्थानस्य इतिहासे मिलन्ति परन्तु 'रातीघाटी' नामकस्य युद्धस्य उल्लेखः राजस्थानस्य इतिहासे लुप्तप्रायः वर्तते। बादशाह बाबर इत्यस्य पुत्रः (हुमायुँः इत्यस्य अनुजः) कामरानः बीकानेरस्य राजा राव जैतसी च — इत्यनयोः द्वयोः मध्ये बीकानेरे घटितं महत्युद्धं भारतीय-शौर्यस्य गौरवशालिनी कथा अस्ति। अस्य युद्धस्य तिथिः २६ ओक्टोबर १५३४ ईस्वी इत्यस्ति। भारतं जेतुम् लाहोरात् आगतः कामरानः पलायितः। तस्य शिरस्त्राणं (मुकुटम्) मध्येमार्गं 'छोटड़िया' ग्रामे पतितम्। अद्यापि तन्मुकुटम् तद्ग्रामे सुरक्षितम् अस्ति। अस्य रातीघाटी-युद्धस्य किञ्चिद् विस्तृतं वर्णनं 'बीठू सूजा' इत्यनेन रचिते 'छन्द राव जैतसी रो' इत्यस्मिन् ग्रन्थे वर्तते। अस्य च ग्रन्थस्य उद्धारं डॉ. एल.पी. टैस्सीटोरी अकरोत्।

**प्रश्नाः**

१. अस्य अनुच्छेदस्य समीचीनं शीर्षकं लिखन्तु।
२. रातीघाटी-युद्धं कयोः द्वयोः मध्येऽभवत्?
३. रातीघाटी-युद्धं कुत्र कदा च घटितम्?
४. 'छन्द राव जैतसी रो' इत्यस्य लेखकः कः?
५. गौरवशालिनी कथा-इत्यत्र किं विशेष्यपदं किं च विशेषणपदम् इति लिख्यताम्।
६. 'धावितः' इत्यस्य पर्यायवाचिनं पदम् अनुच्छेदात् अन्विष्य लिख्यताम्।

**उत्तराणि**

१. ऐतिहासिकं रातीघाटी-युद्धम्।
२. कामरानः राव जैतसी च — इत्यनयोः मध्ये।
३. बीकानेरे, २६ ओक्टोबर् १५३४ ए.डी.।
४. बीठू सूजा।
५. **विशेष्यपदम्**-कथा। **विशेषणपदम्**- गौरवशालिनी।
६. आगतः।
७. पलायितः।

## ( ३ )

अस्ति केरले-प्रान्ते कालडीनामको ग्रामः। स च पूर्णा- (पेरियार्) नदीतीरे वर्तते। जगद्गुरुः श्रीशंकराचार्यः तस्मिन् ग्रामे जन्म अलभत्। अस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। शंकरस्य जन्मनः प्रागेव पिता दिवङ्गतः। मातैव पुत्रस्य पालनम् अकरोत्। यथाकालम् उपनीतः सः गुरुमुपागच्छत्। जन्मनैव प्रतिभा-सम्पन्नतया असौ कुलोचिताः विद्याः शीघ्रमेव अधीतवान्।

माता तं गृहस्थं कर्तुमैच्छत्। परन्तु मनसा वचसा कर्मणा च विरक्तः शंकरः प्रार्थयत् – 'मातः! संन्यासः मह्यं रोचते, तदर्थम् अनुमतिं प्रयच्छ' इति। माता पुत्रस्य प्रार्थनां न स्वीकृतवती। एकदा स्नातुं नदीं गतः शंकरः नक्रेण गृहीतः उच्चैः आक्रोशत्। आक्रोशं श्रुत्वा नदीतीरं गता माता पुत्रं नक्रेण गृहीतम् अपश्यत्। शंकरः मातरमवदत् – अम्ब! यदि संन्यासं स्वीकर्तुम् अनुमंस्यसे तर्हि अहं नक्रात् मुक्तो भविष्यामि इति। चेतसा अनिच्छन्ती अपि विवशा माता – 'वत्स! यथा तुभ्यं रोचते तथा कुरु' इति कष्टेन अकथयत्। सद्यः नक्रात् मुक्तः शंकरः मातुः चरणयोः प्रणामम् अकरोत्। माता च तम् अनुगृहीतवती। 'मातः! तव स्मरणक्षणे एव तव समीपम् आगमिष्यामि' इति प्रतिज्ञाय सः गृहात् निरगच्छत्। देशाद्देशं पर्यटन् सः नर्मदातटं प्राप्तवान्। तत्र सः गोविन्द-पादाचार्येभ्यः वेदान्त-विद्याम् अधीतवान्।

अनन्तरं सः मुख्यानाम् उपनिषदां, व्यास-प्रणीतानां ब्रह्मसूत्राणां, श्रीमद्भगवद्गीतायाः च भाष्याणि रचितवान्। एतेन संस्कृतस्य महान् उपकारः अजायत। ततः सः आसेतुहिमाचलं स्वस्य सिद्धान्तस्य प्रचारम् अकरोत्। मातुः अन्तकाले च तया स्मृतः शंकरः तत्समीपम् आगच्छत्।

अद्वैत-सिद्धान्तस्य प्रचाराय परिरक्षणाय च श्रीशंकरः द्वारकायाम्, बदर्याम्, जगन्नाथपुर्यां, शृंगेर्यां च चतुरः मठान् समस्थापयत्। तेषाम् अधिष्ठातारः अद्यापि 'शंकराचार्याः' इति कथ्यन्ते।

श्रीशंकराचार्येण विरचितानि बहूनि स्तोत्रकाव्यानि अपि सन्ति। तेषु च 'भजगोविन्दम्' इति भजनम् अतीव लोकप्रियम् अस्ति।

**प्रश्नाः**

१. प्रस्तुतस्य अनुच्छेदस्य योग्यं शीर्षकं लिखन्तु।
२. शंकराचार्यस्य जन्म कुत्र अभवत्?
३. गृहात् निर्गमन-काले शंकरः मातुः पुरतः किं प्रतिज्ञातवान्?
४. शंकरः चतुरः मठान् कुत्र अस्थापयत्?
५. एतेन संस्कृतस्य महान् उपकारः अजायत- इति वाक्ये किं कर्तृपदं किं च क्रियापदम्?
६. कर्तृक्रियान्वितिः अत्र करणीया —

| **कर्तृपदानि** | **क्रियापदानि** |
|---|---|
| १. माता | आगमिष्यामि |
| २. पिता | कथ्यन्ते |
| ३. अहम् | आस्ताम् |
| ४. शंकराचार्याः | स्वीकृतवती |
| ५. माता पिता च | दिवंगतः |

७. अत्र विशेषण-विशेष्यान्वितिः करणीया —

| **विशेषणपदानि** | **विशेष्यपदानि** |
|---|---|
| १. लोकप्रियम् | शंकरः |
| २. विरक्तः | भजनम् |
| ३. अनिच्छन्ती | माता |
| ४. स्वस्य | सिद्धान्तस्य |

८. 'परिभ्रमन्' इत्यस्य समानार्थकं पदम् अनुच्छेदात् अन्विष्य लिखन्तु।

९. 'बद्धः' इत्यस्य विलोम-पदं अनुच्छेदात् अन्विष्य लिख्यताम्।

**उत्तराणि**

१. जगद्गुरुः शंकराचार्यः।

२. केरले-प्रान्ते कालडी-नामके ग्रामे।

३. मातः! तव स्मरण-क्षणे एव तव समीपम् आगमिष्यामि, इति।

४. द्वारकायाम्, बदर्याम्, जगन्नाथपुर्याम्, शृङ्गेर्याम् च।

५. **कर्त्ता**- उपकारः, **क्रिया**- अजायत

६.

| | | |
|---|---|---|
| १. माता | - | स्वीकृतवती |
| २. पिता | - | दिवंगतः |
| ३. अहम् | - | आगमिष्यामि |
| ४. शंकराचार्याः | - | कथ्यन्ते |
| ५. माता पिता च | - | आस्ताम् |

७.

| | | |
|---|---|---|
| १. लोकप्रियम् | - | भजनम् |
| २. विरक्तः | - | शंकरः |
| ३. अनिच्छन्ती | - | माता |
| ४. स्वस्य | - | सिद्धान्तस्य |

८. पर्यटन्

९. मुक्तः

## ( ४ )

डॉ. भीमराव–आम्बेडकरः संस्कृतं पठितुम् इष्टवान् आसीत्, परन्तु सः अस्पृश्यः इति कारणतः कश्चन संस्कृतज्ञः आम्बेडकरं संस्कृतं पाठयितुं निराकृतवान् — इति विषयः तु आम्बेडकर–महोदयस्य जीवनसम्बन्धि–पुस्तकेषु लिखितः अस्ति; सः विषयः तु प्रचारे अपि अस्ति। 'भारतस्य राजभाषा संस्कृतं भवेत्' इति संविधानसभायां संशोधन–प्रस्तावः आनीतः आसीत्, यस्य प्रस्तावस्य हस्ताक्षर–कर्तृषु प्रस्तावोपस्थापकेषु च डॉ. आम्बेडकरः अपि अन्यतमः आसीत्। अयं विषयः अपि कतिपयवर्षेभ्यः पूर्वं ज्ञातः आसीत्। परम् इदानीं कश्चन नूतनः विषयः प्रकाशम् आगतः अस्ति। नवप्राप्त–प्रमाणैः ज्ञायते यत् डॉ. आम्बेडकरः न केवलं संस्कृतस्य राजभाषात्वं समर्थितवान्, न केवलं सः संस्कृतं जानाति स्म, अपितु सः संस्कृतेन भाषते स्म इति! यतः संविधानसभायां यदा राजभाषा–सम्बन्धे चर्चा प्रवर्तते स्म तदा डॉ. आम्बेडकरः पण्डितलक्ष्मीकान्त–मैत्रेण सह संस्कृतेन वार्तालापं कृतवान्। तत्सम्बन्धे तत्कालीनेषु वार्तापत्रेषु प्रमुखतया वार्ताः प्रकाशिताः आसन्।

**प्रश्नाः**

१. उपर्युक्त–गद्यांशस्य उपयुक्तं शीर्षकं लिखन्तु।
२. डॉ. भीमराव आम्बेडकरः कां भाषां भारतस्य राजभाषां कर्त्तुम् इष्टवान्?
३. डॉ. आम्बेडकरः संविधान–सभायां केन सह संस्कृतेन वार्तालापं कृतवान्?
४. 'वार्तापत्रेषु वार्ताः प्रकाशिताः आसन्'–इत्यस्मिन् वाक्ये कर्तृपदस्य, क्रियापदस्य, विशेषणस्य च निर्देशः करणीयः।
५. डॉ. आम्बेडकरः संस्कृतेन भाषते स्म — अत्र रेखाङ्कितस्य संज्ञापदस्य स्थाने सर्वनाम–पदस्य प्रयोगः कर्त्तव्यः।
६. 'पुरातनः' इति पदस्य विलोमपदं पाठात् चित्वा लिखन्तु।

**उत्तराणि**

१. संस्कृतभाषी डॉ. आम्बेडकरः
२. संस्कृत–भाषाम्
३. पण्डितलक्ष्मीकान्त–मैत्रेण सह
४. **कर्तृपदम्** – वार्ताः
**क्रियापदम्** – आसन्
**विशेषणपदम्** – प्रकाशिताः
५. सः संस्कृतेन भाषते स्म।
६. नूतनः

## ( ५ )

एकमुद्देश्यं लक्ष्यीकृत्य बहूनां जनानाम् ऐक्यभावनया कार्यकरणमेव संहतिः, संघः संगठनं वाऽभिधीयते। एकता मनुष्ये शक्तिमादधाति। एकतयैव देशः समाजो लोकश्च उन्नतिपथं प्राप्नुवन्ति। यस्मिन् देशे समाजे वा एकताऽस्ति, स एव देशः सकललोकसम्माननीयो भवति।

संसारे एकतायाः अतीवावश्यकता वर्तते। विशेषतः कलियुगेऽस्मिन् संहतिः कार्यसाधिका। यतो हि वर्तमाने काले यादृशं सामाजिकं राष्ट्रियं च जीवनमस्ति, तस्य निर्माणाय रक्षणाय च संगठनं परमावश्यकम्। अद्यत्वे संसारे यस्मिन् राष्ट्रे एकतायाः अभावोऽस्ति, तत् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति। अस्माकं देशस्य पारतन्त्र्यम् अनया एव एकतया सहयोगेन वा विच्छिन्नं जातम्। महात्मना गान्धिमहोदयेन तथैवान्यैश्च देशभक्तैः भारतीयसमाजे सर्वत्र एकत्वभावनोदयेन पराधीनतापाशस्य छेदनं विहितम्। अधुना लोकतन्त्रात्मकमस्माकं राष्ट्रं संघटनबलेनैव स्वोन्नतिं विदधाति अत एवोच्यते– 'संघे शक्तिः कलौ युगे।'

**प्रश्नाः**

१. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
२. संघः केन भवति ?
३. एकता मनुष्ये किमादधाति ?
४. कः देशः लोकसम्माननीयो भवति ?
५. अस्मिन् युगे कार्यसाधिका का अस्ति ?
६. किं राष्ट्रं परतन्त्रतापाशबद्धं भवति ?
७. 'यादृशं सामाजिकं राष्ट्रियं च जीवनम् अस्ति' — अत्र विशेषण-विशेष्य-निर्देशः करणीयः।
८. 'संगठनम्' इति पदस्य पर्यायपदद्वयं गद्यांशाद् अन्विष्य लिखन्तु।

**उत्तराणि**

१. संघे शक्तिः कलौयुगे।
२. एकमुद्देश्यं लक्ष्यीकृत बहूनां जनानाम् ऐक्यभावनया कार्यकरणेन एव संघः भवति।
३. शक्तिम् आदधाति।
४. यस्मिन् देशे एकताऽस्ति।
५. 'संहतिः' एव कार्यसाधिका अस्ति।
६. यस्मिन् राष्ट्रे एकताया अभावः अस्ति।
७. **विशेषण-पदानि** — यादृशम्, सामाजिकम्, राष्ट्रियम्। **विशेष्य-पदम** — जीवनम्।
८. संघः, संहतिः

## ( ६ )

इदं हि विज्ञानप्रधानं युगम्। 'विशिष्टं ज्ञानं विज्ञानम्' इति कथ्यते। अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दरीदृश्यते। अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहाय्यं नापेक्ष्यते। आवागमने, समाचारप्रेषणे, दूरदर्शने, सम्भाषणे, शिक्षणे, चिकित्साक्षेत्रे, मनोरंजनकार्ये, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि तथैवान्यकार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते।

सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुङ्क्ते। तथाहि वैज्ञानिकैरनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निर्घृणं च। अयं च न विज्ञानस्य दोषः न वा परमाणुशक्तेरपराधः, पुरुषापराधः खलु एषः।

अतोऽस्य मानवकल्याणार्थमेव प्रयोगः करणीय।

**प्रश्नाः**

१. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

२. इदं युगं कीदृशम्?

३. विज्ञानम् किम् अस्ति?

४. कैः आविष्काराः विहिताः?

५. परमाणुशक्तेः कस्मिन् उपयोगो विहितः?

६. कः पुरुषापराधः?

७. इदं हि विज्ञानप्रधानं युगम् — अस्मिन् वाक्ये विशेषण-विशेष्य-सर्वनामपदानां निर्देशः कर्त्तव्यः।

८. अस्य मानवकल्याणार्थम् एव प्रयोगः करणीयः-अस्मिन् वाक्ये रेखाङ्कितसर्वनामपदस्य स्थाने संज्ञापदस्य प्रयोगं कुर्वन्तु।

९. वैज्ञानिकैः उपयोगः विहितः — अत्र कः कर्त्ता?

**उत्तराणि**

१. विज्ञानस्य महत्त्वम्।

२. विज्ञानप्रधानम् युगम्।

३. 'विशिष्टं ज्ञानं विज्ञानं' कथ्यते।

४. वैज्ञानिकैरनेके आविष्काराः विहिताः।

५. परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः।

६. परमाणुशक्तेः लोकध्वंसकार्यम् एव।

७. **विशेषणम्**- विज्ञानप्रधानम्, **विशेष्यः** - युगम्, **सर्वनाम्**- इदम्।

८. विज्ञानस्य अथवा परमाणोः

९. वैज्ञानिकैः

## ( ७ )

स्त्रियो हि मातृशक्ते: प्रतीकभूता:भवन्ति। निसर्गादेव तासु गृहस्थजीवनस्योत्तरदायित्वं बालकानां भरण-पोषणादिकस्य च दायित्वं समापतति। शिशौ संस्काराधानस्य, सदाचरणशिक्षणस्य, भर्तु: सहयोगस्य, पारिवारिकजनानां सेवाया:, समागतानामभ्यागतानां शुश्रूषाया:, लोकहितसम्पादनस्य च समग्रमपि कर्त्तव्यजातं स्त्रीषु निपतति। अत: स्त्रीणां कृते शिक्षाया: परमावश्यकता वर्तते। सुगृहिणी तदैव सा सम्भवति यदा सुशिक्षिता स्यात्, सुशिक्षयैव परिवारस्य समाजस्य राष्ट्रस्य च हितं सम्पादयितुं सा समर्था भवति।

गृहस्य सुशिक्षिता स्त्री सद्गृहिणी गृहलक्ष्मी: गृहस्वामिनी वा भवति, सैव मातृभूता सद्वंशं सन्नागरिकं च निर्मातुं प्रभवति। स्त्री एव समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनां करोति। अत: समाजे राष्ट्रे वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ता: सुशिक्षिता: स्यु:। 'मातृदेवो भव' इति कथनमपि तदैव सुसङ्गतं भवति। स्त्रीसमाजस्योन्नतिमेव विचिन्त्य मनुनापि कथितम् -

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:।'

**प्रश्ना:**

१. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखन्तु।

२. मातृशक्ते: प्रतीकभूता: का: भवन्ति?

३. स्त्रीणां कृते कस्या: परमावश्यकता वर्तते?

४. मनुना किं कथितं नारीणां विषये?

५. सुशिक्षिता स्त्री गृहलक्ष्मी: भवति — इत्यस्मिन् वाक्ये रेखाङ्कितस्य संज्ञापदस्य स्थाने कस्यापि सर्वनामपदस्य प्रयोगं कृत्वा वाक्यं पुन: लिखन्तु।

६. विशेषण-विशेष्यान्विर्तिं कुर्वन्तु अत्र —

| **विशेषणपदम्** | **विशेष्यपदम्** |
|---|---|
| सुशिक्षिता | कर्त्तव्यजातम् |
| सुसङ्गतम् | स्त्री |
| समग्रम् | कथनम् |

७. शिक्षाया: आवश्यकता वर्तते- इत्यत्र क: कर्त्ता?

८. 'अनादर:', 'असङ्गतम्' — इत्यनयो: विलोमपदे पाठाद् गृहीत्वा लिखन्तु।

**उत्तराणि**

१. स्त्री शिक्षाया: महत्त्वम्/आवश्यकता।

२. स्त्रिय:

३. शिक्षाया:

४. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:।

५. सुशिक्षिता सा गृहलक्ष्मी: भवति।

६. सुशिक्षिता- स्त्री
सुसंगतम्- कथनम्
समग्रम्- कर्त्तव्यजातम्
७. आवश्यकता
८. आदरः (समादरः), सङ्गतम्

## (८)

यस्मिन् देशे तस्य जनजीवने च न प्रवहित देशभक्तिधारा, न संचरति जन्मभूमिप्रेम, तत्र सामाजिकजीवनं शुष्कं गौरवरहितञ्च मन्यते। इदमेवालक्ष्य अस्माकं देशे प्रत्यहं मातृभूमिस्तुतौ गीयते-

वन्दे मातरम्!
सुजलां सुफलां मलयजशीतलाम्।
शस्य-श्यामलां मातरम्, वन्दे मातरम्।।

वस्तुतोऽस्माकं जन्मभूमिः जन्मनः भूमिः। यथोक्तमपि-'माता भूमिः पुत्रोऽहं पृथिव्याः।' यथा जननी स्व-स्तन्येन अस्मान् पालयति, तथैव मातृभूमिरपि स्वकीयेन विविधेन वस्तुजातेन स्वाश्रयेण चास्माकं पालनं रक्षणञ्च करोति। मातुः स्नेहमये उत्सङ्गे यथा वयं लालितास्तथैव जन्मभूमेः क्रोडेऽस्माकं वयोवर्धनं भवति। अतः सततमस्माभिः प्राणार्पणेनापि मातृभूमेर्हितसम्पादनं विधेयम्। मातृभूमिहितमेव राष्ट्रियहितं, भारतभूमेश्च गौरवमेव राष्ट्रगौरवमित्यत्र नास्ति विभेदः। अत एव मातृभूमिवात्सल्यं भारतस्य समृद्ध्यर्थं स्वातंत्र्यरक्षणार्थञ्च परमावश्यकम्।

**प्रश्नाः**

१. अस्य अनुच्छेदस्य शीर्षकं लिखन्तु।
२. जननी अस्मान् केन पालयति?
३. अस्माभिः मातृभूमेः हित-सम्पादनं कथं विधेयम्?
४. 'अङ्के' (गोद में) इत्यस्य पर्यायवाचिनं पदं पाठात् चित्वा लिख्यताम्।
५. 'सुजलां सुफलां मलयजशीतलां शस्य-श्यामलां वन्दे मातरम्'- अस्मिन् वाक्ये विशेषण-विशेष्य-निर्देशः क्रियताम्।
६. 'अभेदः' इति पदस्य विलोम-पदं (विपरीतार्थकं पदम्) पाठाद् अन्विष्य लिखन्तु।
७. कर्तृ-क्रियान्वितिं कुर्वन्तु अत्र —
(क) देशभक्तिधारा - पालयति
(ख) अस्माभिः - विधेयम्
(ग) जननी - वन्दे
(घ) अहम् - प्रवहति

८. 'माता भूमिः पुत्रोऽहम् पृथिव्याः' — अत्र रेखाङ्कितस्य संज्ञापदस्य स्थाने सर्वनामपदस्य प्रयोगं कृत्वा वाक्यं पुनर्लिखन्तु।

**उत्तराणि**

१. मातृभूमि-भक्तिः/देशभक्तिः

२. स्व-स्तन्येन

३. प्राणार्पणेन अपि

४. उत्सङ्गे

५. **विशेषणपदानि** - सुजलां सुफलां, मलयजशीतलां, शस्य-श्यामलाम्।

**विशेष्य पदम्** - मातरम्

६. विभेदः

७.

(क) देशभक्तिधारा - प्रवहति

(ख) अस्माभिः - विधेयम्

(ग) जननी - पालयति

(घ) अहम् - वन्दे

८. माताभूमिः पुत्रोऽहम् अस्याः।

# व्याकरणम्

{अवधेयम् : व्याकरणात्मकेऽस्मिन् भागे निर्धारित-पाठ्यक्रमाद् अतिरिक्तोऽपि अंशः सन्धि-समास-कारकादिषु (विषयस्य पौर्वापर्य-ज्ञानानुरोधात् प्रतिपादने पूर्णत्वानुरोधात् च) निविष्टः वर्तते, अतोऽत्र शिक्षकैः छात्राणां कृते यथावश्यकम् उपयोगः विधीयताम्।}

## सन्धिः

**सन्धिशब्दस्य व्युत्पत्तिः** — सम् उपसर्गपूर्वकात् डुधाञ् (धा) धातोः ''उपसर्गे घोः किः'' इति सूत्रेण 'कि' प्रत्यये कृते सन्धिरिति शब्दो निष्पद्यते।

**सन्धिशब्दस्य परिभाषा** — 'वर्णसन्धानं सन्धिः' अर्थात् द्वयोः वर्णयोः परस्परं यत् सन्धानं मेलनं वा भवति तत्सन्धिरिति कथ्यते।

**पाणिनीयपरिभाषा** — 'परः सन्निकर्षः संहिता' अर्थात् वर्णानाम् अत्यन्तनिकटता संहिता इति कथ्यते। यथा- सुधी+उपास्यः इत्यत्र ईकार-उकारवर्णयोः अत्यन्तनिकटता अस्ति। एतादृशी वर्णनिकटता एव संस्कृतव्याकरणे संहिता इति कथ्यते। संहितायाः विषये एव सन्धिकार्ये सति 'सुध्युपास्यः' इति शब्दसिद्धिर्जायते।

**सन्धिभेदाः** — संस्कृतव्याकरणे सन्धेः त्रयो भेदाः सन्ति। ते इत्थं सन्ति -

(१) अच्सन्धिः(स्वरसन्धिः)।

(२) हल्सन्धिः(व्यंजनसन्धिः)।

(३) विसर्गसन्धिः।

**अच्-सन्धिः**

यदा द्वयोः स्वरयोः सन्धानं मेलनं वा जायते, तत् सन्धानं स्वरसन्धिः अच्सन्धिः वा कथ्यते। अत्र अच्सन्धौ स्वरस्य स्थाने आदेशो भवति। स्वरसन्धयोऽष्टविधाः भवन्ति। तथा हि —

| | |
|---|---|
| १. यण्-सन्धिः।<br>२. अयादि-सन्धिः। | एतयोः सन्ध्योः पूर्वस्य एकस्यैव वर्णस्य स्थाने आदेशो भवति। |
| ३. गुणसन्धिः।<br>४. वृद्धिसन्धिः।<br>५. सवर्णदीर्घसन्धिः।<br>६. पूर्वरूपसन्धिः।<br>७. पररूपसन्धिः। | पञ्चस्वपि सन्धिषु पूर्वस्य परस्य च स्थाने एकादेशो भवति। |
| ८. प्रकृतिभावः। | अत्र आदेशाभावो भवति। |

**( १ ) यण्सन्धिः —**

"इको यणचि" इत्यनेन सूत्रेण संहितायाः विषये अचि परे सति पूर्ववर्तिनः इकः स्थाने स्याद् यण्। माहेश्वरसूत्रानुरूपं इ/ई, उ/ऊ, ऋ/ॠ, लृ एते वर्णाः इक् वर्णाः इति कथ्यन्ते। एवमेव य्, व्, र् ल् एते वर्णाः यण्वर्णाः इति कथ्यन्ते। उपरिलिखितानाम् इक्वर्णानां स्थाने अधोलिखिताः यण्वर्णाः यत्र क्रमशः भवन्ति, तत्र जायते यण् सन्धिः। इदानीं क्रमशः एतेषां स्थितिः उदाहरणानि च दीयन्ते —

(अ) इ/ई+अच्=य्+अच्

अति + उत्तमः = अत्युत्तमः
इति + अत्र = इत्यत्र
इति + आदि = इत्यादि
इति + अलम् = इत्यलम्
यदि + अपि = यद्यपि
प्रति + एकम् = प्रत्येकम्
नदी + उदकम् = नद्युदकम्
स्त्री + उत्सवः = स्त्र्युत्सवः
सुधी + उपास्यः = सुध्युपास्यः

(आ) उ/ऊ+अच्=व्+अच्

अनु + अयः = अन्वयः
सु + आगतम् = स्वागतम्
मधु + अरिः = मध्वरिः
गुरु + आदेशः = गुर्वादेशः
साधु + इति = साध्विति
वधू + आगमः = वध्वागमः
अनु + आगच्छति = अन्वागच्छति

(इ) ऋ/ॠ+अच्=र्+अच्

पितृ + ए = पित्रे
मातृ + आदेशः = मात्रादेशः
धातृ + अंशः = धात्रंशः
मातृ + आज्ञा = मात्राज्ञा
भ्रातृ + उपदेशः = भ्रात्रुपदेशः
मातृ + अनुमतिः = मात्रनुमतिः
सवितृ + उदयः = सवित्रुदयः
पितृ + आकृतिः = पित्राकृतिः

(ई) लृ+अच्=ल्+अच्

| | | | | |
|---|---|---|---|---|
| लृ | + | आकृतिः | = | लाकृतिः |
| लृ | + | अनुबन्धः | = | लनुबन्धः |
| लृ | + | आकारः | = | लाकारः |
| लृ | + | आदेशः | = | लादेशः |

**( २ ) अयादिसन्धिः —**

''एचोऽयवायावः'' इत्यनेन सूत्रेण संहिताविषये अचि परे ''एच्'' इत्यस्य स्थाने अयादिः आदेशः भवति। माहेश्वरसूत्रानुरूपं क्रमशः ए, ओ, ऐ, औ इति वर्णाः ''एच्'' कथ्यन्ते। एतेषां चतुर्णां स्थाने क्रमशः अय्, अव्, आय्, आव् इति भवन्ति। एतेषां क्रमशः स्थितिः उदाहरणानि च प्रस्तूयन्ते —

(अ) ए+अच्=अय्+अच्

| | | | | |
|---|---|---|---|---|
| ने | + | अनम् | = | नयनम् |
| कवे | + | ए | = | कवये |
| हरे | + | ए | = | हरये |
| शे | + | अनम् | = | शयनम् |
| हरे | + | एहि | = | हरयेहि |
| चे | + | अनम् | = | चयनम् |

(आ) ओ+अच्=अव्+अच्

| | | | | |
|---|---|---|---|---|
| पो | + | अनः | = | पवनः |
| भो | + | अनम् | = | भवनम् |
| विष्णो | + | इह | = | विष्णविह |

(इ) ऐ+अच्=आय्+अच्

| | | | | |
|---|---|---|---|---|
| गै | + | अकः | = | गायकः |
| नै | + | अकः | = | नायकः |
| सै | + | अकः | = | सायकः |
| गै | + | अन्ति | = | गायन्ति |

(ई) औ+अच्=आव्+अच्

| | | | | |
|---|---|---|---|---|
| भौ | + | उकः | = | भावुकः |
| पौ | + | अकः | = | पावकः |
| असौ | + | अयम् | = | असावयम् |
| अग्नौ | + | इह | = | अग्नाविह |
| भौ | + | अयति | = | भावयति |
| इन्दौ | + | उदिते | = | इन्दावुदिते। |

**( ३ ) गुणसन्धिः —**

"आद् गुणः" इत्यनेन सूत्रेण संहिताविषये अ/आ वर्णतः परे इ/ई, उ/ऊ, ऋ/ॠ, लृ वर्णेषु विद्यमानेषु पूर्वपरयोः स्थाने गुण–एकादेशः (अ, ए, ओ) भवति। इदानीं क्रमशः एतेषां स्थितिः उदाहरणानि च प्रस्तूयन्ते —

(अ) अ+इ=ए

उप + इन्द्रः = उपेन्द्रः
गज + इन्द्रः = गजेन्द्रः
न + इति = नेति
देव + इन्द्रः = देवेन्द्रः
विकल +इन्द्रियः = विकलेन्द्रियः
राम + इतिहासः = रामेतिहासः

(आ) आ+इ=ए

महा+ इन्द्रः = महेन्द्रः
तथा+ इति = तथेति
यथा +इच्छम् = यथेच्छम्
यथा+ इष्ट = यथेष्ट

(इ) अ+ई=ए

गण + ईशः = गणेशः
सर्व + ईशः = सर्वेशः
सुर + ईशः = सुरेशः
दिन+ ईशः = दिनेशः

(ई) आ+ई=ए

रमा + ईशः = रमेशः
गङ्गा + ईश्वरः = गङ्गेश्वरः
उमा + ईशः = उमेशः
महा + ईशः = महेशः

(उ) अ+उ=ओ

सूर्य + उदयः = सूर्योदयः
पर + उपकारः = परोपकारः
वृक्ष + उपरि = वृक्षोपरि
हित + उपदेशः = हितोपदेशः
पुरुष + उत्तमः = पुरुषोत्तमः

(ऊ) आ+उ=ओ

परीक्षा + उत्सवः = परीक्षोत्सवः

महा + उदयः = महोदयः

आ + उदकान्तम् = ओदकान्तम्

गङ्गा + उदकम् = गङ्गोदकम्

(ऋ) अ+ऊ=ओ

अत्यन्त + ऊर्ध्वम् = अत्यन्तोर्ध्वम्

एक + ऊन = एकोनः

गगन + ऊर्ध्वम् = गगनोर्ध्वम्

(ॠ) आ+ऊ=ओ

मायया + ऊर्जस्वि = माययोर्जस्वि

महा + ऊर्णम् = महोर्णम्

(ऌ) अ+ऋ=अर्

कृष्ण +ऋद्धिः = कृष्णर्द्धिः

ग्रीष्म +ऋतुः = ग्रीष्मर्तुः

वसन्त +ऋतुः = वसन्तर्तुः

राज +ऋषिः = राजर्षिः

(ए) आ+ऋ=अर्

महा + ऋषिः = महर्षिः

ब्रह्मा + ऋषिः = ब्रह्मर्षिः

महा + ऋद्धिः = महर्द्धिः

(ऐ) अ/आ+ऌ=अल्

तव + ऌकारः = तवल्कारः

मम + ऌकारः = ममल्कारः

तव + ऌदन्तः = तवल्दन्तः

**(४) वृद्धिसन्धिः —**

''वृद्धिरेचि'' इत्यनेन सूत्रेण संहिताविषये अ/आ वर्णतः परे 'एच्' (ए, ओ, ऐ, औ) विद्यमाने सति पूर्वपरयोः स्थाने वृद्धिरेकादेशः (आ, ऐ, औ)भवति। अधुना क्रमशः एतेषां स्थितिः उदाहरणानि च प्रस्तूयन्ते–

(अ) अ/आ+ए=ऐ

जन + एकता = जनैकता

एक + एकः = एकैकः

अत्र + एकमत्यम् = अत्रैकमत्यम्

राज+ एष: = राजैष:
बाला +एषा = बालैषा
तथा+ एव = तथैव
गंगा+ एषा = गंगैषा
सदा+ एव = सदैव

(आ) अ/आ+ओ=औ

वन + ओषधि: = वनौषधि:
जल + ओघ: = जलौघ:
गंगा + ओघ: = गंगौघ:
महा + ओजस: = महौजस:
बिम्ब + ओष्ठी = बिम्बौष्ठी

(इ) अ/आ+ऐ=ऐ

देव + ऐश्वर्यम् = देवैश्वर्यम्
दीर्घ + ऐकार: = दीर्घैकार:
नृप + ऐश्वर्यम् = नृपैश्वर्यम्
महा + ऐश्वर्यम् = महैश्वर्यम्

(ई) अ/आ+औ=औ

कृष्ण + औत्कण्ठ्यम् = कृष्णौत्कण्ठ्यम्
तव + औदार्यम् = तवौदार्यम्
जन + औचित्यम् = जनौचित्यम्
राम + औत्सुक्यम् = रामौत्सुक्यम्
महा + औषधि: = महौषधि:
मम + औदासीन्यम् = ममौदासीन्यम्

(उ) अ/आ+ऋ/ॠ=आर्

प्र + ऋच्छति = प्रार्च्छति
कम्बल+ ऋणम् = कम्बलार्णम्
दश + ऋण: = दशार्ण:
सुख + ऋत: = सुखार्त:
वसन + ऋणम् = वसनार्णम्

**(५) सवर्णदीर्घसन्धि:** —

''अक: सवर्णे दीर्घ:'' इत्यनेन सूत्रेण संहिता-विषये 'अक्' प्रत्याहारस्य परे सवर्णे अचि सति पूर्वपरयो: स्थाने दीर्घ-एकादेश: भवति। अत्र क्रमश: एतेषां स्थिति:उदाहरणानि च प्रस्तूयन्ते —

(अ) अ/आ+अ/आ=आ

दैत्य + अरिः = दैत्यारिः

शश + अङ्कः = शशाङ्कः

गौर + अङ्गः = गौराङ्गः

विद्या + आलयः = विद्यालयः

रत्न + आकरः = रत्नाकरः

यथा + अर्थः = यथार्थः

विद्या + अभ्यासः = विद्याभ्यासः

विद्या + अर्थी = विद्यार्थी

(आ) इ/ई+इ/ई=ई

श्री + ईशः = श्रीशः

इति + इव = इतीव

अति + इव = अतीव

रवि + इन्द्रः = रवीन्द्रः

परि + ईक्षा = परीक्षा

गौरी + ईशः = गौरीशः

महती+ इच्छा = महतीच्छा

(इ) उ/ऊ+उ/ऊ=ऊ

विष्णु + उदयः = विष्णूदयः

भानु + ऊष्मा = भानूष्मा

गुरु + उपदेशः = गुरूपदेशः

वधु + उत्सवः = वधूत्सवः

भानु + उदयः = भानूदयः

मधु + उत्तमम् = मधूत्तमम्

(ई) ऋ/ॠ + ऋ/ॠ= ॠ

होतृ + ऋकारः = होतॄकारः

पितृ + ऋणम् = पितॄणम्

कर्तृ + ऋणि = कर्तॄणि

कर्तृ + ऋद्धिः = कर्तॄद्धिः

**(६) पूर्वरूपसन्धिः —**

''एङः पदान्तादति'' इत्यनेन सूत्रेण पदान्ताद् एङोऽति परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति। अयं भावः - पदान्ताद् एकाराद् ओकाराच्च अति परे (ए+अ अथवा ओ+अ अस्यामवस्थायाम्)

पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति। अकारस्य पूर्वरूपमेकादेशे सति अकारस्य स्पष्टप्रतिपत्तये 'ऽ' इति अवग्रहचिह्न प्रयुज्यते। उदाहरणानि —

(अ) ए+अ=ए (पदान्ताद् एकाराद् अति परे पूर्वरूपमेकादेशः)

अन्ते + अपि = अन्तेऽपि

ते + अत्र = तेऽत्र

हरे + अव = हरेऽव

मे + अन्तिके = मेऽन्तिके

दीर्घे + अहनि = दीर्घेऽहनि

(आ) ओ+अ=ओ (पदान्ताद् ओकाराद् अति परे पूर्वरूपमेकादेशः)

विष्णो+ अत्र = विष्णोऽत्र

सो + अवदत् = सोऽवदत्

रामो + अहसत् = रामोऽहसत्

को + अपि = कोऽपि

**(७) पररूपसन्धिः —**

१. "एङि पररूपम्" इत्यनेन सूत्रेण अवर्णान्तादुपसर्गादेङादौ धातौ परे पूर्वपरयोः स्थाने पररूपमेकादेशः स्यात्।

अयं भावः – अवर्णान्तादुपसर्गाद् एकारादौ धातौ परे, ओकारादौ धातौ परे च पूर्वपरयोः स्थाने क्रमशः एकारः ओकारश्च पररूपमेकादेशो भवति। अयं सूत्रः वृद्धेः अपवादः। उदाहरणानि—

(अ) अ+ए=ए (अवर्णान्तादुपसर्गाद् एकारादौ धातौ परे पूर्वपरयोः स्थाने एकारः पररूपमेकादेशः)

प्र+एजते=प्रेजते

(आ) अ+ओ=ओ (अवर्णान्तादुपसर्गाद् ओकारादौ धातौ परे पूर्वपरयोः स्थाने ओकारः पररूपमेकादेशः)

उप+ओषति=उपोषति

२. 'शकन्ध्वादिषु पररूपं वाच्यम्' इत्यनेन वार्तिकेन शकन्धु–आदिषु शब्देषु टिभागस्य पररूपमेकादेशः स्यात्।

अयं भावः – शकन्धु–आदीनां शब्दानां निर्माण–प्रक्रियायां टिभागस्य (शब्दस्य अन्तिम–अचः प्रभृति भागस्य) पररूपमेकादेशः स्यात्। उदाहरणानि

(अ) शक+अन्धुः

शक् अ (टिभागः)+अन्धुः = (टिभागस्य पररूपमेकादेशे) शक् अन्धुः = शकन्धुः

मनस्+ईषा = मन् अस् (टिभागः)+ईषा = (टिभागस्य पररूपमेकादेशे) मन्+ईषा = मनीषा

(आ) कर्क+अन्धुः= कर्क् अ+अन्धु = कर्कन्धुः

(इ) कुल+अटा = कुल् अ+अटा = कुलटा

(ई) पतत्+अञ्जलिः = पत् अत्+अञ्जलिः = पतञ्जलिः

**हल्सन्धिः**

यदा व्यञ्जनात् परे व्यञ्जनम् अथवा स्वरः आयाति तदा हल्सन्धिः भवति।

**( १ ) श्चुत्व सन्धिः**- स्तोः श्चुना श्चुः। अर्थः - सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

व्याख्या- यदा स् त् थ् द् ध् न् इत्येते वर्णाः श् च् छ् ज् झ् ञ् इत्येतेषां वर्णानाम् पूर्वम् पश्चात् वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः श् च् छ् ज् झ् ञ् इत्येते वर्णाः भवन्ति। यथा-

| | | | | |
|---|---|---|---|---|
| सत् | + | चित् | = | सच्चित् |
| रामस् | + | चिनोति | = | रामश्चिनोति |
| हरिस् | + | शेते | = | हरिश्शेते |
| शार्ङ्गिन् | + | जय | = | शार्ङ्गिञ्जय |
| रामस् | + | च | = | रामश्च |
| कस् | + | चित् | = | कश्चित् |
| उद् | + | ज्वलः | = | उज्ज्वलः |

**( २ ) ष्टुत्व सन्धिः**= ष्टुना ष्टुः। अर्थः - स्तोः ष्टुना योगे ष्टुः स्यात्।

व्याख्या - यदा स् त् थ् द् ध् न् इत्येते वर्णाः ष् ट् ठ् ड् ढ् ण् इत्येतेषां वर्णानाम् पूर्वं पश्चाद् वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः ष् ट् ठ् ड् ढ् ण् इत्येते वर्णाः भवन्ति। यथा-

| | | | | |
|---|---|---|---|---|
| तत् | + | टीका | = | तट्टीका |
| रामस् | + | षष्ठः | = | रामष्षष्ठः |
| रामस् | + | टीकते | = | रामष्टीकते |
| चक्रिन् | + | ढौकसे | = | चक्रिण्ढौकसे |
| पेष् | + | ता | = | पेष्टा |
| राष् | + | त्रम् | = | राष्ट्रम् |
| उद् | + | डयनम् | = | उड्डयनम् |
| इष् | + | तः | = | इष्टः |

**( ३ ) जश्त्व सन्धिः** — झलां जशोऽन्ते। अर्थः - पदान्ते झलां जशः स्युः।

व्याख्या- पदान्ते झल् प्रत्याहारान्तर्गतवर्णानां (वर्गस्य १, २, ३, ४ वर्णानां श् ष् स् ह् वर्णानां च) स्थाने जश्प्रत्याहारस्य (ज् ब् ग् ड् द्) वर्णाः भवन्ति। यथा-

| | | | | |
|---|---|---|---|---|
| वाक् | + | ईशः | = | वागीशः |
| जगत् | + | ईश | = | जगदीशः |
| षट् | + | आननः | = | षडाननः |
| दिक् | + | अम्बरः | = | दिगम्बरः |
| अच् | + | अन्तः | = | अजन्तः |

| | | | | |
|---|---|---|---|---|
| सुप् | + | अन्तः | = | सुबन्तः |
| षट् | + | दर्शनम् | = | षड्दर्शनम् |
| दिक् | + | गजः | = | दिग्गजः |

**( ४ ) चर्त्व सन्धिः** — खरि च। अर्थः - खरि परे झलां चरः स्युः।

व्याख्या - खरि (वर्गस्य १, २, श् ष् स्) परे झलां (वर्गस्य १, २, ३, ४ श् ष् स् ह्) स्थाने चर् (क् च् ट् त् प् श् स्) प्रत्याहारस्य वर्णाः भवन्ति। यथा–

| | | | | |
|---|---|---|---|---|
| सद् | + | कारः | = | सत्कारः |
| विपद् | + | कालः | = | विपत्कालः |
| सम्पद् | + | समयः | = | सम्पत्समयः |
| ककुभ् | + | प्रान्तः | = | ककुप्प्रान्तः |
| उद् | + | पन्नः | = | उत्पन्नः |

**( ५ ) अनुस्वार-सन्धिः** — मोऽनुस्वारः। अर्थः - मान्तस्य पदस्यानुस्वारः स्याद् हलि।

व्याख्या– पदान्तस्य मकारस्य स्थाने अनुस्वारः आदेशो भवति हलि (व्यञ्जने) परे। यथा–

| | | | | |
|---|---|---|---|---|
| हरिम् | + | वन्दे | = | हरिं वन्दे |
| गृहम् | + | गच्छति | = | गृहं गच्छति |
| दुःखम् | + | प्राप्नोति | = | दुःखं प्राप्नोति |
| त्वम् | + | पठसि | = | त्वं पठसि |
| अहम् | + | धावामि | = | अहं धावामि |
| सत्यम् | + | वद | = | सत्यं वद |

**( ६ ) परसवर्णसन्धिः** —

(६.१) यरोऽनुनासिकेऽनुनासिको वा — यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्।

व्याख्या– अनुनासिकव्यञ्जनेषु परेषु पदान्ते स्थितानां वर्गीयव्यञ्जनानां स्थाने तद्वर्गीयपञ्चमो वर्णः (अनुनासिकः) विकल्पेन भवति। उदाहरणानि —

| | | | |
|---|---|---|---|
| (ग्=ङ्) | वाग्+मूलम् | = | वाङ्मूलम्/वाग्मूलम् |
| (ड्=ण्) | षड्+मयूखाः | = | षण्मयूखाः/षड्मयूखाः |
| (द्=न्) | एतद्+मुरारिः | = | एतन्मुरारि/एतद्मुरारिः |

(६.२) प्रत्यये भाषायां नित्यम् (वा.)– अनुनासिकादौ प्रत्यये परे पदान्ते स्थितानां वर्गीयव्यञ्जनानां नित्यमेव अनुनासिकः आदेशो भवति। उदाहरणानि -

| | | | | | |
|---|---|---|---|---|---|
| (द्=न्) | चिद्+मयम् | = | चिन्+मयम् | = | चिन्मयम्। |
| | तद्+मात्रम् | = | तन्+मात्रम् | = | तन्मात्रम्। |
| (प्=म्) | अप्+मयम् | = | अम्+मयम् | = | अम्मयम्। |

(६.३) अनुस्वारस्य ययि परसवर्णः - अनुस्वारस्य ययि परे परसवर्णः स्यात्।

व्याख्या– अनुस्वारस्य स्थाने यय् प्रत्याहारान्तर्गतेषु वर्णेषु परेषु तत्तद्वर्गस्य पञ्चमो वर्णः (परसवर्णादेशः) भवति। यवले परे तु यँ, वँ, लँ इत्यादेशो भवति। उदाहरणानि –

| | | | | | |
|---|---|---|---|---|---|
| (ं > ङ्) | अं+कितः | = | अङ्+कितः | = | अङ्कितः |
| (ं > ञ्) | मुं+चति | = | मुञ्+चति | = | मुञ्चति |
| (ं > ण्) | मुं+डनम् | = | मुण्+डनम् | = | मुण्डनम् |
| (ं > न्) | नं+दति | = | नन्+दति | = | नन्दति |
| (ं > म्) | कं+पते | = | कम्+पते | = | कम्पते |

(६.४) वा पदान्तस्य– पदान्तस्य अनुस्वारस्य ययि परे परसवर्णादेशो वा स्यात्।

व्याख्या– पदान्तस्य अनुस्वारस्य स्थाने यय्वर्णेषु परेषु तत्तद्वर्गस्य पञ्चमवर्णादेशो विकल्पेन भवति। इदमवधेयम्– उपसर्गः सर्वोऽपि सुबन्तः। अतः तस्य पदत्वम्। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (ं > ङ्) | त्वं+करोषि | = | त्वङ्+करोषि | = | त्वङ्करोषि/त्वं करोषि। |
| (ं > ञ्) | शत्रुं+जयति | = | शत्रुञ्+जयति | = | शत्रुञ्जयति/ शत्रुं जयति। |
| (ं > म्) | सं+पृक्तौ | = | सम्+पृक्तौ | = | सम्पृक्तौ/संपृक्तौ। |
| (ं > यँ) | सं+यमः | = | सयँ+यमः | = | सयँयमः/ संयमः। |
| (ं > वँ) | सं+वत्सरः | = | सवँ+वत्सरः | = | सवँवत्सरः/संवत्सरः। |
| (ं > लँ) | सं+लापः | = | सलँ+लापः | = | सलँलापः/संलापः। |

(६.५) तोर्लि– तवर्गस्य स्थाने लकारे परे परसवर्णः स्यात्।

व्याख्या– तवर्गस्य स्थाने लकारे परे परसवर्णो लकारादेशो भवति। तत्र नकारस्य स्थाने अनुनासिकलँकारो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (द्=ल्) | तद्+लयः | = | तल्+लयः | = | तल्लयः। |
| (त्=ल्) | जगत्+लयः | = | जगल्+लयः | = | जगल्लयः। |
| (न्=ल्) | विद्वान्+लिखति | = | विद्वालँ+लिखति | = | विद्वाल्लिँखति |
| (त्=ल्) | जहत्+लक्षणा | = | जहल्+लक्षणा | = | जहल्लक्षणा |
| (त्=ल्) | विलसत्+लङ्का | = | विलसल्+लङ्का | = | विलसल्लङ्का |

**विसर्गसन्धिः** —

यदा विसर्गस्य स्थाने किमपि परिवर्तनं भवति तदा सः विसर्गसन्धिः इति कथ्यते।

**(१) सत्वसन्धिः** – विसर्जनीयस्य सः

अर्थः – खरि परे विसर्जनीयस्य सः स्यात्

व्याख्या– विसर्गस्य स्थाने सकारो भवति खरि (वर्गस्य १, २, श् ष् स्) परे। यथा –

| | | |
|---|---|---|
| विष्णुः+त्राता | = | विष्णुस्त्राता |
| रामः+च | = | रामश्च |
| धनुः+टङ्कार | = | धनुष्टङ्कारः |

नि:+छल: = निश्छल:

**( २ ) विसर्गसन्धिः** – वा शरि

अर्थ: – शरि परे विसर्गस्य विसर्गो वा स्यात्।

व्याख्या– विसर्गस्य स्थाने विकल्पेन विसर्गादेशो भवति शरि (श् ष् स्) परे। यथा –

हरि:+शेते = हरि: शेते/हरिश्शेते

नि:+सन्देह: = नि:सन्देह:/निस्सन्देह:

नृप:+षष्ठ: = नृप:षष्ठ:/नृपष्षष्ठ:

**( ३.१ ) उत्वसन्धिः** – अतो रोरप्लुतादप्लुते।

अर्थ: – अप्लुतादत: परस्य रोरुः स्यादप्लुतेऽति।

व्याख्या– ह्रस्वात् अकारात् उत्तरस्य रो: (रेफस्य स्थाने) उकारादेशो भवति ह्रस्वे अकारे परे।

विशेष: – अ:+अ इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति, अन्तिमस्य अकारस्य च स्थाने अवग्रह: (ऽ) भवति। अर्थात् उत्वसन्धे: अनन्तरं गुणसन्धि: पररूपसन्धि: च भवत:। यथा –

क:+अपि = कोऽपि

राम:+अवदत् = रामोऽवदत्

राम:+अयम् = रामोऽयम्

**( ३.२ ) उत्वसन्धिः** – हशि च।

अर्थ: – अप्लुतादत: परस्य रोरुः स्याद्धशि।

व्याख्या– ह्रस्वात् अकारात् उत्तरस्य रो: (रेफस्य स्थाने) उकारादेशो भवति हशि (वर्गस्य ३, ४, ५, ह् य् व् र् ल्) परे।

विशेष: – अ+हश् (वर्गस्य ३, ४, ५, ह् य् व् र् ल्) इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति। अर्थात् उत्वसन्धे: अनन्तरं गुणसन्धि: भवति। यथा–

शिव:+वन्द्य: = शिवो वन्द्य:

राम:+हसति = रामो हसति

बाल:+याति = बालो याति

बुध:+लिखति = बुधो लिखति

बाल:+रौति = बालो रौति

नम:+नम: = नमो नम:

राम:+जयति = रामो जयति

क्षीण:+भवति = क्षीणो भवति

मन:+हर: = मनोहर:

यश:+दा = यशोदा

**( ४.१ ) विसर्गस्य रेफः** – ''इचोऽशि विसर्गस्य रेफः'' – इचः (अ, आ इत्येतौ वर्जयित्वा स्वरात्) परस्य विसर्गस्य अशि (स्वरे मृदु-व्यञ्जने च) परे रेफादेशो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=र्) | मुनिः+इति | = | मुनि+र्+इति | = | मुनिरिति |
| (:=र्) | भानुः+असौ | = | भानु+र्+असौ | = | भानुरसौ |
| (:=र्) | तैः+आगतम् | = | तै+र्+आगतम् | = | तैरागतम् |
| (:=र्) | धेनुः+गच्छति | = | धेुन+र्+गच्छति | = | धेनुर्गच्छति |
| (:=र्) | एतैः+भक्षितम् | = | एतै+र्+भक्षितम् | = | एतैर्भक्षितम् |

(४.२) अव्ययसम्बन्धिनः ऋकारान्तशब्दस्य सम्बोधनसम्बन्धिनश्च विसर्गस्य अकारात् आकारात् च परस्यापि रेफादेशो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=र्) | पुनः+अत्र | = | पुन+र्+अत्र | = | पुनरत्र |
| (:=र्) | प्रातः+गच्छति | = | प्रात+र्+गच्छति | = | प्रातर्गच्छति |
| (:=र्) | पितः+वन्दे | = | पित+र्+वन्दे | = | पितर्वन्दे |
| (:=र्) | मातः+वन्दे | = | मात+र्+वन्दे | = | मातर्वन्दे |

**( ५ ) विसर्गस्य लोपः** -

(५.१) आतोऽशि विसर्गस्य लोपः — आकारात् परस्य विसर्गस्य अशि (स्वरे मृदुव्यञ्जने च) परे लोपो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=लोपः) | बालाः+अत्र | = | बाला+अत्र | = | बाला अत्र |
| (:=लोपः) | लताः+एधन्ते | = | लता+एधन्ते | = | लता एधन्ते |
| (:=लोपः) | ताः+गच्छन्ति | = | ता+गच्छन्ति | = | ता गच्छन्ति |
| (:=लोपः) | वृद्धाः+यान्ति | = | वृद्धा+यान्ति | = | वृद्धा यान्ति |
| (:=लोपः) | बालाः+हसन्ति | = | बाला+हसन्ति | = | बाला हसन्ति |

५.२ ''अतोऽनत्यचि विसर्गलोपः'' – अकारात् परस्य विसर्गस्य अकारं वर्जयित्वा स्वरे परे लोपो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=लोपः) | रामः+आगच्छति | = | राम+आगच्छति | = | राम आगच्छति। |
| | कृष्णः+एति | = | कृष्ण+एति | = | कृष्ण एति। |
| | बालः+इच्छति | = | बाल+इच्छति | = | बाल इच्छति। |

(५.३) ''एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'' अककारयोः एतत्तदोः यः 'सुः' (स-विसर्गः) तस्य लोपः स्याद् हलि न तु नञ्समासे।

अयं भावः – नञ्समासं विहाय 'एषः' 'सः' इत्यनयो पदयोः विसर्गस्य अकारं विहाय यत्किञ्चद्वर्णे परे लोपो भवति। उदाहरणानि —

| | | | | |
|---|---|---|---|---|
| एषः+इच्छति | = | एष+इच्छति | = | एष इच्छति |
| एषः+गच्छति | = | एष+गच्छति | = | एष गच्छति |

| | | | | |
|---|---|---|---|---|
| सः+आगच्छति | = | स+आगच्छति | = | स आगच्छति |
| सः+तत्र = | | स+तत्र | = | स तत्र |
| एषः+विष्णुः | = | एष+विष्णुः | = | एष विष्णुः |
| सः+शम्भुः | = | स+शम्भुः | = | स शम्भुः |

(५.४) ''रो रि'' रेफस्य रेफे परे लोपः स्यात्।

अयं भावः - स्वरात्परस्य विसर्गस्य रेफे परे लोपो भवति। लोपे कृते पूर्वस्वरः दीर्घश्च भवति।

उदाहरणानि —

| | | | | |
|---|---|---|---|---|
| कविः+रचयति | = | कवि+रचयति | = | कवी रचयति |
| भानुः+राजते | = | भानु+राजते | = | भानू राजते |
| पुनः+रमते | = | पुन+रमते | — | पुना रमते |
| हरिः+रम्यः | = | हरि+रम्यः | — | हरी रम्यः |
| शम्भुः+राजते | = | शम्भु+राजते | — | शम्भू राजते |

## समासः

**समासशब्दस्य व्युत्पत्तिः** — सम् उपसर्गपूर्वकात् असुँ (अस्) धातोः घञि प्रत्यये कृते 'समासः' इति शब्दो निष्पद्यते। अस्य अर्थः संक्षिप्तीकरणमिति अस्ति।

**समासस्य परिभाषा** — समसनं समासः अथवा अनेकपदानाम् एकपदीभवनं समासः। अर्थात् यदा अनेकपदानि मिलित्वा एकपदं जायन्ते तदा सः समासः इति कथ्यते। यथा - सीतायाः पति = सीतापतिः। अत्र सीतायाः पतिः इति पदद्वयं मिलित्वा एकपदं (सीतापतिः) जातम् अतः अयमेव समासः अस्ति।

समासे जाते अर्थे किमपि परिवर्तनं न भवति। योऽर्थः 'सीतायाः पतिः' इत्यस्य विग्रहवाक्यस्य अस्ति सः एव अर्थः 'सीतापतिः' इत्यस्य समस्तशब्दस्य अस्ति।

**पूर्वोत्तरविभक्तिलोपः** — सीतायाः पतिः = सीतापतिः। अस्मिन् विग्रहे सीतायाः इत्यत्र षष्ठीविभक्तिः, पतिः इत्यत्र प्रथमाविभक्तिश्च श्रूयेते। समासे कृते अनयोः द्वयोरपि विभक्त्योः लोपो भवति। तत्पश्चात् 'सीतापति' इति समस्तशब्दात् पुनरपि प्रथमाविभक्तिः क्रियते इत्येव सर्वत्र अवगन्तव्यम्।

समासयुक्तः शब्दः समस्तपदं कथ्यते। यथा– 'सीतापतिः' इति समस्तपदम्। समस्तशब्दस्य अर्थं बोधयितुं यद् वाक्यम् उच्यते तद्वाक्यं विग्रहः इति कथ्यते। यथा–सीतायाः पतिः इति वाक्यं विग्रहः अस्ति।

**समासस्यभेदाः** — संस्कृतभाषायां समासस्य मुख्यरूपेण चत्वारः भेदाः सन्ति। समासे प्रायशः द्वे पदे भवतः - पूर्वपदम् उत्तरपदम् च। पदस्य अर्थः पदार्थः भवति। यस्य पदार्थस्य प्रधानता भवति तदनुरूपेण एव समासस्य संज्ञा अपि भवति। यथा प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः भवति। प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः भवति। तत्पुरुषस्य भेदः कर्मधारयः भवति। कर्मधारयस्य भेदः द्विगुः भवति। प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिः भवति। प्रायेण उभयपदार्थप्रधानः द्वन्द्वः भवति। एवं समासस्य सामान्यरूपेण षड्भेदाः भवन्ति।

**१. अव्ययीभावसमासः**

यदा विभक्ति, समीप –इत्यादिषु अर्थेषु वर्तमानम् अव्ययपदं सुबन्तेन सह नित्यं समस्यते तदा असौ अव्ययीभावसमासो भवति। अथवा इदमत्र अवगन्तव्यम्–

१. अस्य समासस्य प्रथमशब्दः अव्ययं भवति।

२. अव्ययशब्दार्थस्य अर्थात् पूर्वपदार्थस्य प्रधानता भवति।

३. समासस्य पदद्वयं मिलित्वा अव्ययं भवति।

४. अव्ययीभावसमासः नपुंसकलिङ्गस्य एकवचने भवति। यथा–

| **अव्ययपदम्** | **अव्ययस्यार्थः** | **विग्रहः** | **समस्तपदम्** |
|---|---|---|---|
| १. अधि | सप्तमीविभक्त्यर्थे | हरौ इति | अधिहरि |
| २. उप | समीपार्थे | कृष्णस्य समीपम् | उपकृष्णम् |
| ३. अनु | योग्यतार्थे | रूपस्य योग्यम् | अनुरूपम् |
| ४. प्रति | वीप्सार्थे | दिनं दिनं प्रति | प्रतिदिनम् |
| ५. निर् | अभावार्थे | मक्षिकाणाम् अभावः | निर्मक्षिकम् |
| ६. यथा | अनतिक्रमार्थे | शक्तिम् अनतिक्रम्य | यथाशक्ति |

**२. तत्पुरुषसमासः -**

तत्पुरुषसमासे प्रायेण उत्तरपदार्थस्य प्रधानता भवति। यथा- राज्ञः पुरुषः - राजपुरुषः। अत्र उत्तरपदं पुरुषः अस्ति, तस्य एव प्रधानता अस्ति। 'राजपुरुषम् आनय' इति उक्ते सति पुरुषः एव आनीयते न तु राजा। तत्पुरुषसमासे पूर्वपदे या विभक्तिः भवति, प्रायेण तस्याः नाम्ना एव समासस्य अपि नाम भवति। यथा-

| | | | |
|---|---|---|---|
| कृष्णं श्रितः | - | कृष्णश्रितः | (द्वितीयातत्पुरुषः) |
| ग्रामं गतः | - | ग्रामगतः | (द्वितीयातत्पुरुषः) |
| हरिणा त्रातः | - | हरित्रातः | (तृतीयातत्पुरुषः) |
| भूतेभ्यः बलिः | - | भूतबलिः | (चतुर्थीतत्पुरुषः) |
| चोराद् भयम् | - | चोरभयम् | (पञ्चमीतत्पुरुषः) |
| राज्ञः पुरुषः | - | राजपुरुषः | (षष्ठीतत्पुरुषः) |
| अक्षेशु शौण्डः | - | अक्षशौण्डः | (सप्तमीतत्पुरुषः) |

**३. कर्मधारयसमासः**

यदा तत्पुरुषसमासस्य द्वयोः पदयोः एकविभक्तिः अर्थात् समानविभक्तिः भवति तदा सः समानाधिकरणः तत्पुरुषसमासः कथ्यते। अयमेव समासः कर्मधारयः इति नाम्ना ज्ञायते। अस्मिन् समासे साधारणतया पूर्वपदं विशेषणम् उत्तरपदञ्च विशेष्यं भवति। यथा- नीलम् कमलमम्= नीलकमलम्।

१. अस्मिन् उदाहरणे नीलम् कमलम् इति द्वयोः पदयोः समानविभक्तिः अर्थात् प्रथमा विभक्तिः अस्ति।

२. अत्र नीलम् इति पदं विशेषणम् कमलम् इति पदञ्च विशेष्यम्। अत एव अयं कर्मधारयः समासः अस्ति।

अस्य उदाहरणानि अधोलिखितानि सन्ति —

**(१) विशेषण-विशेष्यकर्मधारयः -**

| **विग्रहः** | | **समासः** |
|---|---|---|
| पीतम् अम्बरम् इति | = | पीताम्बरम् |
| रक्तम् कमलम् इति | = | रक्तकमलम् |
| वीरः पुरुषः इति | = | वीरपुरुषः |
| दीर्घा रज्जुः इति | = | दीर्घरज्जुः |
| कुत्सितः राजा इति | = | कुराजा |
| महान् पुरुषः इति | = | महापुरुषः |
| श्वेतं वस्त्रम् इति | = | श्वेतवस्त्रम् |
| उन्नतः वृक्षः इति | = | उन्नतवृक्षः |
| सुन्दरः बालकः इति | = | सुन्दरबालकः |
| एकः पुरुषः इति | = | एकपुरुषः |
| परमः पुरुषः इति | = | परमपुरुषः |

| | | |
|---|---|---|
| नीलम् उत्पलम् इति | = | नीलोत्पलम् |
| महान् राजा इति | = | महाराजः |

**( २ ) उपमानोपमेय कर्मधारयः -**

| | | |
|---|---|---|
| घनः इव श्यामः इति | = | घनश्यामः |
| कुसुमम् इव कोमलम् इति | = | कुसुमकोमलम् |
| चन्द्रः इव मुखम् | = | चन्द्रमुखम् |
| शैल इव उन्नतः इति | = | शैलोन्नतः |
| वज्रम् इव कठोरम् इति | = | वज्रकठोरम् |

**( ३ ) उपमानोत्तरपदकर्मधारयः -**

| | | |
|---|---|---|
| पुरुषः व्याघ्रः इव | = | पुरुषव्याघ्रः |
| पुरुषः सिंहः इव | = | पुरुषसिंहः |
| पुरुषः ऋषभः इव | = | पुरुषर्षभः |
| करः किसलयम् इव | = | करकिसलयम् |
| मुखम् कमलम् इव | = | मुखकमलम् |
| पुरुषः नागः इव | = | पुरुषनागः |

**( ४ ) अवधारणपूर्वपदकर्मधारयः -**

विशेषणं विशेष्येण समस्यते। अत्र अवधारणार्थं द्योतयितुं विग्रहवाक्ये विशेषणात् परम् 'एव' शब्दः प्रयुज्यते। यथा —

| | | |
|---|---|---|
| विद्या एव धनम् | = | विद्याधनम् |
| गुरुः एव देवः | = | गुरुदेवः |
| तपः एव धनम् | = | तपोधनम् |
| वेदः एव सम्पत् | = | वेदसम्पत् |

**४. द्विगुसमासः**

१.'संख्यापूर्वो द्विगुः' इति पाणिनीयसूत्रानुसारं यदा कर्मधारयसमासस्य पूर्वपदं संख्यावाची उत्तरपदञ्च संज्ञावाची भवति तदा सः 'द्विगुसमासः' कथ्यते।

२. अयं समासः प्रायः समूहार्थे भवति।

३. समस्तपदं सामान्यतया नपुंसकलिङ्गस्य एकवचने अथवा स्त्रीलिङ्गस्य एकवचने भवति।

४. अस्य विग्रहे षष्ठीविभक्तेः प्रयोगः क्रियते। यथा —

| | | |
|---|---|---|
| १. सप्तानां दिनानां समाहारः इति | = | सप्तदिनम् |
| २. त्रयाणां भुवनानां समाहारः इति | = | त्रिभुवनम् |
| ३. पञ्चानां पात्राणां समाहारः इति | = | पञ्चपात्रम् |
| ४. पञ्चानां रात्रीणां समाहारः इति | = | पञ्चरात्रम् |

५. चतुर्णां युगानां समाहारः इति = चतुर्युगम्

६. सप्तानां ऋषीणां समाहारः इति = सप्तर्षिः

७. सप्तानाम् अह्नां समाहारः इति = सप्ताहः (सप्त+अहन्)

कुत्रचित् द्विगुसमासःस्त्रीलिङ्गे अपि भवति यथा —

१. पञ्चानां वटानां समाहारः इति = पञ्चवटी

२. अष्टानाम् अध्यायानां समाहारः इति = अष्टाध्यायी

३. त्रयाणां लोकानां समाहारः इति = त्रिलोकी

४. सप्तानां शतस्य समाहारः इति = सप्तशती

५. शतस्य अब्दानां समाहारः इति = शताब्दी

६. त्रयाणां फलानां समाहारः इति = त्रिफला

**५. बहुव्रीहिसमासः**

समासे यदा अन्यपदार्थस्य प्रधानता भवति तदा सः बहुव्रीहिसमासः कथ्यते। अर्थात् अस्मिन् समासे न तु पूर्वपदार्थस्य प्रधानता भवति न हि उत्तरपदार्थस्य प्रत्युत द्वौ अपि पदार्थौ मिलित्वा अन्यपदार्थस्य बोधं कारयतः। समस्तपदस्य प्रयोगः अन्यपदार्थस्य विशेषणरूपेण भवति। यथा— 'पीतम्' 'अम्बरं' यस्य सः = पीताम्बरः (विष्णुः)।

अत्र पीतम् तथा च अम्बरम् इत्यनयोः पदयोः अर्थस्य प्रधानता नास्ति अर्थात् 'पीला वस्त्र' इत्यर्थस्य ग्रहणं न भवति प्रत्युत उभौ पदार्थौ तु मिलित्वा अन्यपदार्थस्य अर्थात् 'विष्णुः' इत्यस्य बोधं कारयतः अर्थात् पीताम्बरः इति समस्तपदस्यार्थः 'विष्णुः' अस्ति अत एव अत्र बहुव्रीहिसमासः अस्ति।

अस्य अन्यानि उदाहरणानि अधोलिखितानि सन्ति। यथा —

**(१) समानाधिकरण-बहुव्रीहिः** - यदा समासस्य पूर्वोत्तरपदयोः समानविभक्तिः (प्रथमा विभक्तिः) भवति तदा सः समानाधिकरणबहुव्रीहिः भवति। यथा —

१. प्राप्तम् उदकं यं सः = प्राप्तोदकः (ग्रामः)

२. हताः शत्रवः येन सः = हतशत्रुः (राजा)

३. दत्तं भोजनं यस्मै सः = दत्तभोजनः (भिक्षुकः)

४. पतितं पर्णं यस्मात् सः = पतितपर्णः (वृक्षः)

५. दश आननानि यस्य सः = दशाननः (रावणः)

६. वीराः पुरुषाः यस्मिन (ग्रामे) सः = वीरपुरुषः (ग्रामः)

७. चत्वारि मुखानि यस्य सः = चतुर्मुखः (ब्रह्मा)

**(२) व्यधिकरण-बहुव्रीहिः** - यदा समासस्य पूर्वोत्तरपदयोः भिन्न-विभक्तिः भवति तदा सः व्यधिकरणबहुव्रीहिः भवति। यथा —

१. चक्रं पाणौ यस्य सः = चक्रपाणिः (विष्णुः)

२. शूलं पाणौ यस्य सः = शूलपाणिः (शिवः)

| | | |
|---|---|---|
| ३. धनुः पाणौ यस्य सः | = | धनुष्पाणिः (रामः) |
| ४. चन्द्रः शेखरे यस्य सः | = | चन्द्रशेखरः (शिवः) |
| ५. रघुकुले जन्म यस्य सः | = | रघुकुलजन्मा (रामचन्द्रः) |

**( ३ ) तुल्ययोगे बहुव्रीहिः** - अत्र सहशब्दस्य तृतीयान्तपदेन सह समासो भवति। यथा–

| | | |
|---|---|---|
| १. पुत्रेण सहितः | = | सपुत्रः |
| २. बान्धवैः सहितः | = | सबान्धवः |
| ३. विनयेन सह विद्यमानम् | = | सविनयम् |
| ४. आदरेण सह विद्यमानम् | = | सादरम् |
| ५. पत्न्या सह वर्तमानः | = | सपत्नीक (वसिष्ठः) |

**( ४ ) उपमानवाचकबहुव्रीहिः -**

| | | |
|---|---|---|
| १. चन्द्रः इव मुखं यस्याः सा | = | चन्द्रमुखी |
| २. पाषाणवत् हृदयं यस्य सः | = | पाषाणहृदयः |

**६. द्वन्द्वसमासः**

द्वन्द्वसमासे परस्परं साकांक्षयोः पदयोः मध्ये 'च' आगच्छति, अतएव द्वन्द्वसमासः उभयपदार्थप्रधानः भवति। यथा– धर्मः च अर्थः च - धर्मार्थौ। अत्र पूर्वपदं 'धर्मः' उत्तरपदम् च 'अर्थः', अनयोः द्वयोः अपि प्रधानता अस्ति। द्वन्द्वसमासे समस्तपदं प्रायशः द्विवचने बहुवचने वा भवति। यथा —

| | | |
|---|---|---|
| हरिश्च हरश्च | = | हरिहरौ |
| शिवश्च केशवश्च | = | शिवकेशवौ। |
| माता च पिता च | = | मातापितरौ |
| हेमन्तश्च शिशिरश्च वसन्तश्च | = | हेमन्तशिशिरवसन्ताः |

समाहार (समूहः) इत्यस्य अर्थे द्वन्द्वसमासस्य प्रायेण नपुंसकलिङ्गे एकवचने प्रयोगः भवति। यथा–

| | | |
|---|---|---|
| पाणी च पादौ च एषां समाहारः | = | पाणिपादम्। |
| शिरश्च ग्रीवा च अनयोः समाहारः | = | शिरोग्रीवम्। |
| वाक् च त्वक् च अनयोः समाहारः | = | वाक्त्वचम्। |
| छत्रं च उपानत् च अनयोः समाहारः | = | छत्रोपानहम्। |

## अभ्यासः

**वस्तुनिष्ठप्रश्नाः**

१. अव्ययीभावसमासस्य उदाहरणम् अस्ति —

(अ) पीताम्बरः (आ) नीलकमलम्

(इ) यथाशक्ति (ई) त्रिलोकी ( )

२. अव्ययीभाव-समासस्य उदाहरणम् अस्ति —

(अ) महापुरुषः (आ) चतुर्युगम्

(इ) उपकृष्णम् (ई) प्राप्तोदकः ( )

३. कर्मधारयसमासस्य उदाहरणम् अस्ति —

(अ) पीताम्बरम् (आ) पीताम्बरः

(इ) निर्मक्षिकम् (ई) पञ्चपात्रम् ( )

४. द्वन्द्वसमासस्य उदाहरणम् अस्ति —

(अ) दशाननः (आ) दशपात्रम्

(इ) वाक्त्वचम् (ई) महापुरुषः ( )

**अतिलघूत्तरात्मकप्रश्नाः**

निम्नलिखितपदानां समासविग्रहः कर्तव्यः -

१. घनश्यामः - ..................................................

२. प्रतिदिनम् - ..................................................

३. छत्रोपानहम् - ..................................................

४. विद्याधनम् - ..................................................

५. अधिहरि - ..................................................

**लघूत्तरात्मकप्रश्नाः**

१. निम्नलिखितपदानां समासविग्रहं कृत्वा समासस्य नामापि लेखनीयम्-

| समस्तपदम् | विग्रहः | समासस्य नाम |
|---|---|---|
| १. सुन्दरबालकः | .......... | ................. |
| २. चतुर्युगी | .......... | .................. |
| ३. पुरुषव्याघ्रः | .......... | .................. |
| ४. अनुरूपम् | ........... | .................. |
| ५. घनश्यामः | ........... | .................. |
| ६. शिरोग्रीवम् | ........... | ................... |

२. निम्नलिखितविग्रहवाक्यानां समासः करणीय —

१. श्वेतं वस्त्रम् – ................

२. मुखं कमलम् इव – ................

३. रूपस्य योग्यम् – ................

४. उन्नतः वृक्षः – ................

३. 'क'-खण्डं 'ख'-खण्डेन सह योजयत।

| **कखण्डः** | **खखण्डः** |
|---|---|
| (१) अव्ययीभावसमासः | उपवनम् |
| (२) द्वन्द्वसमासः | कुसुमकोमलम् |
| (३) कर्मधारयसमासः | हरिहरौ। |

## कारकम्

**कारकस्य परिभाषा- क्रियाजनकं कारकम्** अथवा **क्रियां करोति इति कारकम्।**

अर्थात् यः क्रियां सम्पादयति अथवा यस्य क्रियया सह साक्षात् परम्परया वा सम्बन्धो भवति सः 'कारकम्' इति कथ्यते।

क्रियया सह कारकाणां साक्षात् परम्परया वा सम्बन्धः कथं भवति इति बोधयितुम् अत्र वाक्यमेकं प्रस्तूयते। यथा –

''हे मनुष्याः! नरदेवस्य पुत्रः जयदेवः स्वहस्तेन कोषात् निर्धनेभ्यः ग्रामे धनं ददाति।''

अत्र क्रियया सह कारकाणां सम्बन्धं ज्ञातुम् एवं प्रकारेण प्रश्नोत्तरमार्गः आश्रयणीयः –

| **प्रश्नः** | **उत्तरम्** | **कारकम्** | **विभक्तिः** |
|---|---|---|---|
| (१) कः ददाति | जयदेवः | (कर्त्ता) | प्रथमा |
| (२) किम् ददाति | धनम् | (कर्म) | द्वितीया |
| (३) केन ददाति | स्वहस्तेन | (करणम्) | तृतीया |
| (४) केभ्यः ददाति | निर्धनेभ्यः | (सम्प्रदानम्) | चतुर्थी |
| (५) कस्मात् ददाति | कोषात् | (अपादानम्) | पञ्चमी |
| (६) कुत्र ददाति | ग्रामे | (अधिकरणम्) | सप्तमी |

एवमेव **जयदेवः** इति कर्तृकारकस्य तु क्रियया सह साक्षात् सम्बन्धः अस्ति अन्येषां कारकाणां च परम्परया सम्बन्धः अस्ति। अतः इमानि सर्वाणि कारकाणि कथ्यन्ते। परन्तु अस्य एव वाक्यस्य **हे मनुष्याः, नरदेवस्य** च इति पदद्वयस्य **'ददाति'** इति क्रियया सह साक्षात् परम्परया वा सम्बन्धो नास्ति। अतः इदं पदद्वयं कारकम् नास्ति। सम्बन्धः कारकं तु नास्ति परन्तु तस्मिन् षष्ठी विभक्तिः भवति।

**कारकाणां संख्या** – इत्थं कारकाणां संख्या षड् भवति। यथोक्तम् –

**कर्त्ता कर्म च करणं च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्।।**

अत्र कारकाणां विभक्तीनां च सामान्यपरिचयः प्रस्तूयते –

**प्रथमा-विभक्तिः**

(१) यः क्रियायाः करणे स्वतन्त्रः भवति सः कर्त्ता इति कथ्यते (स्वतन्त्रः कर्त्ता)। उक्तकर्तरि च प्रथमा विभक्तिः भवति। यथा- रामः पठति।

अत्र पठनक्रियायाः स्वतन्त्ररूपेण सम्पादकः रामः अस्ति। अतः अयम् एव कर्त्ता अस्ति। कर्तरि च प्रथमा विभक्तिः भवति।

(२) कर्मवाच्ये कर्मणि प्रथमा विभक्तिः भवति। यथा – मया ग्रन्थः पठ्यते।

(३) सम्बोधने प्रथमा विभक्तिः भवति (सम्बोधने च) यथा –
हे बालकाः! यूयं कुत्र गच्छथ?

(४) कस्यचित् संज्ञादिशब्दस्य (प्रातिपदिकस्य) अर्थं, लिङ्गं, परिमाणं, वचनं च प्रकटीकर्तुं प्रथमायाः विभक्तेः प्रयोगः क्रियते। यतोहि विभक्तेः प्रयोगं विना कोऽपि शब्दः स्वकीयमर्थं दातुं समर्थो नास्ति अत एव अस्मिन् विषये प्रसिद्धं कथनमस्ति – 'अपदं न प्रयुञ्जीत।' उदाहरणार्थम् – बलदेवः, पुरुषः, लघुः, लता।

(५) 'इति' शब्दस्य योगे प्रथमा विभक्तिः भवति।
यथा –
वयम् इमं जयन्तः इति नाम्ना जानीमः।

**द्वितीया विभक्तिः**

(१) कर्त्ता क्रियया यं सर्वाधिकम् इच्छति तस्य कर्मसंज्ञा भवति (कर्तुरीप्सिततमं कर्म), कर्मणि च द्वितीया विभक्तिः भवति (कर्मणि द्वितीया), यथा –
(१) रामः **ग्रामं** गच्छति।
(२) बालकः **वेदं** पठन्ति।
(३) वयं **नाटकं** द्रक्ष्यामः।
(४) साधुः **तपस्याम्** अकरोत्।
(५) सन्दीपः **सत्यं** वदेत्।

(२) अधोलिखितशब्दानां योगे द्वितीयाविभक्तिः भवति। यथा –

| | | |
|---|---|---|
| (१) अभितः/उभयतः (दोनों ओर) | – | **राजमार्गम्** अभितः वृक्षाः सन्ति। |
| (२) परितः/सर्वतः (चारों ओर) | – | **ग्रामं** परितः क्षेत्राणि सन्ति। |
| (३) समया/निकषा (समीप में) | – | **विद्यालयं** निकषा देवालयः अस्ति। |
| (४) अन्तरेण/विना (बिना) | – | प्रदीपः **पुस्तकं** विना/अन्तरेण पठति। |
| (५) अन्तरा (बीच में) | – | **रामं श्यामं** च अन्तरा देवदत्तः अस्ति। |
| (६) धिक् (धिक्कार) | – | **दुष्टं** धिक्। |
| (७) हा (हाय) | – | हा **दुर्जनम्**! |
| (८) प्रति (ओर) | – | छात्राः **विद्यालयं** प्रति गच्छन्ति। |
| (९) अनु (पीछे) | – | राजपुरुषः **चौरम्** अनु धावति। |
| (१०) यावत् (तक) | – | गणेशः **वनं** यावत् गच्छति। |
| (११) अधोऽधः (सबसे नीचे) | – | **भूमिम्** अधोऽधः जलम् अस्ति। |
| (१२) अध्यधि (अन्दर-अन्दर) | – | **लोकम्** अध्यधि हरिः अस्ति। |
| (१३) उपर्युपरि (ऊपर-ऊपर) | – | **लोकम्** उपर्युपरि सूर्यः अस्ति। |

(३) अधि-उपसर्गपूर्वक-शीङ्-स्था-आस्-धातूनां प्रयोगे एषाम् आधारस्य कर्मसंज्ञा भवति, कर्मणि च द्वितीया विभक्तिः भवति (अधिशीङ्स्थासां कर्म)। उदाहरणार्थम् –

| | | |
|---|---|---|
| (१) अधिशेते (सोता है) | – | सुरेशः **शय्याम्** अधिशेते। |

(२) अधितिष्ठति (बैठता है) – अध्यापकः **आसन्दिकाम्** अधितिष्ठति।

(३) अध्यास्ते (बैठता है) – नृपः **सिंहासनम्** अध्यास्ते।

(४) उप-अधि-आङ् (आ)-उपसर्गपूर्वक-वस् धातोः प्रयोगे अस्य आधारस्य कर्मसंज्ञा भवति, कर्मणि च द्वितीया विभक्तिः भवति (उपान्वध्याङ्वसः)।

(१) उपवसति (पास में रहता है) – श्यामः **नगरम्** उपवसति।

(२) अनुवसति (पीछे रहता है) – कुलदीपः **गृहम्** अनुवसति।

(३) अधिवसति (में रहता है) – सुरेशः **जयपुरम्** अधिवसति।

(४) आवसति (रहता है) – हरिः **वैकुण्ठम्** आवसति।

(५) ''अभि-नि'' उपसर्गद्वयपूर्वक-विश्-धातोः प्रयोगे सति अस्य आधारस्य कर्म-संज्ञा भवति, कर्मणि च द्वितीया विभक्तिः भवति (अभिनिविशश्च)।

(१) अभिनिविशते (प्रवेश करता है) – दिनेशः **ग्रामम्** अभिनिविशते।

(६) अपादानादिकारकाणां यत्र अविवक्षा अस्ति तत्र तेषां कर्मसंज्ञा भवति, कर्मणि च द्वितीयाविभक्तिः भवति (अकथितं च)। संस्कृतभाषायां एतादृशाः षोडशधातवः सन्ति येषां प्रयोगे एकं तु मुख्यं कर्म भवति अपरञ्च अपादानादिकारकैः अविवक्षितं गौणं कर्म भवति। अस्मिन् गौणे कर्मणि अपि द्वितीया विभक्तिः भवति। इमे धातवः एव द्विकर्मकधातवः कथ्यन्ते। एतेषां प्रयोगः अत्र क्रियते –

(१) दुह् (दुहना) – गोपालः **गां** पयः दोग्धि।
(गोपाल गाय से दूध दुहता है)

(२) याच् (मांगना) – सुरेशः **महेशं** पुस्तकं याचते।
(सुरेश महेश से पुस्तक मांगता है)

(३) पच् (पकाना) – पाचकः **तण्डुलान्** ओदनं पचति।
(पाचक चावलों से भात पकाता है)

(४) दण्ड् (दण्ड देना) – राजा **गर्गान्** शतं दण्डयति।
(राजा गर्गों को सौ रुपये का दण्ड देता है)

(५) प्रच्छ् (पूछना) – सः **माणवकं** पन्थानं पृच्छति।
(वह बालक से मार्ग पूछता है)

(६) रुध् (रोकना) – ग्वालः **व्रजं** गाम् अवरुणद्धि।
(ग्वाला गाय को व्रज में रोकता है)

(७) चि (चुनना) – मालाकारः **लतां** पुष्पं चिनोति।
(माली लता से पुष्प चुनता है)

(८) जि (जीतना) – नृपः **शत्रुं** राज्यं जयति।
(राजा शत्रु से राज्य को जीतता है)

(९) ब्रू (बोलना)/ – गुरुः **शिष्यं** धर्मं ब्रूते/शास्ति।

शास् (कहना) (गुरु शिष्य से धर्म कहता है)

(१०) मथ् (मथना) - सः **क्षीरनिधिं** सुधां मथ्नाति।
(वह क्षीरसागर से अमृत मथता है)

(११) मुष् (चुराना) - चौरः **देवदत्तं** धनं मुष्णाति।
(चोर देवदत्त से धन चुराता है)

(१२) नी (ले जाना) - सः अजां **ग्रामं** नयति।
(वह बकरी को गाँव ले जाता है)

(१३) हृ (हरण करना) - सः **ग्रामं** धनं हरति।
(वह गाँव में धन को ले जाता है)

(१४) वह (ले जाना) - कृषकः **ग्रामं** भारं वहति।
(किसान गाँव में बोझा ले जाता है)

(१५) कृष् (खींचना) - कृषकः **क्षेत्रं** महिषीं कर्षति।
(किसान खेत में भैंस को खींचता है)

(७) कालवाचिनि शब्दे मार्गवाचिनि शब्दे च अत्यन्तसंयोगे गम्यमाने द्वितीया विभक्तिः भवति- (कालाध्वनोरत्यन्तसंयोगे)।

(१) सुरेशः अत्र **पञ्चदिनानि** पठति। (सुरेश यहाँ लगातार पाँच दिन से पढ़ रहा है)

(२) मोहनः **मासम्** अधीते। (मोहन लगातार महीने भर पढ़ता है)

(३) नदी **क्रोशं** कुटिया अस्ति। (नदी कोस भर तक लगातार टेढ़ी है)

(४) प्रदीपः **योजनं** पठति। (प्रदीप लगातार एक योजन तक पढ़ता है)

**तृतीयाविभक्तिः**

**(१)** (क) क्रियासिद्धौ यत् सर्वाधिकं सहायकं भवति तस्य कारकस्य करणसंज्ञा भवति (साधकतमं करणम्)। कर्तरि करणे च (कर्तृकरणयोस्तृतीया इति पाणिनीय सूत्रेण) तृतीया विभक्तिः भवति। यथा-

(१) जागृतिः **कलमेन** लिखति।

(२) वैशाली **जलेन** मुखं प्रक्षालयति।

(३) रामः **दुग्धेन** रोटिकां खादति।

(४) सुरेन्द्रः **पादाभ्यां** चलति।

(ख) कर्मवाच्यस्य भाववाच्यस्य वा अनुक्तकर्तरि अपि तृतीया विभक्तिः भवति। यथा -

(१) **रामेण** लेखः लिख्यते। (कर्मवाच्ये)

(२) **मया** जलं पीयते। (कर्मवाच्ये)

(३) **तेन** हस्यते। (भाववाच्ये)

**(२)** सह-साकम्-समम्-सार्धम-शब्दानां योगे तृतीया विभक्तिः भवति (सहयुक्तेऽप्रधाने)। यथा -

(१) जनकः **पुत्रेण** सह गच्छति।

(२) सीता **गीतया** साकं पठति।

(३) ते **स्वमित्रैः** सार्धं क्रीडन्ति।

(४) त्वं **गुरुणा** समं वेदपाठं करोषि।

(३) येन विकृतेन अङ्गेन अङ्गिनः विकारो लक्ष्यते तस्मिन् विकृताङ्गे तृतीया भवति (येनाङ्गविकारः)। यथा–

(१) सः **नेत्रेण** काणः अस्ति।

(२) बालकः **कर्णेन** बधिरः वर्तते।

(३) साधुः **पादेन** खञ्जः अस्ति।

(४) श्रेष्ठी **शिरसा** खल्वाटः विद्यते।

(५) सूरदासः **नेत्राभ्याम्** अन्धः आसीत्।

(४) येन चिह्नेन कस्यचिद् अभिज्ञानं भवति तस्मिन् चिह्नवाचिनि शब्दे तृतीया विभक्तिः भवति (इत्थंभूतलक्षणे)। यथा–

(१) सः **जटाभिः** तापसः प्रतीयते।

(२) सः बालकः **पुस्तकैः** छात्रः प्रतीयते।

(५) हेतुवाचिशब्दे तृतीया विभक्तिः भवति (हेतौ) यथा –

(१) **पुण्येन** हरिः दृष्टः।

(२) सः **अध्ययनेन** वसति।

(३) **विद्यया** यशः वर्धते।

(४) विद्या **विनयेन** शोभते।

(६) प्रकृति–आदिक्रियाविशेषणशब्देषु तृतीया विभक्तिः भवति (प्रकृत्यादिभ्यः उपसंख्यानम्)।

(१) सः **प्रकृत्या** साधुः अस्ति।

(२) गणेशः **सुखेन** जीवति।

(३) प्रियंका **सरलतया** लिखति।

(४) मूर्खः **दुःखेन** जीवति।

**(७)** निषेधार्थकस्य अलम् इति शब्दस्य योगे तृतीया विभक्तिः भवति। यथा –

(१) अलं **हसितेन**। अलं **विवादेन**।

**चतुर्थी विभक्तिः**

**(१)** दानस्य कर्मणा कर्ता यं सन्तुष्टं कर्तुम् इच्छति सः सम्प्रदानम् इति कथ्यते (कर्मणा यमभिप्रैति स सम्प्रदानम्), सम्प्रदाने च (चतुर्थी सम्प्रदाने इति पाणिनीयसूत्रेण) चतुर्थी विभक्तिः भवति। यथा –

(१) नृपः **निर्धनाय** धनं यच्छति।

(२) बालकः **स्वमित्राय** पुस्तकं ददाति।

**(२)** रुच्यर्थानां धातूनां प्रयोगे यः प्रीयमाणः भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति (रुच्यर्थानां प्रीयमाणः)। यथा –

(१) **भक्ताय** रामायणं रोचते।
(२) **बालकाय** मोदकानि रोचन्ते।
(३) **गणेशाय** दुग्धं स्वदते।

**(३)** क्रुधादि-अर्थानां धातूनां प्रयोगे यं प्रति कोपादिकं क्रियते तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति (क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः)।

(१) क्रुध् (क्रोध करना) - पिता **पुत्राय** क्रुध्यति।
(२) द्रुह् (द्रोह करना) - किंकरः **नृपाय** द्रुह्यति।
(३) ईर्ष्य् (ईर्ष्या करना) - दुर्जनः **सज्जनाय** ईर्ष्यति।
(४) असूय् (निन्दा करना) - सुरेशः **महेशाय** असूयति।

**(४)** स्पृह् (ईप्सायां) धातोः प्रयोगे यः ईप्सितः भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति (स्पृहेरीप्सितः)। यथा -

(१) स्पृह् (इच्छा करना) - बालकः **पुष्पाय** स्पृहयति।

(५) नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट्, इति शब्दानां योगे चतुर्थी विभक्तिः भवति (नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च)। यथा -

(१) नमः (नमस्कार) - **रामाय** नमः।
(२) स्वस्ति (कल्याण) - **गणेशाय** स्वस्ति।
(३) स्वाहा (आहुति) - **प्रजापतये** स्वाहा।
(४) स्वधा (हवि का दान) - **पितृभ्यः** स्वधा।
(५) वषट् (हवि का दान) - **सूर्याय** वषट्।
(६) अलम् (समर्थ) - **दैत्येभ्यः** हरिः अलम्।

(६) धारयतेः प्रयोगे यः उत्तमर्णः (ऋणदाता) भवति तस्य सम्प्रदानसंज्ञा स्यात्, सम्प्रदाने च चतुर्थी विभक्तिः भवति (धारेरुत्तमर्णः)। यथा -
देवदत्तः **यज्ञदत्ताय** शतं धारयति। (देवदत्त यज्ञदत्त का सौ रुपये का ऋणी है)

(७) यस्मै प्रयोजनाय या क्रिया क्रियते तस्मिन् प्रयोजनवाचिनि शब्दे चतुर्थी विभक्तिः भवति (तादर्थ्ये चतुर्थी वाच्या)। यथा -

(१) सः **मोक्षाय** हरिं भजति।
(२) बालकः **दुग्धाय** क्रन्दति।

**(८)** निम्नलिखितधातूनां योगे प्रायः चतुर्थी विभक्तिः भवति। यथा -

(१) कथय् (कहना) - रामः **स्वमित्राय** कथयति।
(२) निवेदय् (निवेदन करना) - शिष्यः **गुरवे** निवेदयति।
(३) उपदिश् (उपदेश देना) - साधुः **सज्जनाय** उपदिशति।

**पञ्चमी विभक्तिः**

**( १ )** अपाये सति यद् ध्रुवं तस्य अपादानसंज्ञा भवति (ध्रुवमपायेऽपादानम्), अपादाने च (अपादाने पञ्चमी इति सूत्रेण) पञ्चमी विभक्तिः भवति। यथा –

(१) **वृक्षात्** पत्रं पतति।

(२) नृपः **ग्रामात्** आगच्छति।

**( २ )** भयार्थानां रक्षणार्थानां च धातूनां प्रयोगे भयस्य यद् हेतुः अस्ति तस्य अपादान संज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (भीत्रार्थानां भयहेतुः) यथा –

(१) बालकः **सिंहात्** विभेति।

(२) नृपः **दुष्टात्** रक्षति/त्रायते।

**( ३ )** यस्मात् नियमपूर्वकं विद्या गृह्यते तस्य शिक्षकादिजनस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (आख्यातोपयोगे)। यथा –

(१) शिष्यः **उपाध्यायात्** अधीते।

(२) छात्रः **शिक्षकात्** पठति।

**( ४ )** जुगुप्सा–विराम–प्रमादार्थकधातूनां प्रयोगे यस्मात् घृणादि क्रियते तस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्)। यथा –

(१) महेशः **पापात्** जुगुप्सते।

(२) कुलदीपः **अधर्मात्** विरमति।

(३) मोहनः **अध्ययनात्** प्रमाद्यति।

**( ५ )** भूधातोः यः कर्ता, तस्य यद् उत्पत्तिस्थानम्, तस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (भुवः प्रभावः)। यथा –

(१) गंगा **हिमालयात्** प्रभवति।

(२) **काश्मीरेभ्यः** वितस्ता नदी प्रभवति।

**( ६ )** जन् धातोः यः कर्त्ता, तस्य या प्रकृतिः (कारणम्=हेतुः) तस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (जनिकर्तुः प्रकृतिः)। यथा –

(१) **गोमयात्** वृश्चिकः जायते।

(२) **कामात्** क्रोधः जायते।

**( ७ )** कर्ता, यस्मात् अदर्शनम् इच्छति, तस्य कारकस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (अन्तर्धौ येनादर्शनमिच्छति)। यथा–

(१) बालकः **मातुः** निलीयते।

(२) महेशः **जनकात्** निलीयते।

**( ८ )** वारणार्थानां धातूनां प्रयोगे यः ईप्सितः अर्थः भवति तस्य कारकस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (वारणार्थानामीप्सितः)। यथा –

कृषकः **यवेभ्यः** गां वारयति।

**(९)** यदा द्वयोः पदार्थयोः कस्यचित् एकस्य पदार्थस्य विशेषता प्रदर्श्यते तदा विशेषणशब्दैः सह ईयसुन् अथवा तरप् प्रत्ययस्य योगः क्रियते, यस्मात् च विशेषता प्रदर्श्यते तस्मिन् पञ्चमी विभक्तेः प्रयोगः भवति (पञ्चमी विभक्ते)। यथा –

(१) रामः **श्यामात्** पटुतरः अस्ति।

(२) माता **भूमेः** गुरुतरा अस्ति।

(३) जननी जन्मभूमिश्च **स्वर्गात्** अपि गरीयसी।

**(१०)** अधोलिखितशब्दानां योगे पञ्चमी विभक्तिः भवति। यथा –

| | | |
|---|---|---|
| (१) ऋते (बिना) | – | **ज्ञानात्** ऋते मुक्तिः न भवति। |
| (२) प्रभृति (से लेकर) | – | सः **बाल्यकालात्** प्रभृति अद्यावधि अत्रैव पठति। |
| (३) बहिः (बाहर) | – | छात्राः **विद्यालयात्** बहिः गच्छति। |
| (४) पूर्वम् (पहले) | – | **विद्यालयगमनात्** पूर्वं गृहकार्यं कुरु। |
| (५) प्राक् (पूर्व) | – | **ग्रामात्** प्राक् आश्रमः अस्ति। |
| (६) अन्य (दूसरा) | – | **रामात्** अन्यः अयं कः अस्ति। |
| (७) अनन्तरम् (बाद) | – | यशवन्तः **पठनात्** अनन्तरं क्रीडाक्षेत्रं गच्छति। |
| (८) पृथक् (अलग) | – | **नगरात्** पृथक् आश्रमः अस्ति ? |
| (९) परम् (बाद) | – | **रामात्** परम् श्यामः अस्ति। |

**षष्ठी विभक्तिः**

**(१)** सम्बन्धे षष्ठी विभक्तिः भवति (षष्ठी शेषे)। यथा –

रमेशः **संस्कृतस्य** पुस्तकं पठति।

**(२)** यदा बहुषु कस्यचित् एकस्य जातिगुणक्रियाभिः विशेषता प्रदर्श्यते तदा विशेषणशब्दैः सह इष्ठन् अथवा तमप् प्रत्ययस्य योगः क्रियते यस्मात् च विशेषता प्रदर्श्यते तस्मिन् षष्ठी विभक्तेः अथवा सप्तमीविभक्तेः प्रयोगः भवति (यतश्च निर्धारणम्)। यथा –

(१) **कवीनां** (कविषु वा) कालिदासः श्रेष्ठः अस्ति।

(२) **छात्राणां** (छात्रेषु वा) सुरेशः पटुतमः अस्ति।

**(३)** अधोलिखितशब्दानां योगे षष्ठीविभक्तिः भवति। यथा –

| | | |
|---|---|---|
| (१) अधः (नीचे) | – | **वृक्षस्य** अधः बालकः शेते। |
| (२) उपरि (ऊपर) | – | **भवनस्य** उपरि खगाः सन्ति। |
| (३) पुरः (सामने) | – | **विद्यालयस्य** पुरः मन्दिरम् अस्ति। |
| (४) समक्षम् (सामने) | – | **अध्यापकस्य** समक्षं शिष्यः अस्ति। |
| (५) समीपम् (समीप) | – | **नगरस्य** समीपं ग्रामः अस्ति। |
| (६) मध्ये (बीच में) | – | **पशूनां** मध्ये ग्वालः अस्ति। |

(७) कृते (के लिए) – **बालकस्य** कृते दुग्धम् आनय।
(८) अन्तः (अन्दर) – **गृहस्य** अन्तः माता विद्यते।

**(४)** तुल्यवाचिशब्दानां योगे षष्ठी अथवा तृतीया विभक्तिः भवति (तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्)। यथा –
(१) सुरेशः **महेशस्य** (मेहशेन वा) तुल्यः अस्ति।
(२) सीता **गीतायाः** (गीतया वा) तुल्या विद्यते।

**सप्तमी विभक्तिः**

**(१)** क्रियायाः सिद्धौ यः आधारः भवति तस्य अधिकरणसंज्ञा भवति (आधारोऽधिकरणम्), अधिकरणे च (सप्तम्यधिकरणे च इति सूत्रेण) सप्तमी विभक्तिः भवति। यथा –
(१) नृपः **सिंहासने** तिष्ठति।
(२) वयं **ग्रामे** निवसामः।
(३) **तिलेषु** तैलं विद्यते।

**(२)** यस्मिन् स्नेहः क्रियते तस्मिन् सप्तमी विभक्तिः भवति। यथा –
पिता **पुत्रे** स्निह्यति।

**(३)** संलग्नार्थकशब्दानां चतुरार्थकशब्दानां च योगे सप्तमी विभक्तिः भवति। यथा –
बलदेवः **स्वकार्ये** संलग्नः अस्ति।
जयदेवः **संस्कृते** चतुरः अस्ति।

**(४)** यदा एकक्रियायाः अनन्तरं अपरा क्रिया भवति तदा पूर्वक्रियायाः तस्याश्च कर्तरि सप्तमी विभक्तिः भवति (यस्य च भावेन भावलक्षणम्)। यथा –
(१) **रामे** वनं गते दशरथः प्राणान् अत्यजत्।
(२) **सूर्ये** अस्तं गते सर्वे बालकाः गृहम् अगच्छन्।

## अभ्यासः

**वस्तुनिष्ठप्रश्नाः**

(१) 'अभितः' शब्दस्य योगे विभक्तिः भवति –
(अ) चतुर्थी (ब) पञ्चमी
(स) द्वितीया (द) तृतीया ( )

(२) 'सह' शब्दस्य योगे विभक्तिः भवति –
(अ) तृतीया (ब) चतुर्थी
(स) पञ्चमी (द) षष्ठी ( )

(३) अङ्गविकारे विभक्तिः भवति –

(अ) प्रथमा　　(ब) द्वितीया

(स) तृतीया　　(द) सप्तमी　　( )

(४) अधस्तनेषु चतुर्थी विभक्तेः कारणम् अस्ति –

(अ) नमः　　(ब) सह

(स) अभितः　　(द) प्रति　　( )

(५) अधस्तनेषु पंचमीविभक्तेः कारणम् अस्ति –

(अ) नमः　　(ब) अनन्तरम्

(स) अधोऽधः　　(द) खल्वाटः　　( )

(६) अपादाने विभक्तिः भवति –

(अ)द्वितीया　　(ब) तृतीया

(स) पञ्चमी　　(द) षष्ठी　　( )

(७) रक्षार्थकधातूनां योगे विभक्तिः भवति –

(अ) षष्ठी　　(ब) सप्तमी

(स) पंचमी　　(द) तृतीया　　( )

(८) कारकाणां संख्या अस्ति –

(अ) सप्त　　(ब) अष्ट

(स) षट्　　(द) नव　　( )

(९) सम्बोधने विभक्तिः भवति –

(अ) द्वितीया　　(ब) प्रथमा

(स) तृतीया　　(द) षष्ठी　　( )

**लघूत्तरात्मकप्रश्नाः**

(१) अधस्तनेषु रेखाङ्कितशब्देषु विभक्तेः कारणं लिखत।

(१)　**ग्रामं** परितः क्षेत्राणि सन्ति।

(२)　**कविषु** कालिदासः श्रेष्ठः।

(३)　**हरये** रोचते भक्तिः।

(४)　हरिः **वैकुण्ठम्** अधिशेते।

(५)　कृषकः **ग्रामम्** अजां नयति।

(६)　साधुः **कर्णाभ्यां** बधिरः अस्ति।

(७)　**हिमालयात्** गंगा प्रभवति।

(८)　रामः **श्यामाय** शतं धारयति।

(९)　**हनुमते** नमः

(२) कोष्ठकगतशब्देषु उचितविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत।

(१) नास्ति .................... समः शत्रुः। (क्रोध)

(२) माता .................... स्निह्यति। (शिशु)

(३) .................... भीतः बालकः क्रन्दति। (चौर)

(४) अलम् ....................। (विवाद)

(५) .................... परितः जलम् अस्ति। (नदी)

(६) .................... रामायणं रोचते। (भक्त)

(७) .................... बहिः छात्राः कोलाहलं कुर्वन्ति। (कक्षा)

(८) भिक्षुकः .................... भिक्षां याचते। (नृप)

(९) जनकः .................... क्रुध्यति। (पुत्र)

(३) कोष्ठकेभ्यः शुद्धम् उत्तरं चित्वा रिक्तस्थानानि पूरयत –

(१) .................... सह सीता वनम् अगच्छत। (रामस्य/रामेण)

(२) सुरेशः .................... पुस्तकं यच्छति। (रामम्/रामाय)

(३) .................... नमः। (रामम्/रामाय)

(४) माता .................... क्रुध्यति। (पुत्रे/पुत्राय)

(५) पिता .................... स्निह्यति। (पुत्रे/पुत्रात्)

(६) .................... अभितः क्षेत्राणि सन्ति। (ग्रामस्य/ग्रामम्)

(७) .................... मोदकाः रोचन्ते। (बालकाय/बालकम्)

(८) बालकः .................... अधिशेते। (पर्यङ्के/पर्यङ्कम्)

(४) अधोलिखितशब्दानां योगे उचितविभक्तिप्रयोगं कृत्वा वाक्यरचनां कुरुत।

(१) विना ..........................................

(२) धिक् ..........................................

(३) बहिः ..........................................

(४) विभेति ..........................................

(५) काणः ..........................................

(६) अन्तरा ..........................................

(७) पटुतरः ..........................................

(८) पटुतमः ..........................................

(९) स्वाहा ..........................................

(१०) उपवसति ..........................................

(११) अधः ..........................................

(१२) कुशलः ..........................................

(५) अधोलिखितवाक्यानि संशोधनीयानि।

(१) राजपुरुष: चौरस्य अनुधावति। ..........................................

(२) ग्रामस्य परित: जलम् अस्ति। ..........................................

(३) साधु: दुर्जनेन जुगुप्सते। ..........................................

(४) अहं रेलयानात् ग्रामं गमिष्यामि। ..........................................

(५) ईश्वरं नम:। ..........................................

(६) अध्यापक: आसनम् तिष्ठति। ..........................................

(७) माम् मिष्टान्नं रोचते। ..........................................

(८) अलं विवादम्। ..........................................

(६) कखण्डं खखण्डेन सह योजयत।

| ''**कखण्ड:**'' | ''**खखण्ड:**'' |
|---|---|
| (१) दाधातुयोगे | (१) षष्ठी |
| (२) रुच्धातुयोगे | (२) तृतीया |
| (३) अङ्गविकारे | (३) चतुर्थी |
| (४) सम्बन्धे | (४) चतुर्थी |
| (५) अधितिष्ठतियोगे | (५) सप्तमी |
| (६) श्रद्धायोगे | (६) द्वितीया |
| (७) प्रमाद्यति धातुयोगे | (७) प्रथमा |
| (८) कर्मवाच्यस्य कर्मणि | (८) पञ्चमी |

## प्रत्ययः

**प्रत्ययस्य परिभाषा** — धातोः प्रातिपदिकस्य वा पश्चात् यस्य प्रयोगः क्रियते सः प्रत्ययः इति कथ्यते।

**प्रत्ययानां भेदाः** - प्रत्ययानां मुख्यरूपेण त्रयो भेदाः सन्ति। ते क्रमशः इमे सन्ति–

(१) कृत् प्रत्ययाः (२) तद्धितप्रत्ययाः (३) स्त्रीप्रत्ययाः।

**१. कृत्-प्रत्ययाः** - येषां प्रत्ययानां प्रयोगः धातोः (क्रियायाः) पश्चात् क्रियते ते कृत् प्रत्ययाः कथ्यन्ते। यथा–

कृ+तव्यत्= कर्त्तव्यम्

पठ्+अनीयर्= पठनीयम्

**२. तद्धितप्रत्ययाः** - येषां प्रत्ययानां प्रयोगः संज्ञासर्वनामादिशब्दानां पश्चात् क्रियते ते तद्धितप्रत्ययाः कथ्यन्ते। यथा–

| | | |
|---|---|---|
| शिव+अण् | = | शैवः |
| उपगु+अण् | = | औपगवः |
| दशरथ+इञ् | = | दाशरथिः |
| धन+मतुप् | = | धनवान् |

**३. स्त्रीप्रत्ययाः** - येषां प्रत्ययानां प्रयोगः पुँल्लिङ्गशब्दान् स्त्रीलिङ्गे परिवर्तयितुं क्रियते ते स्त्रीप्रत्ययाः कथ्यन्ते। यथा–

| | | |
|---|---|---|
| कुमार+ङीप् | = | कुमारी |
| अज+टाप् | = | अजा |

### १. कृत-प्रत्ययाः

### (१) शतृप्रत्ययः

वर्तमानकालार्थे अर्थात् गच्छन् (जाते हुए), लिखन् (लिखते हुए) इत्यस्मिन् अर्थे परस्मैपदिधातुभ्यः शतृप्रत्ययः भवति। अस्य 'अत्' भागः अवशिष्यते; शकारस्य ऋकारस्य च लोपः भवति। शतृप्रत्ययान्तस्य शब्दस्य प्रयोगः विशेषणवत् भवति। अस्य रूपाणि पुँल्लिङ्गे पठत्-वत्, स्त्रीलिङ्गे नदी-वत्, नपुंसकलिङ्गे च जगत्-वत् चलन्ति।

**शतृप्रत्ययान्त-शब्दाः**

| प्रकृतिः | | प्रत्ययः | | शब्दः | पुँल्लिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|---|
| पठ् | + | शतृ | = | पठत् | पठन् | पठन्ती | पठत् |
| अस् | + | शतृ | = | सत् | सन् | सती | सत् |
| लिख् | + | शतृ | = | लिखत् | लिखन् | लिखन्ती | लिखत् |
| पच् | + | शतृ | = | पचत् | पचन् | पचन्ती | पचत् |
| दृश् | + | शतृ | = | पश्यत् | पश्यन् | पश्यन्ती | पश्यत् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| गम् | + | शतृ | = | गच्छत् | गच्छन् | गच्छन्ती | गच्छत् |
| भू | + | शतृ | = | भवत् | भवन् | भवन्ती | भवत् |
| मिल् | + | शतृ | = | मिलत् | मिलन् | मिलन्ती | मिलत् |
| नी | + | शतृ | = | नयत् | नयन् | नयन्ती | नयत् |
| गण् | + | शतृ | = | गणयत् | गणयन् | गणयन्ती | गणयत् |
| चिन्त् | + | शतृ | = | चिन्तयत् | चिन्तयन् | चिन्तयन्ती | चिन्तयत् |
| घ्रा | + | शतृ | = | जिघ्रत् | जिघ्रन् | जिघ्रन्ती | जिघ्रत् |
| दाण् | + | शतृ | = | यच्छत् | यच्छन् | यच्छन्ती | यच्छत् |
| नृत् | + | शतृ | = | नृत्यत् | नृत्यन् | नृत्यन्ती | नृत्यत् |
| पा | + | शतृ | = | पिबत् | पिबन् | पिबन्ती | पिबत् |
| प्रच्छ् | + | शतृ | = | पृच्छत् | पृच्छन् | पृच्छन्ती | पृच्छत् |

**( २ ) शानच् प्रत्ययः**

वर्तमानकालार्थे आत्मनेपदिधातुभ्यः शानच् प्रत्ययः भवति। अस्य शकारस्य चकारस्य च लोपः भवति, 'आन' इति अवशिष्यते। शानच् प्रत्ययान्तस्य शब्दस्य प्रयोगः विशेषणवत् भवति। अस्य रूपाणि पुँल्लिङ्गे रामवत्, स्त्रीलिङ्गे रमावत्, नपुंसकलिङ्गे च फलवत् चलन्ति।

**शानच्प्रत्ययान्त-शब्दाः**

| **प्रकृतिः** | **+** | **प्रत्ययः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|---|---|
| सेव् | + | शानच् | सेवमानः | सेवमाना | सेवमानम् |
| पच् | + | शानच् | पचमानः | पचमाना | पचमानम् |
| मुद् | + | शानच् | मोदमानः | मोदमाना | मोदमानम् |
| विद्य | + | शानच् | विद्यमानः | विद्यमाना | विद्यमानम् |
| वृत् | + | शानच् | वर्तमानः | वर्तमाना | वर्तमानम् |
| कम्प् | + | शानच् | कम्पमानः | कम्पमाना | कम्पमानम् |
| भास् | + | शानच् | भासमानः | भासमाना | भासमानम् |
| मन् | + | शानच् | मन्यमानः | मन्यमाना | मन्यमानम् |
| मृ | + | शानच् | म्रियमाणः | म्रियमाणा | म्रियमाणम् |
| शुभ् | + | शानच् | शोभमानः | शोभमाना | शोभमानम् |
| कृ | + | शानच् | कुर्वाणः | कुर्वाणा | कुर्वाणम् |
| लभ् | + | शानच् | लभमानः | लभमाना | लभमानम् |
| व्यथ् | + | शानच् | व्यथमानः | व्यथमाना | व्यथमानम् |
| शङ्क् | + | शानच् | शंकमानः | शंकमाना | शंकमानम् |

| | | | | | |
|---|---|---|---|---|---|
| शिक्ष् | + | शानच् | शिक्षमाणः | शिक्षमाणा | शिक्षमाणम् |
| धा | + | शानच् | दधानः | दधाना | दधानम् |
| ब्रू | + | शानच् | ब्रुवाणः | ब्रुवाणा | ब्रुवाणम् |
| यज् | + | शानच् | यजमानः | यजमाना | यजमानम् |
| शी | + | शानच् | शयानः | शयाना | शयानम् |
| दा | + | शानच् | ददानः | ददाना | ददानम् |

**( ३ ) तव्यत्-प्रत्ययः**

तव्यत् प्रत्ययस्य प्रयोगः हिन्दीभाषायाः 'चाहिए' अथवा 'योग्य' इत्यस्मिन् अर्थे भवति। अस्य 'तव्य' भागः अवशिष्यते, तकारस्य च लोपः भवति। अयं प्रत्ययः भाववाच्ये अथवा कर्मवाच्ये एव भवति। तव्यत्-प्रत्ययान्तशब्दानां रूपाणि पुँल्लिङ्गे रामवत्, स्त्रीलिङ्गे रमावत्, नपुंसकलिङ्गे च फलवत् चलन्ति।

**तव्यत्-प्रत्ययान्तशब्दाः**

| **धातुः** | + | **प्रत्ययः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|---|---|
| पठ् | + | तव्यत् | पठितव्यः | पठितव्या | पठितव्यम् |
| एध् | + | तव्यत् | एधितव्यः | एधितव्या | एधितव्यम् |
| भू | + | तव्यत् | भवितव्यः | भवितव्या | भवितव्यम् |
| दा | + | तव्यत् | दातव्यः | दातव्या | दातव्यम् |
| कृ | + | तव्यत् | कर्त्तव्यः | कर्त्तव्या | कर्त्तव्यम् |
| क्री | + | तव्यत् | क्रेतव्यः | क्रेतव्या | क्रेतव्यम् |
| नी | + | तव्यत् | नेतव्यः | नेतव्या | नेतव्यम् |
| ग्रह् | + | तव्यत् | ग्रहीतव्यः | ग्रहीतव्या | ग्रहीतव्यम् |
| चुर् | + | तव्यत् | चोरयितव्यः | चोरयितव्या | चोरयितव्यम् |
| जि | + | तव्यत् | जेतव्यः | जेतव्या | जेतव्यम् |
| दृश् | + | तव्यत् | द्रष्टव्यः | द्रष्टव्या | द्रष्टव्यम् |
| नम् | + | तव्यत् | नन्तव्यः | नन्तव्या | नन्तव्यम् |
| रक्ष् | + | तव्यत् | रक्षितव्यः | रक्षितव्या | रक्षितव्यम् |
| पच् | + | तव्यत् | पक्तव्यः | पक्तव्या | पक्तव्यम् |
| हन् | + | तव्यत् | हन्तव्यः | हन्तव्या | हन्तव्यम् |
| हस् | + | तव्यत् | हसितव्यः | हसितव्या | हसितव्यम् |
| नृत् | + | तव्यत् | नर्तितव्यः | नर्तितव्या | नर्तितव्यम् |
| पा | + | तव्यत् | पातव्यः | पातव्या | पातव्यम् |

| | | | | | |
|---|---|---|---|---|---|
| श्रु | + | तव्यत् | श्रोतव्यः | श्रोतव्या | श्रोतव्यम् |
| लभ् | + | तव्यत् | लब्धव्यः | लब्धव्या | लब्धव्यम् |
| वृध् | + | तव्यत् | वर्धितव्यः | वर्धितव्या | वर्धितव्यम् |
| क्रुध् | + | तव्यत् | क्रोधितव्यः | क्रोधितव्या | क्रोधितव्यम् |
| स्था | + | तव्यत् | स्थातव्यः | स्थातव्या | स्थातव्यम् |
| शी | + | तव्यत् | शयितव्यः | शयितव्या | शयितव्यम् |
| मुद् | + | तव्यत् | मोदितव्यः | मोदितव्या | मोदितव्यम् |

**(४) अनीयर्-प्रत्ययः**

अनीयर् प्रत्ययः तव्यत् प्रत्ययस्य समानार्थकः अस्ति। अस्य प्रयोगः हिन्दीभाषायाः 'चाहिए' अथवा 'योग्य' इत्यर्थे भवति। अस्य 'अनीय' भागः अवशिष्यते, रेफस्य च लोपः भवति। अयं प्रत्ययः कर्मवाच्ये अथवा भाववाच्ये एव भवति। अनीयर्-प्रत्ययान्त-शब्दानां रूपाणि पुँल्लिङ्गे रामवत्, स्त्रीलिङ्गे रमावत्, नपुंसकलिङ्गे च फलवत् चलन्ति।

**अनीयर्-प्रत्ययान्तशब्दाः**

| धातुः | | प्रत्ययः | नपुंसकलिङ्गः | धातुः | | प्रत्ययः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|---|
| एध् | + | अनीयर् | एधनीयम् | चुर् | + | अनीयर् | चोरणीयम् |
| भू | + | अनीयर् | भवनीयम् | दृश् | + | अनीयर् | दर्शनीयम् |
| पठ् | + | अनीयर् | पठनीयम् | रक्ष् | + | अनीयर् | रक्षणीयम् |
| दा | + | अनीयर् | दानीयम् | पच् | + | अनीयर् | पचनीयम् |
| क्री | + | अनीयर् | क्रयणीयम् | हस् | + | अनीयर् | हसनीयम् |
| कृ | + | अनीयर् | करणीयम् | गम् | + | अनीयर् | गमनीयम् |
| पूज् | + | अनीयर् | पूजनीयम् | नृत् | + | अनीयर् | नर्तनीयम् |
| ग्रह् | + | अनीयर् | ग्रहणीयम् | | | | |

**२. तद्धित-प्रत्ययाः**

**(१) मतुप् प्रत्ययः**

'तदस्य अस्ति' (वह इसका है अथवा वाला) अथवा 'अस्मिन्' (इसमें) इत्यर्थे तद्धितस्य मतुप् प्रत्ययः भवति। अस्य 'मत्' भागः अवशिष्यते, उकारस्य पकारस्य च लोपो भवति। 'मत्' इत्यस्य स्थाने क्वचित् 'वत्' इति भवति। मतुप् प्रत्ययान्तशब्दानां रूपाणि पुँल्लिङ्गे भगवत्-वत्, स्त्रीलिङ्गे ई (ङीप्) प्रत्ययं संयोज्य नदीवत्, नपुंसकलिङ्गे च जगत्-वत् चलन्ति। इदमत्र अवगन्तव्यम् -

❖ 'वत्' इत्यस्य प्रयोगः प्रायः झयन्तशब्देभ्यः अथवा अकारान्तशब्देभ्यः भवति। यथा-

झयन्तेभ्यः - विद्युत्+मतुप्= विद्युत्वत्

अकारान्तेभ्यः - धन+मतुप्= धनवत्

विद्या+मतुप्= विद्यावत्

❖ 'मत्' इत्यस्य प्रयोगः प्रायः इकारान्तशब्देभ्यः भवति। यथा-

श्री + मतुप् - श्रीमत्

बुद्धि + मतुप् + बुद्धिमत्

**मतुप् प्रत्ययान्तशब्दाः**

| **प्रकृतिः** | | **प्रत्ययः** | | **नपुंसकलिङ्गः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** |
|---|---|---|---|---|---|---|
| धन | + | मतुप् | = | धनवत् | धनवान् | धनवती |
| गुण | + | मतुप् | = | गुणवत् | गुणवान् | गुणवती |
| रूप | + | मतुप् | = | रूपवत् | रूपवान् | रूपवती |
| ज्ञान | + | मतुप् | = | ज्ञानवत् | ज्ञानवान् | ज्ञानवती |
| स्पर्श | + | मतुप् | = | स्पर्शवत् | स्पर्शवान् | स्पर्शवती |
| फल | + | मतुप् | = | फलवत् | फलवान् | फलवती |
| हिम | + | मतुप् | = | हिमवत् | हिमवान् | हिमवती |
| गो | + | मतुप् | = | गोमत् | गोमान् | गोमती |
| श्री | + | मतुप् | = | श्रीमत् | श्रीमान् | श्रीमती |
| धी | + | मतुप् | = | धीमत् | धीमान् | धीमती |
| मति | + | मतुप् | = | मतिमत् | मतिमान् | मतिमती |
| लक्ष्मी | + | मतुप् | = | लक्ष्मीवत् | लक्ष्मीवान् | लक्ष्मवती |
| यशस् | + | मतुप् | = | यशस्वत् | यशस्वान् | यशस्वती |
| तडित् | + | मतुप् | = | तडित्वत् | तडित्वान् | तडित्वती |
| विचार | + | मतुप् | = | विचारवत् | विचारवान् | विचारवती |
| स्नेह | + | मतुप् | = | स्नेहवत् | स्नेहवान् | स्नेहवती |
| आयुस् | + | मतुप् | = | आयुष्मत् | आयुष्मान् | आयुष्मती |
| मधु | + | मतुप् | = | मधुमत् | मधुमान् | मधुमती |

**(२) इन्- ठन् प्रत्ययौ** - 'अत इनिठनौ' अकारान्ताद् प्रातिपदिकाद् 'तदस्य अस्ति' (वह इसका है) अथवा 'अस्मिन्' (इसमें) इत्यर्थे इनिठनौ प्रत्ययौ भवतः।

**इनि**-प्रयोगकाले 'इनि' प्रत्ययस्य 'इन्' अवशिष्यते, स च प्रथमाविभक्त्यर्थके 'सु' प्रत्यये 'ई' रूपे परिवर्तते। यथा-दण्डम् अस्य अस्तीति= दण्ड+इन्= दण्डिन् सु=दण्डी। **ठन्**- प्रयोगकाले 'ठन्' प्रत्ययस्य 'ठ' इति शिष्यते। ठस्य स्थाने च 'इक' आदेशः ''ठस्येकः'' सूत्रेण जायते।

यथा – दण्डम् अस्य अस्तीति– दण्ड+ठन् (ठ)=दण्ड+इक= दण्डिक:। उदाहरणानि–

| **शब्द** | **+** | **इनि प्रत्यय:** | **इनिप्रत्ययान्त:** | **पुँल्लिङ्गशब्दरूप:** |
|---|---|---|---|---|
| धन | + | इन् = | धनिन् | धनी |
| क्रोध | + | इन् = | क्रोधिन् | क्रोधी |
| दण्ड | + | इन् = | दण्डिन् | दण्डी |
| बल | + | इन् = | बलिन् | बली |
| गुण | + | इन् = | गुणिन् | गुणी |
| सुख | + | इन् = | सुखिन् | सुखी |
| दु:ख | + | इन् = | दु:खिन् | दु:खी |
| माया | + | इन् = | मायिन् | मायी |
| शाला | + | इन् = | शालिन् | शाली |
| माला | + | इन् = | मालिन् | माली |
| पताका | + | इन् = | पताकिन् | पताकी |
| वीणा | + | इन् = | वीणिन् | वीणी |
| वर्ण | + | इन् = | वर्णिन् | वर्णी |
| पुष्कर | + | इन् = | पुष्करिन् | पुष्करी |
| ज्ञान | + | इन् = | ज्ञानिन् | ज्ञानी |
| योग | + | इन् = | योगिन् | योगी |
| कुमुद | + | इन् = | कुमुदिन् | कुमुदी |
| पद्म | + | इन् = | पद्मिन् | पद्मी |

| **शब्द** | **+** | **ठन्प्रत्यय:** | **ठन्प्रत्ययान्त:** | **पँल्लिङ्गरूप:** |
|---|---|---|---|---|
| दण्ड | + | ठन् (इक) | दण्डिक | दण्डिक: |
| धन | + | ठन् (इक) | धनिक | धनिक: |
| हिरण्य | + | ठन् (इक) | हिरण्यक | हिरण्यक: |
| माया | + | ठन् (इक) | मायिक | मायिक: |
| वर्ण | + | ठन् (इक) | वर्णिक | वर्णिक: |
| योग | + | ठन् (इक) | योगिक | योगिक: |
| चर्मन् | + | ठन् (इक) | चर्मिक | चर्मिक: |
| वर्मन् | + | ठन् (इक) | वर्मिक | वर्मिक: |
| संज्ञा | + | ठन् (इक) | संज्ञिक | संज्ञिक: |
| नौ | + | ठन् (इक) | नाविक | नाविक: |

**( ३ ) त्व-तल् प्रत्ययौ**- 'तस्य भावस्त्वतलौ'- षष्ठीसमर्थात् प्रातिपदिकात् भाव इत्येतस्मिन्नर्थे त्व-तलौ प्रत्ययौ भवतः।

प्रयोगस्थलेषु त्व प्रत्ययान्तशब्दस्य रूपाणि फलवत् नपुंसकलिङ्गमनुसरन्ति।

तथैव तल् प्रत्ययान्तशब्दस्य रूपाणि लतावत् स्त्रीलिङ्गे चलन्ति। यथा-

| **शब्द** | **+** | **त्व/तल् प्रत्ययः** | **त्व प्रत्ययान्तरूपः** | **तल् प्रत्ययान्तरूपः** |
|---|---|---|---|---|
| मनुष्य | + | त्व/तल् | मनुष्यत्वम् | मनुष्यता |
| शिशु | + | त्व/तल् | शिशुत्वम् | शिशुता |
| गुरु | + | त्व/तल् | गुरुत्वम् | गुरुता |
| लघु | + | त्व/तल् | लघुत्वम् | लघुता |
| देव | + | त्व/तल् | देवत्वम् | देवता |
| पशु | + | त्व/तल् | पशुत्वम् | पशुता |
| कृष्ण | + | त्व/तल् | कृष्णत्वम् | कृष्णता |
| जड | + | त्व/तल् | जडत्वम् | जडता |
| दीर्घ | + | त्व/तल् | दीर्घत्वम् | दीर्घता |
| क्षुद्र | + | त्व/तल् | क्षुद्रत्वम् | क्षुद्रता |
| कवि | + | त्व/तल् | कवित्वम् | कविता |
| पटु | + | त्व/तल् | पटुत्वम् | पटुता |
| कृश | + | त्व/तल् | कृशत्वम् | कृशता |

**३. स्त्री-प्रत्ययाः**

**( १ ) टाप् प्रत्ययः**- 'अजाद्यतष्टाप्'- अजादिभ्यः अकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां टाप् प्रत्ययो भवति। टाप्प्रत्ययान्तशब्दानां रूपाणि आकारान्ताः स्त्रीलिङ्गे रमा-वत् चलन्ति। यथा-

| **शब्द+टाप् प्रत्ययः** | **टाप्प्रत्ययान्तः शब्दः** | **शब्द+टाप् प्रत्ययः** | **टाप्प्रत्ययान्तः शब्दः** |
|---|---|---|---|
| अज+टाप् | अजा | शूद्र+टाप् | शूद्रा |
| अश्व+टाप् | अश्वा | चटक+टाप् | चटका |
| मन्द+टाप् | मन्दा | वत्स+टाप् | वत्सा |
| ज्येष्ठ+टाप् | ज्येष्ठा | कनिष्ठ+टाप् | कनिष्ठा |
| कृपण+टाप् | कृपणा | क्षत्रिय+टाप् | क्षत्रिया |

❖ टाप्-प्रत्ययान्तशब्देषु क्वचित् अकारस्य इकारः भवति। यथा-

| | | | |
|---|---|---|---|
| मूषक+टाप् | मूषिका | मामक+टाप् | मामिका |
| सर्वक+टाप् | सर्विका | कारक+टाप् | कारिका |
| बालक+टाप् | बालिका | साधक+टाप् | साधिका |

(२) **डीप् प्रत्ययः** - **'ऋन्नेभ्यो डीप्'** - ऋकारान्तेभ्यः नकारान्तेभ्यश्च प्रातिपदिकेभ्यः (शब्देभ्यः) स्त्रियाम् (स्त्रीलिङ्गे) डीप् प्रत्ययो भवति।

डीप् प्रत्ययस्य 'ई' अवशिष्यते। सामान्य-प्रयोगस्थले छात्रैः डीबन्ताः शब्दाः ईकारान्त-रूपेण स्मर्यन्ते।

| **शब्दः + डीप् प्रत्ययः** | **डीबन्ताः शब्दाः** | **शब्दः + डीप् प्रत्ययः** | **डीबन्ताः शब्दाः** |
|---|---|---|---|
| कर्तृ + डीप् | कर्त्री | दण्डिन +डीप् | दण्डिनी |
| कामिन् +डीप् | कामिनी | राजन् +डीप् | राज्ञी |

**'उगितश्च'** - उगिदन्तात् प्रातिपदिकात् स्त्रियां डीप् प्रत्ययो भवति।

येषु प्रत्ययेषु 'उ, ऋ, लृ' इत्येतेषां वर्णानाम् इत्संज्ञकत्वे लोपः जातः ते उगित् प्रत्ययाः। तैः प्रत्ययैः ये शब्दाः निर्मिताः ते उगिदन्ताः शब्दाः प्रातिपादिकाः वा, तेभ्यः उगिदन्तेभ्यः स्त्रियां डीप् प्रत्ययः स्यात्।

| **शब्दः + डीप् प्रत्ययः** | **डीबन्ताः शब्दाः** | **शब्दः + डीप् प्रत्ययः** | **डीबन्ताः शब्दाः** |
|---|---|---|---|
| भवतुँ-भवत्+डीप् | भवती | रूपमतुप-रूपवत् +डीप् | रूपवती |
| श्रीमतुप्-श्रीमत्+डीप् | श्रीमती | यजन्तृ-यजन् +डीप् | यजन्ती |
| बुद्धिमतुप्-बुद्धिमत् + डीप् | बुद्धिमती | पचन्तृ-पचन् +डीप् | पचन्ती |

**'टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः'**- टित्, ढ, अण्, अञ, द्वयसच्, दध्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप् इत्येवमन्तेभ्यः अनुपसर्जनेभ्यः प्रातिपदिकेभ्यः स्त्रियां डीप् प्रत्ययो भवति। उदाहरणानि-

| **शब्दः + डीप् प्रत्ययः** | **डीबन्ताः शब्दाः** | **शब्दः + डीप् प्रत्ययः** | **डीबन्ताः शब्दाः** |
|---|---|---|---|
| कुरुचर + डीप् | कुरुचरी | ऊरुद्वयस् + डीप् | ऊरुद्वयसी |
| नद + डीप् | नदी | जानुदध्न + डीप् | जानुदध्नी |
| मद्रचर + डीप् | मद्रचरी | ऊरुमात्र + डीप् | ऊरुमात्री |
| सौपर्णेय + डीप् | सौपर्णेयी | पञ्चतय + डीप् | पञ्चतयी |
| वैनतेय + डीप् | वैनतेयी | आक्षिक + डीप् | आक्षिकी |
| कुम्भकार + डीप् | कुम्भकारी | लावणिक + डीप् | लावणिकी |
| पार्वत + डीप् | पार्वती | यादृश् + डीप् | यादृशी |
| औत्स + डीप् | औत्सी | इत्वर + डीप् | इत्वरी |

**'वयसि प्रथमे'** - प्रथमे वयसि वर्तमानेभ्यः उपसर्जनरहितेभ्यः अदन्तेभ्यः प्रातिपदिकेभ्यः स्त्रियां डीप् प्रत्ययो भवति। उदाहरणानि-

| **प्रथमवयोवाचकशब्दः + डीप् प्रत्ययः** | **डीबन्ताः शब्दाः** |
|---|---|
| कुमार + डीप् | कुमारी |
| किशोर + डीप् | किशोरी |

| | |
|---|---|
| वधूट + ङीप् | वधूटी |
| चिरण्ट + ङीप् | चिरण्टी |

**'द्विगोः'** – द्विगुसंज्ञकाद् अनुपसर्जनाद् अदन्तात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति।

अयमर्थः – अदन्ताः ये द्विगुसंज्ञकाः शब्दाः तेभ्यः स्त्रीलिङ्गे ङीप् प्रत्ययः स्यात्। उदाहरणानि–

| **द्विगुसंज्ञकशब्दाः + ङीप् प्रत्ययः** | **ङीबन्ताःशब्दाः** |
|---|---|
| पञ्चानां पूलानां समाहारः पञ्चपूल + ङीप् | पञ्चपूली |
| पञ्चानां मूलानां समाहारः पञ्चमूल + ङीप् | पञ्चमूली |
| त्रयाणां लोकानां समाहारः त्रिलोक + ङीप् | त्रिलोकी |
| अष्टानाम् अध्यायानां समाहारः अष्टाध्याय + ङीप् | अष्टाध्यायी |

# अव्ययम्

संस्कृतभाषायां शब्दप्रकारद्वयमस्ति - विकारी अविकारी च। ये शब्दा: विभक्तिप्रत्यय-उपसर्गै: मिलित्वा रूपपरिवर्तनं कुर्वन्ति ते 'विकारी' इति शब्देन निर्दिश्यन्ते। अविकारिण: तु कदापि रूपपरिवर्तनं न कुर्वन्ति। एते 'अव्यय'-शब्देन कथ्यन्ते। अर्थात् येषु शब्देषु लिङ्गवचनकारकादि-सम्बन्धेन रूपपरिवर्तनं न भवति ते अव्ययानि सन्ति। उक्तं च -

**सदृशं त्रिषु लिङ्गेषु सर्वासु स विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**

अव्ययानां अन्ते आगतानां र्-स्-वर्णानां स्थाने विसर्ग: प्रयुज्यते यथा - उच्चैस्=उच्चै:, नीचैस्=नीचै:, अन्तर्=अन्त:, पुनर्=पुन: इति।

**अव्ययानामपि प्रकारद्वयमस्ति-** प्रथमं तावत् **रूढम्, अव्युत्पन्नं वा**। यथा-च, वा, विना, पृथगादीनि धातो: अव्युत्पन्नानि। द्वितीयं **यौगिकं व्युत्पन्नं वा**। यथा पठित्वा, पठितुमादीनि धातो: व्युत्पन्नानि कृदन्ताव्ययानि। सर्वदा, चतुर्धादीनि नाम्न: व्युत्पन्नानि तद्धिताव्ययानि च। तद्धिताव्ययानां भेदा अपि सन्ति। यथा -

विभक्ति बोधकानि- कुत:, ग्रामत:, कुत्र अत्रादीनि।

कालबोधकानि- यदा, कदा, सर्वदादीनि।

प्रकारबोधकानि- यथा, तथा, कथम्, इत्थम्, द्वेधादीनि।

विविधानि- अनेकश: पञ्चकृत्व आदीनि।

अत्र केषाञ्चिदव्ययानां अर्था: उदाहरणानि च प्रस्तूयन्ते -

| | **अव्ययम्** | **अर्थ:** | **उदाहरणम्** |
|---|---|---|---|
| १. | अपि | १. 'भी' इति भाषायाम्, एवम्, पुन: | अहमपि ग्रामं गच्छमि। |
| | | २. एतदतिरिक्तम् | अस्ति मे सोदरस्नेहोऽप्येतेषु। |
| | | ३. वाक्यारम्भे प्रश्नवाचक: | अपि सन्निहितोऽत्र कुलपति: ? |
| २. | इति | १. शब्दस्वरद्योतक: | कूजन्तं राम रामेति मधुरं मधुराक्षरम्। |
| | | २. कारणद्योत्यार्थे | वैदेशिकोऽस्मीति पृच्छामि। |
| | | (क्योंकि) | पुराणमित्येव न साधु सर्वम्। |
| | | ३. प्रातिपदिकार्थद्योतक: | दिलीप इति राजेन्दु:। |
| | | | अवैमि चैनामनघेति। |
| | | ४. उपसंहारार्थे | इति द्वितीयोऽध्याय:। |
| | | | इति प्रथमोऽङ्क:। |
| ३. | इव | १. उपमार्थक: | वागर्थाविव संपृक्तौ। |
| | | २. उत्प्रेक्षार्थक: | पश्यामीव पिनाकिनम्। |
| | | | लिम्पतीव तमोऽङ्गानि। |

| | | | |
|---|---|---|---|
| ४. | उच्चैः | महत्यर्थे | उच्चैः पर्वताः सन्ति। विपदि उच्चैः स्थेयम्। |
| | | | सः गायकः उच्चैः गायति। उच्चैर्विर्हस्य। |
| ५. | नूनम् | असंदिग्धरूपेण | नूनम् त्वया तत्र गन्तव्यम्। |
| | | निश्चयमेव | नूनं सः सत्यं वदति। |
| ६. | पुरा | पूर्वकाले | पुरा शुक्रमुपस्थाय। |
| | | | पुरा पाटिलिपुत्रनगरे नन्दः नाम राजा आसीत्। |
| ७. | मा | निषेधे | पापे रतिं मा कृथाः |
| | | | क्लैब्यं मा स्म गमः पार्थ!। |
| ८. | सहसा | विचारं विनैव | सहसा विदधीत न क्रियाम्। |
| | | अकस्मात् | अतिथिः सहसा एव गृहमागच्छत्। |
| ९. | बहिः | बाह्यतः, 'बाहर' इति भाषायाम् | ग्रामाद् बहिरुद्यानमस्ति। |
| | | | सः गृहाद् बहिः भ्रमति। |
| १०. | शनैः | मन्दगत्या | सः शनैश्चलितः। |
| ११. | कदा | कस्मिन् समये, 'कब' इति भाषायाम् | सः कदा विद्यालयं गच्छति? |
| १२. | कुतः | कस्मात् स्थानात् | कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्? |
| | | 'कहाँ' से' इति भाषायाम् | कुतः समायातो योगी? |
| १३. | इतस्ततः | 'इधर-उधर' इति भाषायाम् | विलुप्तो बालः इतस्ततः कुत्रापि न प्राप्तः। |
| | | व्यर्थम् | सः इतस्ततः भ्रमति समयं च यापयति। |
| १४. | अत्र | अस्मिन् स्थले | सः अत्र निवसति। |
| | | 'यहाँ' इति भाषायाम् | यत्ने कृते यदि न सिध्यति कोऽत्र दोषः। |
| १५. | तत्र | तस्मिन् स्थले | सः जयपुरे पठति, तत्र एव निवसति। |
| | | 'वहाँ' इति भाषायाम् | |
| | | कारणार्थे (हेत्वर्थे) | निरीतयः यन्मदीयाः प्रजाः। |
| | | | तत्र हेतुस्त्वद् ब्रह्मवर्चसम्।। |
| | | आदरार्थे | तत्रभवान् काश्यपः। |
| १६. | इदानीम् | अधुना, सम्प्रति | दयालः इदानीं क्रीडति। वत्से प्रतिष्ठस्वेदानीम्! |
| १७. | सम्प्रति | अधुना, इदानीम् | सम्प्रति, गम्यतां विद्यालयम्। |
| | | | अयि! सम्प्रति देहि दर्शनम्। |
| १८. | यदा | यस्मिन् काले | यदा सूर्योदयो भवति, सः पाठं पठति। |
| | | 'जब' इति भाषायाम् | पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्। |
| १९. | कदा | कस्मिन् काले | कदा गमिष्यसि? एष गच्छामि। |

| | | | |
|---|---|---|---|
| | | 'कब' इति भाषायाम् | |
| २०. | यथा | येन प्रकारेण | सः यथा वदति तथैव करोति। |
| | | | यथा देवदत्तः तथा विष्णुदत्तः अस्ति। |
| २१. | तथा | तेन प्रकारेण | सः तथा कार्यं करोति। |
| | | | सः यथा वदति तथा करोति। |
| २२. | विना: | विहीनः | ज्ञानं विना न मुक्तिः। |
| | | अभावः | यथा तानं विना रागो, यथा मानं विना नृपः। |
| | | | यथा दानं विना हस्ती, तथा ज्ञानं विना यतिः।। |
| २३. | श्वः | आगामि दिवसः | अहं श्वः जयपुरं गमिष्यामि। |
| | | | वरमद्य कपोतो न श्वो मयूरः। |
| २४. | ह्यः | गते अहनि | अहं ह्यः भरतपुरम् अगच्छम्। |
| | | व्यतीतः दिवसः | सः ह्यः पाठम् अपठत्। |
| २५. | अधुना | इदानीम्, सम्प्रति, अस्मिन् काले | अधुना बालाः पठन्ति। |
| २६. | कदापि | 'कभी' इति भाषायाम् | कदापि अधर्मं न आचरेत्। |
| | | | सः कदापि न रोदिति। |
| २७. | किम् | दोषार्थकः निन्दार्थे वा | हितान्न यः संशृणुते स किं प्रभुः, |
| | | | स किं सखा साधु न शास्ति योऽधिपम्। |
| | | | सः किं पठति। (अनध्यायप्रियः इति) |
| २८. | यत् | येन केन प्रकारेण | यत् किञ्चिदेतत्। |
| | | यद्यपि | वक्रः पन्था यदपि भवतः ......। |
| | | ''क्योंकि'' इति | रामोऽवदत् यत् सः सर्वम् अपश्यत्। |
| | | भाषायाम् | रामः सत्यं वदति यत् सः सर्वम् अपश्यत्। |
| २९. | यावत् | ''जितना'' इति भाषायाम्, | यावद् दत्तम्, तावद् भुक्तम्। |
| | | मर्यादायाम्, | गङ्गदत्तः सर्पकोटरं यावत् अगच्छत्। |
| | | पर्यन्तम्, | एकस्य दुःखस्य न यावदत्तं गच्छामि, |
| | | (तावत्-सहसम्बन्धी) | तावत् द्वितीयं समुपस्थितं मे। |
| | | | यावत् वित्तोपार्जन सक्तः, |
| | | | तावत् निजपरिवारो रक्तः। |
| ३०. | तावत् | 'उतना' इति भाषायाम् | यादव् दत्तम्, तावद् भुक्तम्। |
| | | पूर्वम् | आर्ये इतस्तावदागम्यताम्। |
| | | वस्तुतः | दृढस्तावद्बन्धः |
| | | निस्सन्देहः | त्वमेव तावत्प्रथमो राजद्रोही। |

# वाच्यपरिवर्तनम्

संस्कृत-भाषायां, सर्वासु भारतीयभाषासु, अन्यासु च भारोपीयभाषासु वाच्यस्य महत्त्वपूर्णं स्थानं वर्तते। वाच्यस्य सम्यग्ज्ञानं विना भाषाया: आकार: न अवगम्यते।

संस्कृतभाषायां त्रीणि वाच्यानि भवन्ति — कर्तृवाच्यं, कर्मवाच्यं, भाववाच्यं च। क्रियया कथितं कथनप्रकारम् वाच्यम्। कर्तृ-कर्म-भावेषु क्रियया एक: कथ्यते। अत: क्रिया कर्तृवाच्ये, कर्मवाच्ये, भाववाच्ये वा भवति।

'पठति' इति कथिते सति प्रश्न: समुदेति यत् 'क: पठति ?' अस्य उत्तररूपेण कथ्यते- 'कोऽपि पठनकर्त्ता पठति' इति। अनेन प्रकारेण अत्र क्रियया कर्त्ता सूच्यते, अत: 'पठति' इत्यत्र कर्तृवाच्यमस्ति। अन्यत: 'पठ्यते' इति कथिते सति प्रश्न: समुदेति 'किम् पठ्यते' इति। उत्तररूपेण कथयितुं शक्यते यत् कोऽपि ग्रन्थ: किमपि पुस्तकं वा पठ्यते। अनेन स्पष्टं यत् अत्र पठ्यते क्रियया कर्म उच्यते। अत: 'पठ्यते' इत्यत्र कर्मवाच्यमस्ति। कर्तृवाच्यं तु सकर्मकाकर्मकाणां सर्वासामेव क्रियाणां भवति, किन्तु कर्मवाच्यं सकर्मकक्रियाणामेव भवितुं शक्यते, तत्र कर्मण: सद्भावात्। यासां क्रियाणां कर्म न भवति ता: अकर्मकक्रिया: कथ्यन्ते, यथा 'हस्', 'शी' इत्यादय:। संस्कृतभाषायां अकर्मकक्रियाभि: भाववाच्यं कर्तृवाच्यं च भवति। तत्र कर्मण: अविद्यमानत्वात् कर्मवाच्यं कर्तुं न शक्यते। उदाहरणार्थं 'स्वप्' अकर्मक अस्ति। तत्र भाववाच्यं 'सुप्यते' भविष्यति। भावस्य अर्थ अस्ति 'क्रिया'। अर्थात्- 'सुप्यते' पदेन नैव कर्त्ता कथ्यते नापि कर्म कथ्यते, अपितु क्रिया एव कथ्यते। अत: 'सुप्यते' भाववाच्यमस्ति। सामान्यरूपेण अत्र वाच्यानां स्वरूपं प्रदर्शितम्।

वाक्यरचनाविशेषे वाच्यानुसारिण: केचन नियमा: सन्ति, तेषां ज्ञानं वाक्यरचनायै आवश्यकम्।

**कर्तृवाच्यम्** —

कर्तृवाच्ये कर्तु: प्राधान्यं भवति, अत: क्रिया लिङ्गपुरुषवचनेषु कर्तारमनुसरति। तद्यथा- बालक: विद्यालयं गच्छति। बालकौ विद्यालयं गच्छत:। बालका: विद्यालयं गच्छन्ति। त्वं किं करोषि ? युवां किं कुरुथ: ? यूयं किं कुरुथ ? अहं ग्रन्थं पठामि। आवां ग्रन्थौ पठाव:। वय ग्रन्थान् पठाम:। उक्तञ्च —

**कर्तरि प्रथमा यत्र द्वितीयाऽथ च कर्मणि।**
**कर्तृवाच्यं भवेत् तत्तु क्रिया कर्त्रनुसारिणी।।**

**कर्मवाच्यम्** —

अत्र कर्मण: प्राधान्यं भवति। अत: क्रिया लिङ्गपुरुषवचनेषु कर्मानुसारिणी। कर्तृवाच्यस्य कर्त्ता कर्मवाच्ये तृतीया विभक्तौ भवति कर्म च प्रथमा-विभक्तौ भवति। अत्र सर्वा: धातव: आत्मनेपदिन: भवन्ति, मध्ये 'य' युज्यते च। तद्यथा- छात्रेण विद्यालय: गम्यते। छात्राभ्यां पुस्तके पठ्येते। अस्माभि: पद्यानि पठ्यन्ते। तदुक्तम —

**कर्मणि प्रथमा यत्र तृतीयाऽथ कर्तरि।**
**कर्मवाच्यं भवेत् तत्तु क्रिया कर्मानुसारिणी।।**

संस्कृतभाषायां कर्मवाच्यस्य, भाववाच्यस्य च प्रयोग: बहुश: क्रियते।

**भाववाच्यम्** —

अकर्मकधातूनां कर्मवाच्यसदृशं रूपं यस्मिन् प्रयोगे दृश्यते स: भाववाच्य-प्रयोग:। अत्र क्रिया केवलं भावं सूचयति। अत: सा सदैव केवलं प्रथमपुरुषैकवचने प्रयुज्यते। सा कर्त्तु: लिङ्गपुरुषवचनानि नैव अनुसरति। यत्र लिङ्गम् अपेक्षितं तत्र नपुंसकलिङ्गैकवचनमेव प्रयुज्यते। कृदन्ते क्रिया-प्रयोगे कृते सति सा नपुंसकलिङ्गप्रथमैकवचने एव स्यात्। भाववाच्ये प्रथमाविभक्त्यन्त पदं नैव दृश्यते। भाववाच्येऽपि कर्त्ता तृतीयाविभक्तौ भवति। तद्यथा —

| | | | |
|---|---|---|---|
| तेन | ताभ्याम् | तै: | |
| अनेन | आभ्याम् | एभि: | अन्यपुरुष: पुल्लिङ्गे |
| भवता | भवद्भ्याम् | भवद्भि: | |
| | | | |
| तया | ताभ्याम् | ताभि: | |
| अनया | आभ्याम् | आभि: | अन्यपुरुष: स्त्रीलिङ्गे |
| भवत्या | भवतीभ्याम् | भवतीभि: | |
| | | | |
| त्वया | युवाभ्याम् | युष्माभि: | मध्यपुरुष: |
| मया | आवाभ्याम् | अस्माभि: | उत्तमपुरुष: |

- जायते/खेल्यते/हस्यते/सुप्यते/म्रियते/जातम्/खेलितम्/हसितम्/सुप्तम्/मृतम्। तदुक्तम् यथा —

**भावाच्ये क्रिया वक्ति न कर्त्तारं न कर्म च।**
**तत्र कर्त्ता तृतीयायां क्रिया भावानुसारिणी।।**
**भावे तु कर्मवाच्यक्रियैकवचने प्रथमपुरुषे।**
**सा चेद्भवेद्कृदन्ता क्लीबप्रथमैकवचने स्यात्।।**

**अकर्मकधातव: सन्ति:** —

लज्ज्, भू, स्था, जागृ, वृध्, क्षि, भी, जीव्, मृ, कुट्, कण्ठ्, भ्रम्, यत्, ग्लौ, जॄ, कृप्, च्युत्, शम्, ध्वन्, मस्ज्, कद्, जृम्भ्, रम्भ्, रुद्, हस्, शी, क्रीड्, रुच्, दीप् इति इमे; एतत्समानार्थकधातवश्च। पद्ये उपर्युक्तधातूनां परिगणनं निम्नप्रकारेण कृतम् —

**लज्जासत्तास्थितिजागरणं, वृद्धिक्षयभयजीवितमरणम्।**
**कौटिल्यौत्सुक्यभ्रमयत्नग्लानिजरा सामर्थ्यक्षरणम्।।**
**शान्तिध्वनिमज्जनवैकल्यं, जृम्भणरम्भणरोदनहसनम्।**
**शयनक्रीडारुचिदीप्त्यर्थं, धातुगणं तमकर्मकमाहु:।।**

एतदतिरिक्तान्यधातव: तु सकर्मका: एव। अत्र कर्तृकर्मानुसारिणी कर्तृकर्मवाच्ययो: तालिका प्रस्तूयते। अनया तालिकया वाच्यपरिवर्तनाभ्यास: कर्त्तव्य: —

| **कर्तृवाच्यम्** | **कर्मवाच्यम्** |
|---|---|
| भवान् /सः पठति। | भवता/तेन पठ्यते। |
| भवन्तौ/तौ पठतः। | भवद्भ्याम्/ताभ्यां पठ्यते। |
| भवन्तः/ते पठन्ति। | भवद्भिः/तैः पठ्यते। |
| भवती/सा पठति। | भवत्या/तया/ पठ्यते। |
| भवत्यौ/ते पठतः। | भवतीभ्याम्/ताभ्याम् पठ्यते। |
| भवत्यः/ताः पठन्ति। | भवतीभिः/ताभिः पठ्यते। |
| त्वं पठसि। | त्वया पठ्यते। |
| युवाम् पठथः। | युवाभ्याम् पठ्यते। |
| यूयम् पठथ। | युष्माभिः पठ्यते। |
| अहं पठामि। | मया पठ्यते। |
| आवाम् पठावः। | आवाभ्याम् पठ्यते। |
| वयम् पठामः। | अस्माभिः पठ्यते। |
| एषः/अयं बालकः पठति। | एतेन/अनेन बालकेन पठ्यते। |
| एषा/इयं बालिका पठति। | एतया/अनया बालिकया पठ्यते। |
| एतौ/इमौ बालकौ पठतः। | एताभ्यां/आभ्यां बालकाभ्यां पठ्यते। |
| एते/इमे बालिके पठतः। | एताभ्यां/आभ्यां बालिकाभ्यां पठ्यते। |
| एते/इमे बालकाः पठन्ति। | एतैः/एभिः बालकैः पठ्यते। |
| एताः/इमाः बालिकाः पठन्ति। | एताभिः/आभिः बालिकाभिः पठ्यते। |
| अहं श्लोकं पठामि। | मया श्लोकः पठ्यते। |
| अहं श्लोकौ पठामि। | मया श्लोकौ पठ्येते। |
| अहं श्लोकान् पठामि। | मया श्लोकाः पठ्यन्ते। |
| अहं पुस्तकं पठामि। | मया पुस्तकं पठ्यते। |
| अहं पुस्तके पठामि। | मया पुस्तके पठ्येते। |
| अहं पुस्तकानि पठामि। | मया पुस्तकानि पठ्यन्ते। |
| अहं कथां पठामि। | मया कथा पठ्यते। |
| अहं कथे पठामि। | मया कथे पठ्येते। |
| अहं कथाः पठामि। | मया कथाः पठ्यन्ते। |

लट्लकारे कतिपयधातूनां कर्मवाच्यरूपाणि (प्रथम-पुरुषे) अत्र प्रस्तूयन्ते। अन्यधातूनां रूपाणि अनेन प्रकारेण निर्मातुं शक्यन्ते —

**लट्‌लकारः**

| **धातवः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| बुध् | बुध्यते | बुध्येते | बुध्यन्ते |
| गम् | गम्यते | गम्येते | गम्यन्ते |
| कृ | क्रियते | क्रियेते | क्रियन्ते |
| लभ् | लभ्यते | लभ्येते | लभ्यन्ते |
| दा | दीयते | दीयेते | दीयन्ते |
| पा | पीयते | पीयेते | पीयन्ते |
| गै-गा | गीयते | गीयेते | गीयन्ते |
| नी | नीयते | नीयेते | नीयन्ते |
| श्रू | श्रूयते | श्रूयेते | श्रूयन्ते |
| स्मृ | स्मर्यते | स्मर्येते | स्मर्यन्ते |
| भू | भूयते | भूयेते | भूयन्ते |
| स्था | स्थीयते | स्थीयेते | स्थीयन्ते |
| आस् (सीद्) | आस्यते | आस्येते | आस्यन्ते |
| हस् | हस्यते | हस्येते | हस्यन्ते |
| शीङ् | शय्यते | शय्येते | शय्यन्ते |

भाववाच्ये क्रिया प्रथमपुरुषैकवचने एव प्रयुज्यते।

## घटिकाचित्रसाहाय्येन समय-लेखनम्

(सामान्य-सपाद-सार्ध-पादोन इत्यादय:)

**संस्कृत-भाषा-व्यवहारे घटिका-सम्बन्धि-कालसूचक-शब्दानां प्रयोग: अतीव सरल: भवति, तदेव अत्र प्रदर्श्यते। आदौ तावत् सामान्य-समयलेखनम् इत्युक्ते पूर्ण-समयलेखनं कथमिति दर्श्यते-**

### सामान्यम् (पूर्णम्)

**घटिका-चित्रम्** **घटिका-चित्रम्**



राम: प्रात: **पञ्चवादने** उत्तिष्ठति।

(राम प्रात: पाँच बजे उठता है।)



रमा **नववादने** विद्यालयं गच्छति।

(रमा नौ बजे विद्यालय जाती है।)



कृष्ण: **एकादशवादने** लेखम् अलिखत्।

(कृष्ण ने ग्यारह बजे लेख लिखा।)



कृष्णा **सप्तवादने** गृहकार्यं करोति।

(कृष्णा सात बजे घर का काम करती है।)



कृष्णा **त्रिवादने** विद्यालयात् आगच्छति।

(कृष्णा तीन बजे विद्यालय से आती है।)



अनसूया **षड्वादने** मन्दिरं गच्छति।

(अनसूया छ: बजे मन्दिर जाती है।)



विमला **दशवादने** शयनं करोति।

(विमला दस बजे सोती है।)



सा प्रात: **द्विवादने** स्वप्नं पश्यति।

(वह प्रात: दो बजे स्वप्न देखती है।)

## सपाद-सार्ध-पादोन

**चतुर्थांशः 'पाद' इति अर्धांशः च 'अर्ध' इति कथ्यते। अतो हि 'सवा' इत्यस्य कृते संस्कृते 'सपाद' इति, 'साढ़े' इत्यस्य कृते 'सार्ध' इति, 'पौन' इत्यस्य कृते च 'पादोन' इति शब्दः प्रयुज्यते। यथा-**

| | |
|---|---|
| अब सवा चार बजे हैं। | अधुना **सपादचतुर्वादनम्** अस्ति। |
| अब साढ़े चार बजे हैं। | अधुना **सार्धचतुर्वादनम्** अस्ति। |
| अब पौने चार बजे हैं। | अधुना **पादोनचतुर्वादनम्** अस्ति। |

**एकैकां घटिकां दृष्ट्वा तत्सम्बद्ध-वाक्यं च पठित्वा वदन्तु यत् कः कः कतिवादने किं किं करोति-**

**अनिलः**



अनिलः कदाः उत्तिष्ठति।

(अनिल कब उठता है?)

अनिलः **सार्धचतुर्वादने** उत्तिष्ठति।

(अनिल साढ़े चार बजे उठता है।)

**रमा**



रमा कदा उत्तिष्ठति

(रमा कब उठती है?)

रमा **सपादचतुर्वादने** उत्तिष्ठति

(रमा सवा चार बजे उठती है।)

**सुधा**



सुधा कदा उत्तिष्ठति

(सुधा कब उठती है?)

सुधा **पादोनपञ्चवादने** उत्तिष्ठति।

(सुधा पौने पाँच बजे उठती है।)

**राकेशः**



राकेशः कदा भ्रमणाय गच्छति?

राकेशः पादोन **पञ्चवादने** भ्रमणाय गच्छति।

(राकेश पौने पाँच बजे सैर को जाता है।)

**मदनः**



मदनः कदा भ्रमणाय गच्छति?

मदनः **सार्धपञ्चवादने** भ्रमणाय गच्छति।

(मदन साढ़े पाँच बजे सैर को जाता है।)

**पङ्कजः**



पङ्कजः कदा भ्रमणाय गच्छति?

पङ्कजः **सपादपञ्चवादने** भ्रमणाय गच्छति।

(पङ्कज सवा पाँच बजे सैर को जाता है।)

**आनन्दः**



आनन्दः कदा व्यायामं करोति?

आनन्दः **पादोनषड्वादने** व्यायामं करोति।

(आनन्द पौने छः बजे व्यायाम करता है।)

**राजेशः**



राजेशः कदा स्नानादिकं करोति?

राजेशः **सार्धषड्वादने** स्नानादिकं करोति।

(राजेश साढ़े छः बजे स्नानादि करता है।)

**देवदत्तः**



देवदत्तः कदा प्रातराशं करोति?

देवदत्तः **सपादसप्तवादने** प्रातराशं करोति।

(देवदत्त सवा सात बजे अल्पाहार करता है।)

**कला / निमेषः**

**'मिनिट' इत्यस्य कृते 'कला' अथवा 'निमेषः' इति शब्दस्य प्रयोगः भवति। '५.१० वादनम्' इति अर्थं बोधयितुं अङ्कानां स्थाने दश कलोत्तर-पञ्चवादनम् / दश निमेषोत्तर-पञ्चवादनम् / दश कलाधिक पञ्चवादनम् / दश निमेषाधिक-पञ्चवादनम् / दशोत्तर-पञ्चवादनम् / दशाधिक-पञ्चवादनम् वा इत्येवं शब्दप्रयोगः क्रियते। इदानीम उदाहरणानि पश्यन्तु -**

कलामः



कलामः **अष्टकलोत्तर-नववादने** गच्छति।

(कलाम नौ बजकर आठ मिनट पर जाता है।)

हामिदः



हामिदः **विंशत्युत्तर-द्वादशवादने** स्वपिति।

(हामिद बारह बजकर बीस मिनट पर सोता है।)

**समयबोधकानि अन्यवाक्यानि**

| | |
|---|---|
| आपको दो बजे अवश्य जाना है। | भवता **द्विवादने** अवश्यं गन्तव्यम् अस्ति। |
| ठीक तीन बजे एक बस छूटती है। | **त्रिवादने** एकं बसयानं गच्छति। |
| क्या तुम पौने छः बजे मिलते हो? | किं त्वं **पादोन षड्वादने** मिलसि? |
| मैं साढ़े पाँच बजे घर पर ही रहता हूँ। | अहं **सार्धपञ्चवादने** गृहे एव तिष्ठामि। |
| संस्कृत-वार्ता प्रसार कब होता है? | संस्कृतवार्ताप्रसारः **कदा** भवति? |
| ढाई घण्टे का कार्यक्रम है। | **सार्धद्विघण्टात्मकः** कार्यक्रमः। |
| क्या दस बज गए? | किम **दशवादनम्** जातम्? |
| मैं छः बजे से सात बजे तक पढ़ता हूँ। | अहं **षड्वादनतः सप्तवादनपर्यन्तं** पठामि। |
| अब तीन बजने में पाँच मिनट है। | अधुना **पञ्चन्यूनत्रिवादनम्** अस्ति। |
| अब चार बजकर दस मिनट है। | अधुना **दशाधिकचतुर्वादनम्** अस्ति। |
| अब छः बजकर चालीस मिनट है। | अधुना **चत्वारिंशदधिकषड्वादनम्** अस्ति। |
| सवा बजे लिखता है। | **सपादैक-वादने** लिखति। |
| सात बजकर चालीस मिनट पर कहता है। | **चत्वारिंशत्यधिक-सप्तवादने** कथयति। |
| अब आठ बजकर पचास मिनट हुए हैं। | अधूना **पञ्चाशदधिक-अष्टवादनम्** अस्ति। |
| चार बजे से छः बजे तक खेलता है। | **चतुर्वादनतः षड्वादन-पर्यन्तं** क्रीडति। |
| तस्लीमा नसरीन सवा बारह बजे बोलती है। | तस्लीमा नसरीनः **सपाद-द्वादशवादने** भाषते। |

## अभ्यास प्रश्नाः

**प्रश्नः १.** स्वकीयां दिनचर्यां लेखितुं रिक्तस्थानानां पूर्तिम् उचितपदैः कुरुत–

प्रातः अहं ............... उत्तिष्ठामि। उत्थाय अहं ............... भ्रमणाय गच्छामि। अहं .................. तः ..............पर्यन्तं विद्यालयं तिष्ठामि। अहं मध्याह्ने ............... वादने भोजनं करोमि। तदनन्तरं ................... तः ............. पर्यन्तं विश्रामं करोमि। .............. तः ................ पर्यन्तं गृहकार्य करोमि। .............................. तः ....................... पर्यन्तं क्रीडामि। ....................... रात्रिभोजनं करोमि। रात्रौ .................. तः .......................... पर्यन्तम् अध्ययनं कृत्वा ........... शयनाय गच्छामि।

**प्रश्नः २.** विद्यालयस्य समयसारिणीम् उचित समयवाचकैः पदैः पूरयित्वा लिखत –

| | |
|---|---|
| ७.३० प्रातः | प्रातः ....................... वादने प्रार्थना। |
| १०.०० प्रातः | प्रातः ....................... अर्धावकाशः। |
| १०.१५ प्रातः | प्रातः ..................... वादने पञ्चमः कालांशः। |
| १२.४५ अपराह्ने | अपराह्ने ................. वादने पूर्णः अवकाशः। |

**प्रश्नः ३.** दीपावल्युत्सवस्य अधोलिखिते कार्यक्रमे अङ्कानां स्थाने शब्दैः समयं लिखत –

सायं (७.३०) .................. वादने सामुदायिक–भवने आगमनम्।

सायं (८.००) .................. वादने कवितापाठः।

रात्रौ (९.१५) .................. वादने प्रीतिभोजनम्।

रात्रौ (९.४५) .................. वादने प्रसादवितरणम्, प्रस्थानं च।

**प्रश्नः ४.** अधोलिखितसारिण्याम् अङ्कानां स्थाने संस्कृतपदैः समयम् लिखत–

प्रातः (६.३०) .................. वादने ईशवन्दना।

प्रातः (७.४५) .................. वादने उपाहारः।

प्रातः (८.१५) .................. वादने संस्कृतसम्भाषणाभ्यासः।

प्रातः (११.००) ................ वादने वर्तनी–संशोधनम्।

**प्रश्नः ५.** अधस्तन–घटिका–चित्राणि दृष्ट्वा समयं लिखत–



.............................. .............................. .............................. ..............................

## अशुद्धि-संशोधनम्

शुद्धिः कस्मै न रोचते? यथा जीवने आहार-व्यवहारादिषु सर्वत्र शुद्धिः अपेक्षिता भवति तथैव भाषा-व्यवहारेऽपि शुद्धिः इष्यते। संस्कृतेन भाषण-पठन-लेखनादिव्यवहारः क्रियते चेत् शुद्धिः सविशेषम् आवश्यिकी।

संस्कृते कारक-विभक्ति-समास-सन्धि-प्रत्यय-लिङ्गादेः सम्यक् ज्ञानाभावाद् अशुद्धयः भवन्ति। तन्निवारणाय अभ्यासः करणीयः इति कानिचन उदाहरणानि अत्र दीयन्ते।

### विभक्ति-विषयकम् अशुद्धि-संशोधनम्

| **अशुद्धम्** | **शुद्धम्** |
|---|---|
| कृष्णम् इति वसुदेवपुत्रः। | कृष्णः इति वसुदेवपुत्रः। |
| विष्णुः वैकुण्ठे अधिशेते। | विष्णुः वैकुण्ठमधिशेते। |
| सज्जनः आसने अधितिष्ठति। | सज्जनः आसनमधितिष्ठति। |
| ग्रामस्य परितः वृक्षाः सन्ति। | ग्रामं परितः वृक्षाः सन्ति। |
| नगरस्य निकषा उपवनमस्ति। | नगरं निकषा उपवनमस्ति। |
| गुरुजनस्य अनुसरति। | गुरुजनम् अनुसरति। |
| रामस्य सह सीता वनमगच्छत्। | रामेण सह सीता वनमगच्छत्। |
| नेत्रात् काणः। | नेत्रेण काणः। |
| पादस्य खञ्ज। | पादेन खञ्जः |
| जटाभ्यः तापसोऽस्ति। | जटाभिः तापसोऽस्ति। |
| विवादात् अलम्। | विवादेन अलम्। |
| कलहात् किम्। | कलहेन किम्। |
| भिक्षुकं वस्त्राणि यच्छति। | भिक्षुकाय वस्त्राणि यच्छति। |
| मां रूप्यकाणि देहि। | मह्यं रूप्यकाणि देहि। |
| बालकं फलं रोचते। | बालकाय फलं रोचते। |
| रमा दुग्धं स्वदते। | रमायै दुग्धं स्वदते। |
| राजा भृत्ये क्रुध्यति। | राजा भृत्याय क्रुध्यति |
| बालकं स्वस्ति। | बालकाय स्वस्ति। |
| जनकं नमः। | जनकाय नमः। |
| सः शिक्षकं निवेदयति। | सः शिक्षकाय निवेदयति। |
| वृक्षेण पत्राणि पतन्ति। | वृक्षात् पत्राणि पतन्ति। |
| हिमालये गंगा निर्गच्छति। | हिमालयात् गंगा निर्गच्छति। |
| पापेन विरमति। | पापात् विरमति। |
| सत्यं मा प्रमद। | सत्यात् मा प्रमद। |

| | |
|---|---|
| बाल: सिंहेन विभेति। | बाल: सिंहात् विभेति। |
| रक्षक: चौराय त्रायते। | रक्षक: चौरात् त्रायते। |
| शिक्षकेण गणितं पठति। | शिक्षकात् गणितं पठति। |
| आचार्याय अधीते। | आचार्याद् अधीते। |
| लोभेन क्रोधो भवति। | लोभात् क्रोधो भवति। |
| बीजे पादप: जायते। | बीजात् पादप: जायते। |
| माता गुरुतरा भूमि:। | माता गुरुतरा भूमे:। |
| पठनस्य अनन्तरम्। | पठनाद् अनन्तरम्। |
| केन हेतु: वसति। | केन हेतुना वसति। |
| वृक्षे उपरि काक: तिष्ठति। | वृक्षस्य उपरि काक: तिष्ठति। |
| वृक्षेभ्य: अध: छाया। | वृक्षाणाम् अध: छाया। |
| भोजनेन कृते गच्छामि। | भोजनस्य कृते गच्छामि। |
| कटम् आस्ते। | कटे आस्ते। |
| कविभि: कालिदास: श्रेष्ठ:। | कविषु कालिदास: श्रेष्ठ:। |
| पिता पुत्रस्य स्निह्यति। | पिता पुत्रे स्निह्यति। |
| स रामस्य विश्वसिति। | स रामे विश्वसिति। |
| मृगस्य बाणं क्षिपति। | मृगे बाणं क्षिपति। |
| रमा कार्यस्य कुशला। | रमा कार्ये कुशला। |
| महेश: कार्येण संलग्न:। | महेश: कार्ये संलग्न:। |
| श्याम: गायनात् दक्ष:। | श्याम: गायने दक्ष:। |
| विद्या बुद्धि: वर्धते। | विद्यया बुद्धि: वर्धते। |
| बालकं मोदकं भृशं रोचते। | बालकाय मोदकं भृशं रोचते। |
| शिक्षकाय समक्षं छात्र: पाठ: पठति। | शिक्षकस्य समक्षं छात्र: पाठं पठति। |
| बालेऽस्य स्निह्यति मे मन:। | बालेऽस्मिन् स्निह्यति मे मन: |

### लिङ्ग-पुरुष-वचन-लकारविषयकम् अशुद्धि-संशोधनम्

| **अशुद्धम्** | **शुद्धम्** |
|---|---|
| स: बालक पश्यसि। | स: बालकं पश्यति। |
| बालक: गच्छत:। | बालक: गच्छति। |
| राम: हसामि। | राम: हसति। |
| छात्रा लिखसि। | छात्रा लिखति। |
| अहं गच्छति। | अहं गच्छामि। |
| त्वं पियामि। | त्वं पिबसि। |

| | |
|---|---|
| वयं हसाव:। | वयं हसाम:। |
| छात्रौ वदन्ति। | छात्रा: वदन्ति। |
| स: कलमात् लिखति। | स: कलमेन लिखति। |
| स: बालक यच्छति। | स: बालकाय यच्छति। |
| स: रामस्य सह गच्छति। | स: रामेण सह गच्छति। |
| भवान् कुत्र गच्छन्ति? | भवान् कुत्र गच्छति? |
| यूयं पठ। | यूयं पठत। |
| त्वं हसत। | त्वं हस। |
| स: मम भ्राता असि। | स: मम भ्राता अस्ति। |
| स: मम भगिनी अस्ति। | सा मम भगिनी अस्ति। |
| अहं तव नामं जानामि। | अहं तव नाम जानामि। |
| अहं तव कार्यं जानीम:। | अहं तव कार्यं जानामि। |
| सुधा रामं पत्रं लिखति। | सुधा रामाय पत्रं लिखति। |
| रमा रामाय पत्रं लिखामि। | रमा रामाय पत्रं लिखति। |
| पर्वता: रम्याणि सन्ति। | पर्वता: रम्या: सन्ति। |
| वृक्षाणि रम्या: सन्ति। | वृक्षा: रम्या: सन्ति। |
| ते मम मित्राणि अस्ति। | ते मम मित्राणि सन्ति। |
| अत्रभवान् काश्यप: आयान्ति। | अत्रभवान् काश्यप: आयाति। |
| ते कन्ये पठति। | ता: कन्या: पठन्ति। |
| ते परधनं न चोरयति। | ते परधनं न चोरयन्ति। |
| इदं कार्यं कठिन: अस्ति। | इदं कार्यं कठिनम् अस्ति। |
| स: विद्यालये द्वितीयम् आसीत्। | स: विद्यालये द्वितीय: आसीत्। |
| ते कक्षायां प्रथमम् अतिष्ठन्। | स: कक्षायां प्रथम: अतिष्ठत्। |
| मह्यं दुग्धं न रोचे। | मह्यं दुग्धं न रोचते। |
| त्वं प्रतिदिनं पठति। | त्वं प्रतिदिनं पठसि। |
| अहं च ते च हसन्ति। | अहं च ते च हसाम:। |
| वयं वृक्षात् पश्यन्ति। | वयं वृक्षात् पश्याम:। |
| भवान् कुत्र गच्छामि? | भवान् कुत्र गच्छति? |
| नद्य: प्रवहति। | नद्य: प्रवहन्ति। |
| मृग: प्रतिदिनं शस्यम् अखादन्। | मृग: प्रतिदिनं शस्यम् अखादत्। |
| ते श्व: पाठम् स्मरन्ति। | ते श्व: पाठं स्मरिष्यन्ति। |
| माता ह्य: गतवान्। | माता ह्य: गतवती। |

# रचनात्मकं कार्यम्

(Composition Work)

## पत्र-लेखनम्

अयं कालः संचारक्षेत्रे समृद्धकालः अस्ति। विचाराणाम् आदानप्रदानार्थं बहूनि संचारसाधनानि सन्ति परम् अद्यापि पत्रं विचारसम्प्रेषणस्य प्रमुखं साधनं वर्तते। पत्रस्य महत्त्वम् अनेन ज्ञातुं शक्यते यत् अस्मिन् संचारसमृद्धकालेऽपि कार्यालय-सम्बन्धि-सूचनानाम् आदान-प्रदानं पत्रमाध्यमेन एव अधिकं भवति।

पत्रमाध्यमेन वयं विविध-वार्ताः, वैयक्तिकविचारान्, चिन्तनानि, संवेदनाः, अनुभूतिं च प्रकटयितुं शक्नुमः। व्यापारक्षेत्रे, कार्यालयानां कार्यसंदर्भे च वयं पत्राणाम् एव प्रयोगं कुर्मः। अतएव अस्मिन् युगेऽपि पत्रलेखनस्य विशिष्टं महत्त्वं वर्तते। पत्रं द्विविधं भवति — १. औपचारिक-पत्रम् २. अनौपचारिक-पत्रम्

औपचारिकपत्रान्तर्गतं सर्वकारकार्यालयैः व्यावसायिकसंस्थाभिः च कृतः पत्रव्यवहारः आयाति। शुभकामनापत्रं, निमन्त्रणपत्रं, शोकसंवेदनापत्रं, समस्यामूलकपत्रम् इत्यादीनि पत्राणि अपि औपचारिकपत्राणि एव कथ्यन्ते।

अनौपचारिकपत्रस्य अपरनाम व्यक्तिगतपत्रमपि भवति। स्वात्मीयजनानां कृते यत् पत्रं लिख्यते तत् अनौपचारिकपत्रं, व्यक्तिगतपत्रं वा कथ्यते।

अत्र अभ्यासार्थं कानिचन पत्राणि दीयन्ते। छात्राः तानि पठित्वा पत्रलेखनस्य अभ्यासं कुर्युः।

## अनौपचारिक-पत्राणि

### ( १ ) पित्रे पत्रम्

जयपुरतः

दिनाङ्कः ११.०३.२०१६

श्रद्धेयेषु पितृचरणेषु,

सादरं प्रणामाः।

अत्रकुशलं तत्रास्तु। भवदीयं स्नेहापूरितं पत्रम् अद्यैव अहं प्राप्तवान्। सम्पूर्णं वृत्तं च ज्ञातवान्। अधुना मम वार्षिकी परीक्षा प्रचलति। परीक्षायाम् इदानीं यावत् सर्वाणि प्रश्नपत्राणि सम्यक् अभवन्। शेषविषयाणां स्थितिः अपि समीचीना वर्तते। आशासे यत् परीक्षायाम् उत्तमान् अङ्कान् प्राप्य कक्षायां श्रेष्ठस्थानं प्राप्स्यामि।

परीक्षानन्तरं शीघ्रमेव गृहम् आगमिष्यामि। पूजनीयेषु मातृचरणेषु मम प्रणामः कथनीयः। अनुजाय आशिषः।

भवदाज्ञाकारी पुत्रः
राकेशः

## (२) अनुजाय पत्रम्

बीकानेरतः
संस्कृत-दिवसः
दिनाङ्कः १८.०८.२०१६

प्रिय अनुज प्रवीण!

शुभाशीर्वादाः।

अत्र कुशलं तत्रास्तु। तव पत्रम् अद्य एव मया प्राप्तम्। पत्रं पठित्वा सर्वं वृत्तं ज्ञातं, प्रसन्नता च संजाता। त्वं संस्कृतविद्यालये आयोजिते संस्कृतसम्भाषणशिविरे भागं गृहीतवान्। एकमासस्य अभ्यासानन्तरम् अधुना त्वं संस्कृतसम्भाषणे प्रवीणः अभवः इति अस्माकं कृते प्रसन्नतायाः विषयः वर्तते। पित्रा उक्तं यत् यदि योग्यताभिवृद्ध्यर्थं एतादृशाः अन्ये अपि कार्यक्रमाः आयोज्यन्ते तर्हि तेषु त्वया पूर्णोत्साहेन भागः गृहीतव्यः। अध्ययने अपि अवधानं दातव्यम्।

शेषं सर्वं कुशलम्। समये-समये च स्वाध्ययनस्थिति-विषये अवबोधय।

त्वदीयः शुभाकांक्षी
सुरेशः

## (३) मित्राय पत्रम्

अजयमेरुतः
दिनाङ्कः ०८.०५.२०१६

प्रियमित्र दीपक!

नमस्ते!

अत्र अहं कुशलः, भवतः कुशलतां कामये। अहं मातापितृभ्यां सह अस्मिन् ग्रीष्मावकाशसमये भ्रमणार्थं हिमाचलप्रदेशं गमिष्यामि। भवान् अपि अस्माभिः सह तत्र चलतु इति मम प्रबलेच्छा अस्ति। वयं सर्वे तत्र मिलित्वा आनन्दानुभवं करिष्यामः। मदीयः अयं प्रस्तावः भवते रोचते चेत्, ज्ञापयतु।

परिवारे पूज्येभ्यो सर्वेभ्यो जनेभ्यो मम सादरप्रणामः निवेदनीयः। पत्रस्योत्तरं शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्
सोहनः

## प्रार्थना-पत्राणि

**१. भवान् दशम्याः कक्षायाः छात्रः महेन्द्रः अस्ति। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णतावकाशार्थं प्रार्थनापत्रं लिखतु।**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः

राजकीयः आदर्श-उच्चमाध्यमिक-विद्यालयः,

जयपुरम् (राज.)

विषयः - दिनद्वयस्य रुग्णतावकाशार्थं प्रार्थनापत्रम्।

महोदयाः!

उपर्युक्तविषयान्तर्गते निवेदनम् अस्ति यत् अहं गतदिवसात् अतीव रुग्णोऽस्मि। अतः अहं विद्यालयम् आगन्तुं समर्थः नास्मि।

प्रार्थना अस्ति यत् १३.३.२०१६ तः १४.३.२०१६ दिनाङ्कपर्यन्तं दिनद्वयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।

दिनाङ्कः — भवताम् आज्ञाकारी शिष्यः

१३.०३.२०१६ — महेन्द्रः

कक्षा-दशमी

**२. आत्मानं दशम्याः कक्षायाः योगेशं मत्वा स्वविद्यालयस्य प्रधानाचार्याय पार्श्वस्थे विद्यालये आयोज्यमानासु क्रीडाप्रतियोगितासु धावन-प्रतिस्पर्धायां भागं ग्रहीतुं प्रार्थनापत्रं लिखतु।**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः,

राजकीय-माध्यमिक-विद्यालयः,

कोटड़ा, उदयपुरम्

विषयः - धावनप्रतियोगितायां भाग-ग्रहणम्।

महोदयाः!

उपर्युक्तविषयान्तर्गतं सविनयं निवेदनम् अस्ति यत् राजकीय-आदर्श-उच्चमाध्यमिक-विद्यालये (कोटड़ा इत्यत्र) २३.९.२०१६ तः २५.९.२०१६ दिनाङ्कपर्यन्तं क्रीडाप्रतियोगिताः आयोजिताः भविष्यन्ति।

अहमपि तत्र धावनप्रतियोगितायां भागदिनाङ्कः ग्रहीतुम् इच्छामि। अतः निवेदनम् अस्ति यत् भवन्तः मां क्रीडाप्रतियोगितायां भागं ग्रहीतुम् अनुमतिं प्रदाय अनुग्रहीष्यन्ति।

भवताम् आज्ञाकारी शिष्यः

दिनाङ्कः — योगेशः

२०.०९.२०१६ — कक्षा-दशमी

## संकेताधारितं संवादलेखनम्

(१)

**मञ्जूषातः उपयुक्तपदानि गृहीत्वा पुत्रस्य अध्ययनविषये पितापुत्रयोः संवादं पूरयतु —**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **अध्यापकः** | **विषये** | **गणिते** | **व्यवस्थां** | **स्थानान्तरणम्** | **अध्ययनं** | **समीचीनं** | **काठिन्यम्** |

पिता – रमेश! तव .................. कथं प्रचलति?

रमेशः – हे पितः! अध्ययनं तु .................. प्रचलति।

पिता – कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं .................. अनुभवसि?

रमेशः – आम्! .................. मम स्थितिः सम्यक् नास्ति। यतोहि अस्माकं विद्यालये इदानीं गणितस्य .................. नास्ति।

पिता – त्वं पूर्वं तु माम् अस्मिन् .................. न उक्तवान्!

रमेशः – पूर्वं तु अध्यापक-महोदयः आसीत् परं एकमासात् पूर्वमेव तस्य .................. अन्यत्र अभवत्।

पिता – अस्तु। अहं तव कृते गृहे एव गणिताध्यापकस्य .................. करिष्यामि।

रमेशः – धन्यवादाः।

### उदाहरणार्थ-समाधानम् :-

पिता – रमेश! तव **अध्ययनं** कथं प्रचलति?

रमेशः – हे पितः! अध्ययनं तु **समीचीनं** प्रचलति।

पिता – कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं **काठिन्यम्** अनुभवसि?

रमेशः – आम्! **गणिते** मम स्थितिः सम्यक् नास्ति। यतोहि अस्माकं विद्यालये इदानीं गणितस्य **अध्यापकः** नास्ति।

पिता – त्वं पूर्वं तु माम् अस्मिन् **विषये** न उक्तवान्!

रमेशः – पूर्वं तु अध्यापक-महोदयः आसीत् परं एकमासात् पूर्वमेव तस्य **स्थानान्तरणम्** अन्यत्र अभवत्।

पिता – अस्तु। अहं तव कृते गृहे एव गणिताध्यापकस्य **व्यवस्थां** करिष्यामि।

रमेशः – धन्यवादाः।

( २ )

**मञ्जूषायां प्रदत्तपदैः 'जयपुरभ्रमणम्' इति विषये मित्रयोः परस्परं वार्तालापं पूरयतु।**

| | | | | | | |
|---|---|---|---|---|---|---|
| **मित्रैः** | **जयपुरं** | **कार्यक्रमः** | **दर्शनीयम्** | **भ्रमणार्थम्** | **यात्रानुभवविषये** | **द्रक्ष्यामः** |

विनोदः – अंकित! श्वः भवान् कुत्र गमिष्यति?

अंकितः – अहं .................. गमिष्यामि।

विनोदः – तत्र किमपि कार्यं वर्तते? अथवा .................. एव गच्छति?

अंकितः – कार्यं नास्ति, अहं तु .................. सह भ्रमणार्थं गच्छामि।

विनोदः – जयपुरे कुत्र-कुत्र भ्रमणस्य .................. अस्ति?

अंकितः – वयं तत्र आमेर-दुर्गं, जयगढ़दुर्गं, गोविन्ददेव-मन्दिरं च ..................।

विनोदः – तत्र नाहरगढ़-दुर्गमपि पश्यतु। तदपि .................. अस्ति।

अंकितः – यदि समयः अवशिष्टः भविष्यति तर्हि निश्चयेन तत्र गमिष्यामः।

विनोदः – बाढ़म्। मित्र! नमस्ते! इदानीम् अहं गच्छामि। सोमवासरे आवां पुनः मेलिष्यावः। तदा .................. वार्तालापं करिष्यावः।

( ३ )

**मञ्जूषायाः उपयुक्तपदानि गृहीत्वा गुरुशिष्ययोः मध्ये क्रीडायाः विषये संवादं पूरयत।**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **अध्ययनम्** | **क्रीडने** | **बहुलाभम्** | **आवश्यकता** | **अधुना** | **करोषि** | **क्रीडाङ्गणे** | **क्रीडायै** |

अध्यापकः – प्रवीण! त्वम् अत्र किं .................. ?

प्रवीणः – हे गुरो! अहम् .................. किमपि न करोमि।

अध्यापकः – तर्हि गच्छ। तव मित्राणि तत्र .................. क्रीडन्ति, तैः सह क्रीड।

प्रवीणः – मम .................. रुचिः नास्ति। अतः अहं न क्रीडामि।

अध्यापकः – स्वस्थशरीरस्य स्वस्थमनसः च कृते क्रीडायाः अस्माकं जीवने महती .................. भवति।

प्रवीणः – यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम .................. बाधितं भविष्यति।

अध्यापकः – एतद् समीचीनं नास्ति। क्रीडायै स्वल्पसमयम् एव प्रयच्छ। अल्पसमयः अपि शरीराय .................. प्रदास्यति।

प्रवीणः – बाढ़म् श्रीमन्! इतः आरभ्य अहं कञ्चित् समयं .................. अपि दास्यामि।

(४)

**मञ्जूषायां प्रदत्तशब्दानां सहायतया मातापुत्रयोः मध्ये वार्तालापं पूरयतु।**

| | | | | | | |
|---|---|---|---|---|---|---|
| **वस्तूनि** | **आपणं** | **सायंकाले** | **विद्यालयस्य** | **मातुलः** | **भोजनं** | **त्वं** |

माता – राघव! .................. किं करोषि?

राघवः – अहं मम .................. गृहकार्यं करोमि।

माता – पुत्र! गृहकार्यानन्तरम् .................. गत्वा ततः दुग्धं शाकफलानि च आनय।

राघवः – अहं .................. पुस्तकं क्रेतुम् आपणं गमिष्यामि तदा दुग्धं शाकफलानि च आनेष्यामि।

माता – सायंकाले न, त्वं तु पूर्वमेव गत्वा आनय।

राघवः – शीघ्रं किमर्थम्?

माता – अद्य तव .................. आगमिष्यति, अतः .................. समयात् पूर्वमेव पक्ष्यामि।

राघवः – मातुलः आगमिष्यति चेत् अहम् इदानीम् एव गत्वा .................. क्रीत्वा आगच्छामि।

## अनुवाद-कार्यम्

**एतदर्थम् अस्मिन्नेव पुस्तके व्याकरण-भागे कारकं-वाच्यपरिवर्तनम्-अशुद्धिशोधनम् इति प्रकरण-त्रये अभ्यासः करणीयः।**

# चित्राधारितं वर्णनम्

( १ )

**निम्नाङ्कितं चित्रं दृष्ट्वा प्रदत्तसंकेतपदानां साहाय्येन स्वविद्यालयस्य विषये सप्तवाक्यानि लिखतु।**

ग्रामस्य मध्ये विंशतिः कक्षाः
षोडश अध्यापकाः उद्यानम्
क्रीडाङ्गणम् मध्यान्तरे
क्रीडन्ति अतीवसुन्दरः




( २ )

**चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया 'अस्माकं जीवने वृक्षाणाम् उपयोगिता' इति विषये सप्तवाक्यानि लिखतु।**

अस्मिन् युगे उपयोगिता प्राणवायुं
पर्यावरणं दृश्यते फलानि
प्राप्नुमः छाया काष्ठानि
खगाः वृक्षाणां कर्तनं नैव



( ३ )

**निम्नाङ्कितं चित्रं दृष्ट्वा प्रदत्तसंकेतपदैः सप्तवाक्यानि लिखत।**

राजमार्गस्य चित्रम् वाहनानि
शीघ्रं गृहं भारयुक्तवस्तूनि
प्रेषयितुं शक्नुवन्ति दुर्घटनाः
सावधानेन चालयामः सम्भावनाः



( ४ )

**चित्रं दृष्ट्वा निम्नलिखितशब्दानां सहायतया सङ्गणकस्य विषये पञ्चवाक्यानि लिखत।**

सङ्गणकस्य कार्यालये कार्याणि
सम्पूर्णाः सूचनाः कर्गदानां प्रयोगः
सङ्गणकज्ञानम् महती आवश्यकता



## कथाक्रमस्य संयोजनम्

संस्कृतकथासाहित्यमतीव समृद्धम् अस्ति। अत्र नैकानां नीतिकथानां महान् संग्रहो वर्तते। तासु काश्चित्-प्रसिद्धाः कथाः अत्र क्रमरहितवाक्येषु अतिसंक्षिप्ततया लिखिताः। तानि कथा-वाक्यानि क्रमेण योजयित्वा कथाक्रमसंयोजनस्य पाठ्यक्रमानुरोधात् रचनात्मक-कौशल-विकासाय अभ्यासः करणीयः।

### (१)

### क्रमरहितवाक्येषु कथा

(१) घटे जलम् अल्पम् आसीत्।
(२) तस्य मस्तिष्के एकः विचारः समागतः।
(३) एकः पिपासितः काकः आसीत्।
(४) सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम्।
(५) सः वने एकं घटम् अपश्यत्।
(६) जलं पीत्वा काकः ततः अगच्छत्।

### कथाक्रम-संयोजनम्

(१) एकः पिपासितः काकः आसीत्।
(२) सः वने एकं घटम् अपश्यत्।
(३) घटे जलम् अल्पम् आसीत्।
(४) तस्य मस्तिष्के एकः विचारः समागतः।
(५) सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम्।
(६) जलं पीत्वा काकः ततः अगच्छत्।

### (२)

### क्रमरहितकथावाक्यानि

(१) मूषकः परिश्रमेण जालम् अकृन्तत्।
(२) एकदा सः जाले बद्धः।
(३) सिंहः जालात्-मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।
(४) एकस्मिन् वने एकः सिंहः वसति स्म।
(५) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
(६) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।

### क्रम-संयोजनम्

(१) एकस्मिन् वने एकः सिंहः वसति स्म।
(२) एकदा सः जाले बद्धः।

(३) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
(४) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।
(५) मूषकः परिश्रमेण जालम् अकृन्तत्।
(६) सिंहः जालात् मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।

## (३)

### क्रमरहितकथावाक्यानि

(१) तदा तस्य मुखस्था रोटिका अपि जले पतति।
(२) एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।
(३) तदाः सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।
(४) सः कुक्कुरः रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति।
(५) सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।
(६) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।
(७) अत एव कथ्यते 'लोभः न करणीयः।'

### कथाक्रमस्य संयोजनम्

(१) एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।
(२) सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।
(३) तदा सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।
(४) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।
(५) सः कुक्कुरः रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति।
(६) तदा तस्य मुखस्था रोटिका अपि जले पतति।
(७) अत एव कथ्यते 'लोभः न करणीयः।'

## (४)

### क्रमरहितकथावाक्यानि

(१) एकः बुभुक्षितः शृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
(२) लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
(३) परं तथापि द्राक्षाफलानि न प्राप्नोत्।
(४) एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
(५) ''एतानि द्राक्षाफलानि अम्लानि'' इति उक्त्वा कुपितः शृगालः ततः गतः।
(६) तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।

### कथाक्रमस्य संयोजनम्

(१) एक: बुभुक्षित: शृगाल: भोजनार्थं वने इतस्तत: भ्रमति स्म।
(२) एकस्मिन् स्थाने स: द्राक्षालतां पश्यति।
(३) लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
(४) तानि खादितुं स: नैकवारं प्रयासम् अकरोत्।
(५) परं तथापि द्राक्षाफलानि न प्राप्नोत्।
(६) ''एतानि द्राक्षाफलानि अम्लानि'' इति उक्त्वा कुपित: शृगाल: तत: गत:।

### (५)

### क्रमरहितकथावाक्यानि

(१) स: प्रतिदिनं बहून् पशून् हत्वा खादति स्म।
(२) एकदा यदा शशकस्य क्रम: आगत:, तस्य विलम्बागमनेन सिंह: कुपित: जात:।
(३) सिंह: जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत्।
(४) कस्मिंश्चित् वने एक: सिंह: वसति स्म।
(५) तदा सर्वे पशव: विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्त:।
(६) तदा चतुर: शशक: सिंहं कूपस्य समीपम् अनयत्।
(७) अत: लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।

### कथाक्रमस्य संयोजनम्

(१) कस्मिंश्चित् वने एक: सिंह वसति स्म।
(२) स: प्रतिदिनं बहून पशून् हत्वा खादति स्म।
(३) तदा सर्वे पशव: विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्त:।
(४) एकदा यदा शशकस्य क्रम: आगत:, तस्य विलम्बागमनेन सिंह: कुपित: जात:।
(५) तदा चतुर: शशक: सिंहं कूपस्य समीपम् अनयत्।
(६) सिंह: जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत्।
(७) अत: लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।